PRĀCYĀVĀṆĪ MANDIRA
SANSKRIT TEXT SERIES
Vol. 7

गौडचन्द्रशेखरकृतं

शूर्जन-चरितम्

(ऐतिहासिकं महाकाव्यम्)

डक्टर-श्रीयतीन्द्रविमलचतुर्धुरीणेन संशोधितम्

THE SURJANA-CARITA

(Historical Sanskrit Mahākāvya)

By

POET CANDRASEKHARA OF BENGAL

Critically edited for the first time with an
Introduction in English and Sanskrit,
Indices, etc.

By

Dr. JATINDRA BIMAL CHAUDHURI, Ph. D. (London),
Kavyatirtha, Secretary, Govt. Vangiya Sanskrita Siksha Parishat,
Calcutta ; formerly, Principal, Govt. Sanskrit College,
Calcutta and Head of the Department of Sanskrit,
Presidency College, Calcutta, and Lecturer,
London University.

CALCUTTA 1951

Rs. 8/-

Published by
Dr. J. B. Chaudhuri
Pracyavani Mandir
(Institute of Oriental Learning)
3, Federation Street, Calcutta—9

Available at :—

PRACYAVANI MANDIR
3, Federation Street, Calcutta—9.

DAS GUPTA & CO.
54/3, College Street, Calcutta.

CHUKRABURTTY CHATTERJEE & CO.
15, Bankim Chatterjee Street, Calcutta.

D. M. LIBRARY
3 /2, Cornwallis Street, Calcutta.

SANSKRITA PUSTAK BHANDAR
38/2, Cornwallis Street, Calcutta.

LAKE BOOK STALL
51/B, Rashbehari Avenue, Calcutta.

ORIENAL BOOK AGENCY
15, Shukrawar, Poona.

B. N. SUR & CO,
Gole Market, New Delhi.

MEHER CHAND LACHMAN DAS
Kucha Chellan Gali Nanne Khan, Faiz Bazar Road,
Daryagunj, Delhi.

Printed by :
Sri J. C. Sarkhel, Calcutta Oriental Press Ltd.,
9, Panchanan Ghose Lane, Calcutta.

INTRODUCTION

Description of the Manuscript

The only original MS. of the Śūrjana-carita belongs to the Asiatic Society, Calcutta, No. 1135=3084. The Bhandarkar Oriental Research Institue (No. 775, 84/1907-15) possesses a copy of this MS. (copied in 1912) which has, therefore, no independent worth of its own. So, we give here the description of the Asiatic Society MS. of the Śūrjana-carita: —

Substance, country-made paper. 11½+5 inches. Folio, 87. Lines, 10 on a page. Extent in ślokas, 2200. Character, Nagara. Appearance, old. Complete.

Poet Chandraśekhara of Gauḍa

The concluding verse gives us some valuable informations about the poet. The word "Gauḍīya" at the very beginning of the verse shows that he was a Bengali by birth, though he spent certainly a long part of his life in Bundi and Kotah.

It is also further recorded in this verse that the name of his father was Jitāmitra and also that the poet was an Ambaṣṭha or Vaidya. The author composed the work in Benaras where he was residing under the patronage of King Śūrjana. The poet appears to have toured North India extensively, particularly, as a member of the party of King Śūrjana when he came from Bundi to Benaras for settling there.

Śūrjana Siṇha was a contemporary of Emperor Akbar—who exchanged with him, after the conquest of Gondwan in V.S. 1872 *i.e.* 1576 A.D., Banaras and Cunar for Bundi and Kotah. Śūrjana was an ally of Emperor Akbar. The composition of the work began during the life-time of Śūrjana but it was completed after his death. So, the work was composed about 350 years ago from date.

The Historical importance of the Śūrjana-carita

Vāsudeva Dīkṣita was the progenitor of the Royal Cauhan Family. His capital was Vṛndāvatī situated on the bank of the river Carmaṇ-

vatī. Vāsudeva's son was Naradeva, his son Śrīcandra and Śricandra's son was Ajayapāla. Ajayapāla constructed the well-known Fort Ajayameru, now-a-days known as Ajmere. Ajayapāla's son was Jayarāja whose son was Sāmantasiṃha. The succeeding kings were Gurjaka, Candana, Vajra and Viśvapati.

Viśvapati was very unhappy though it was very difficult for one to account for the same; so, Sunaya, the son of his Guru and his life-long friend, an adept in Veda, Smṛti, Mīmāṃsā, Tarka, etc. asked him one day about the real cause of his unhappiness. The king replied that he desired to become the sovereign monarch. So Sunaya advised him to propitiate Śākaṃbharī Devī for this. Accordingly, the king Viśvapati left the kingdom with some attendants for obtaining his desired object through the grace of the Divinity. Sunaya also accompanied him. The king went on practising austere penances and Śākaṃbharī Devī graced him with a personal visit. The King prayed for undiminishing fame.

Śākaṃbharī Devī further granted him the boon that in his kingdom there would never be any dearth of salt. Viśvapati was blest with a son called Harirāja, who marched against the king of Persia and completely vanquished him. Harirāja also defeated the Ujavakas, Hūṇas, Madras, Cīnas and the Mlecchas and built up a fort called Yodhapur nearer Mautavapur. The king of Persia took to heels for fear of life.

Harirāja's son Siṃharāja married Manoramā, princess of Avantī. As Siṃharāja and Manoramā had no son, they practised austere penances, but to no effect. Consequently, Siṃharāja's nephew Bhīmadeva became the ruler. Bhīmadeva is reported to have vanquished the kings of Aṅga, Vaṅga, Kaliṅga, Magadha, Kuntala, Gauḍa and Lāṭa. He crossed the Pampā, Godāvarī, Tāptī and Tāmraparṇa and collected taxes from the sea-faring merchants. Then he proceeded towards Dvārakā and defeated the Khasas, Kambojas and Śakas. Subsequently he also conquered Kāmarūpa.

Bhīmadeva's son Vigrahadeva conquered the Gurjars. Gujrat at that time was famous for Vedic scholars, whose wives also were highly proficient in, and could teach, the Vedas, (Canto vi, v. 5.) His successors were Guṇadeva and Vallabha. Vallabha vanquished Bhoja,

the king of Cedi, whom he first sent to gaol and subsequently, released from jail as he went on hunger-strike. The succeeding rulers were Rāmanātha-Cāmuṇḍa-Durlabharāja-Drusaladeva and Vīsala. Cāmuṇḍa defeated the Yavanas as well as Śakas. Vīsala defeated Karṇa, King of Avantī and annexed it to his own territory. Pṛthvīrāja, Bahlana and Analadeva were his successors. Analadeva is credited with extensive repairs in Puṣkaratīrtha with various innovations.

In Puṣkara, the priest explained to king Analadeva the significance of the word Cauhān or Cāhuāna which was the corrupt form of Caturbāhu Puruṣa. Cāhuāna, he said, first made his appearance in Puṣkara, as the saviour of the sacrifices offered to Vidhātṛ himself in Puṣkara. So the king as a scion of the Cauhāna family was eternally linked up with Puṣkara.

Analadeva was succeeded by Jagadeva, Bīsaladeva and Ajayapāla. Ajayapāla married Vijayā, daughter of Sudāmā Nāga through the intermediary of an ascetic and was blest with a son called Gāṅgadeva by her.

Gāṅgadeva's son Someśvara married Karpūradevī, Princess of Kuntala. They had two sons—Pṛthvīrāja and Mānikyarāya. It is this Pṛthvīrāja who abducted Kāntimatī, daughter of Jayacandra of Kanauja. He defeated Sahabuddin, the Muslim ruler, twenty-one times and subsequently, let him free. Sahabuddin in his turn, however, dragged out the eyes of Pṛthvīrāja from the sockets and sent him to jail. Then Pṛthvīrāja, together with the assistance of another jail-mate called Caṇḍa, killed Sahabuddin[1]. Subsequently, Pṛthvīrāja died in the Kurujāṅgala forest.

Then in this royal family were born in succession the following rulers: Prahlāda-Govindarāja—Vīranārāyaṇa-Vāgbhaṭa and Jaitrasiṃha.

1. Tod says that Pṛthvīrāja was slain by Sahabuddin in 1193. *The Annals of Rajasthan* records the following list of descendents of Pṛthvīrāja :—

Pṛthvīrāja
- Rainasi (slain in the Sack of Delhi)
- Chahirdeo
  - Vijayaraj
    - Lakunsi (who had 21 sons)

Jaitrasiṃha built up the city called Siṃhapura. The celebrated Hammīradeva was his son. He defeated the Turuṣkas, annexed Delhi to his territory and shifted his capital to Raṇastambhapura i.e. Ranthambhore. He was a very great king, endowed with many qualities of both head and heart, and was also endowed with great physical might, but had the misfortune of being defeated by Alauddin and his brother Ullūkhān. Hammīradeva permitted his queens to ascend the funeral pyre and himself was killed in action.

Hammīradeva was seventh in descent from Mānikyarāya, younger brother of Pṛthvīrāja. Śūrjana was a direct descendent of Māṇikyarāya. The lineage, given by Candraśekhara in the Śūrjana-carita is as follows:—Māṇikyarāya, Caṇḍarāja-Bhīmarāja-Vijayarāja-Rayaṇa-Kalhaṇa--Vaṅga-D e v a--Samarasiṃha--Narapāla--Hammīra--Varasiṃha-Bhāramalla-Narmada (who married Dhārā)—Arjuna (who married Jayantī, daughter of Daśaratha)—Śūrjana[2]. Śūrjana's allience with Udayarāja made him fortified against many odds in life. He vanquished the King of Mālava and won the fort of Kotāh. Śūrjana married Kanakāvatī, daughter of Jagamāla, King of Vaṃśabahala. Their son was Bhojadeva. Śūrjana is reputed to have vanquished the Turks thirteen times. Then Emperor Akbar himself attacked him. From Paṭṭana Śūrjana crossed the river and took shelter in the fort Ranthambhore[3]. Śūrjana in the long run made an alliance with Emperor Akbar. The ambassador sent by Akbar made an offer of extensive lands on the banks of the Narmadā, in Muthra, Banaras, etc. in exchange of Ranthambhore. Śūrjana agreed to this[4].

2. Tod records in his Annals that Sūrjana was the eldest of the four sons of Arjuna, *viz.* Sūrjana, Ram Singh, Akhiraj and Kandil. Sūrjana succeeded his father in 1533 A.D. (Saṃvat S. 1589). Arjuna, as recorded in the bardic chronicles of Mewar and Bundi, was blown up in the Chitor Boorj.

3. Sawant Singh entered into correspondence with the Afgan Governor of Ranthanbhore who surrendered this celebrated fortress to the former who in his turn delivered this to his superior Rao Sūrjana. The Chauhan Chief of Baidla. however, succeeded in stipulating that the fortress could be held by Rāva Sūrjana as a fief of Mewar. This fortress, however, became an early object of Akbar's attraction.

4. The chronicles of Bundi have recorded the following accounts about Sūrjana:—

Rāva Sūrjana was instrumental in reducing Gondwana or the region of Gonds as commander. After capturing their capital Bari, he erected for

Then Śūrjana went out on a pilgrimage to Vṛndāvana in the company of Gopāla Vyāsa. From Vṛndāvana, they went to Prayāga and thence to Banaras. Candraśekhara says that Śūrjana reached Banaras in the month of Māgha. He died in Banaras, and the funeral rites were performed in the burning Ghāṭa Maṇikarṇikā. Kanakāvatī and other queens became *Suttee*.

After Śūrjana's death Bhojadeva became the ruler[5]. Emperor Akbar solicited the help of Bhojadeva in connection with the conquest of Gujrat. This help he gave, as a consequence of which Akbar became very friendly with him. It is stated in the last Canto of the Śūrjana-carita that Bhojadeva conquered Suhma, Vaṅga, Vidarbha Videha, Trigarta, Mālava and other kingdoms.

The literary excellence of the Śūrjana-carita.

The Śūrjana-carita consists of twenty cantos dealing with historical facts and may, for the sake of convenience, be called an Aitihāsika Mahākāvya. Like a Mahākavya the work begins with a Namaskāra and also gives copious description of rivers, hills, forests, sunrise, sun-set, etc.

The rhetoricians have denied the historical writers the honour of the being called Poets, e.g. Viśvanātha, author of the Sāhityadarpaṇa says no body can become a poet only by narrating historical facts, because this is the jurisdiction of history proper—"न हि कवेरितिवृत्तमात्रनिर्वाहेणात्मपदलाभः, इतिहासादेरेव तत्सिद्धेः" ॥ Still, it remains a fact that the author of the Śūrjana-carita cannot be denied the high place of a poet. The literary excellence of the Śūrjana-carita is indeed of a very high order

commemaration, the gateway still known as the Sūrjanpol. Sūrjana got for this, as a gift from Akbar, the territory including Benares and Cunar in the year 1576 A.D. (S. 1632), the fateful year of the battle of Haldighat in which Rana Pratap of Mewar fought against Sultan Selim.

Rāva Sūrjan ornamented and beautified the city of Benaras, specially his quarters and 84 edifices for various public purposes. Sūrjan left behind him three sons to mourn his loss, *viz.* Rao Bhoj ; (2) Dooda, nicknamed by Akbar Lukur Khan and (3) Raemull. Dooda revolted against the Emperor Akbar for which Raja Surjan, Prince Bhoja and others had to go to Bundi.

For the grant by Akbar of the fort of Cunar to Sūrjana, see Akbarnama, chap. XVIII, p 223.

5. The Ain-i-Akbari Bibl. Indica, (Vol. I, 2nd ed. Phillot, p. 510) mentions that Bhoj served under Man Sinha against the Afgans in Orisa and under Abul-Fazl in the Dakhin, see also Akbarnama III, 851, 855.

and is comparable with that of the Raghuvaṃśa of Kālidāsa, and the Rāmāyaṇa-mañjarī and the Bhārata-mañjarī of Kṣemendra. It is not full of embellishments, but these are not called for in a work like the Śūrjana-carita "न रम्यमाहार्यमपेक्षते गुणम्" ।

The verse on Śakhambharī Devī (1.4.) is replete with alliteration, and flashes with refreshing thought and beautiful style. The poet has described the autumn in the 7th canto (v. 9) where the lotus is beautifully depicted as a heroine, with all the adjectives bearing double meanings. The verse is thus a beautiful example of the Śleṣālaṃkāra. Again, in verse 7.12. the young he-swan has been so described as to refer to, by suggestion, the rival-lover. Here, too, all the adjectives are capable of double interpretation.

Another outstanding feature of the work is that it does not indulge in artificial versification, double entendre etc. Here, the composition is simple, thought lofty and the avowed object of the poet is narration of fact, and not display of imaginative power and knowledge.

It is a matter of great gratification to the Sanskrit scholars that Bengal produced a very large number of Sanskrit authors who resided outside Bengal for various reasons and established great fame for their literary achievements. Thus, Jayanta Bhaṭṭa, the celebrated author of the Nyāyamañjarī, son of Kānticandra and grandson of Kalyāṇasvāmin, resided in Kashmir. Jayantabhaṭṭa's son Abhinanda (known as Gauḍa Abhinanda i.e. Abhinanda of Bengal) is the celebrated author of the Kādambarī-kathāsāra. Poet Lakṣmīdhara, a native of Bhaṭṭakosala in Gauḍa was a court-poet of king Paramāra-Bhoja (1000-1055 A.D.) and composed the Cakrapāṇi-vijaya (Indian Culture, 1.703-704). Halāyudha of Navagrāma in South Rāḍhā resided in Mālava. The sixty-four verses he composed in V.S. 1120 = 1063 A.D. are still found engraved in the temple of Amareśvara in District Nimar, Central India. Madana, disciple of Āśāḍha, went to Mālava in his early life and became known as Bālasarasvatī for his graceful composition. In course of time, he became the Guru of king Arjunavarman (1210-1218 A.D.), scion of the family of Parmāra-Bhoja. Madana composed the Sanskrit drama Pārijātamañjarī for commemorating the victory of King Arjunavarman over Jayasiṃha, king of Gujrat. Madana is also the author of several edicts in praise of Arjunavarman. Kavi Rāmacandra

Bhāratī of Bengal who was a native of village Vīravatī visited Ceylon during the reign of Parākramabāhu II of Ceylon (1225-60 A.D.) He there became a disciple of the Buddhist preceptor Rāhula and became well-known for his vast learning in the Budhist literature. He has to his credit three works viz. Bhakti-śataka, Vṛtta-mālā and Vṛtta-ratnākara-pañjikā (Indian Antiquary, 1930, p.27).

The Karaṇa-Kāyasthas of Bengal became further well-known for their artistic hand-writing. They were invited to all parts of India for engraving edicts and for similar other purposes.

The celebrated work Rāma-carita of Sandhyākara Nandin has been ably edited by competent scholars. It is a mine of informations regarding the rule of the Pāla Kings of Bengal. The Rāmacarita of Gauḍa Abhinanda, too, has many references to the Pāla kings of Bengal.

There is a rare MS. called Vīrabhadra-campū which is hitherto unpublished but throws much light upon the history of Rewa in the Central provinces in particular and the history of Mediaeval India in general. King Vīrabhadra was a scion of the Baghela family. He was the son of Rāmacandra and grandson of Vīra-Bhānu. This family was very friendly with the Maughala Badsah family of Delhi. It was king Rāmacandra of Rewa who sent Tānasena to Delhi as a friendly gift to Emperor Akbar. The author of the Vīrabhadra-campū was Pradyotana or Padmanābha Bhaṭṭācārya, son of Baladeva Miśra and Vijayaśrī, presumably a Gauḍa scholar. He completed the work in 1634 i.e. 1578 A.D. as is stated in the following verse:—

युगरामर्तुशशाङ्के वेर्षे चैत्रे सिते प्रथमे ।
श्रीवीरभद्रचम्पूः पूर्णाभूच्छ्रेयसे विदुषाम् ॥

The sixth Ucchvāsa of this campū has been specially devoted to the description of the family members of Vīrabhadra, *viz*. Pratāparudra, Udayabhānudeva, cousins of Vīrbhadra. Pratāparudra and Udayabhānudeva were the sons of Yāminībhānudeva, brother of Vīrabhānudeva, Rāmacandra's father. Pratāparudra's son was Sūryabhānu and Udayabhānudeva's son Candrabhānu.

In fine, it is my pleasant duty to record my deep sense of gratitude to the authorities of the Asiatic Society, Calcutta and the Bhandarkar Oriental Research Institute for lending me their Mss. for

the preparation of the present critical edition of the Surjana-carita for the first time.

A verse of this work, viz., V-78, Canto XIII, p. 79, is found quoted in the Padyāmṛta-taraṅgiṇī of Haribhāṣkara (V. 67, p. 20, section on the description of Kings). This shows that the Sūrjana-carita became well known within a few years of its composition. As a matter of fact, the importance of this work from various points of view can hardly be overrated.

Pracyavani Mandir
3, Federation Street,
Calcutta.

J. B. C.

भूमिका

कविः चन्द्रशेखर आत्मविषयमधिकृत्य शूर्जनचरितग्रन्थस्य अन्तिमे भागे लिखितवान्—

"गौडीयः किल चन्द्रशेखरकविर्यः प्रेमपात्रं सता-

मम्बष्ठान्वयमण्डनात् कृतधियो जातो जितामित्रतः।

निर्बन्धान्नृपसूर्जनस्य नितरां धर्मैकतानात्मनो

ग्रन्थोऽयं निरमायि तेन वसता विश्वेशितुः पत्तने" ॥

इति। अस्मिन् श्लोके व्यवहृताद् गौडीयशब्दाज् ज्ञायते असौ वङ्गीय एव। "अम्बष्ठान्वय" शब्दाद् ज्ञायतेऽसौ "वैद्य"-वंशसम्भूत आसीदिति। 'जितामित्र'श्च अस्य पिता आसीत्।

शूर्जनसिंहः सम्राज आकवरशाहस्य समसामयिक आसीत्। असौ "गोस्तावनाख्य"-स्थान-विजयाद् अनन्तरं १६३२ संवत्-संवत्सरे (ख्रीष्टीये १५७६ अब्दे वा) सुमतेः आकवर-महोदयाद् वाराणसी-चुणाराख्यं प्रख्यातं स्थानद्वयं प्राप। ग्रन्थादस्माद् बहुधा ज्ञायते यदसौ राजा शूर्जन आकवरमहोदयेन साकं महता सख्यसूत्रेण आबद्ध आसीत्। अयं शूर्जनचरिताख्य-ग्रन्थः शूर्जनजीवितसमये आरब्धः तस्य परलोकगमनाद् अनन्तरमेव समाप्त आसीत्। प्रायेण सार्धत्रिशतवर्षपरिमितात् समयात् प्रागेव ग्रन्थोऽयं विरचित आसीद् इति नास्ति संदेहः।

यद्यपि अस्मिन् ग्रन्थे कविवरस्य गौडचन्द्रशेखरस्य कवित्वशक्तेः महामहिमा परिदृश्यते, तथापि ऐतिहासिकघटनानां कुत्रापि परिवर्तनपरिवर्जनादिपूर्वको विपर्ययो न तेन कृत इति ततोऽपि महत्तरो महिमा गौडकविवरस्य। ऐतिहासिकसत्यं सत्यमेव—न कथमपि लङ्घनीयमिति मतमासीत् तस्य सुदृढमिति संस्कृतसाहित्यराज्ये विस्मयकरोऽयं व्यापारः।

ऐतिहासिकविवरणी

प्रथमः सर्गः। चौहानवंशीयभूपतीनाम् आदिपुरुष आसीत् वासुदेवदीक्षितः। चर्मण्वती-नदीसमीपवर्तिनी नगरी वृन्दावती तस्य राजधानी आसीत्। वासुदेवात् समजनि नरदेवः, तस्मात् श्रीचन्द्रः, तस्मात् अजयपालः। अजयपालः "अजयमेरु"नाम्ना प्रख्यातं दुर्गं निर्ममे। तन्नाम्नैव आधुनिकं नगरं आजमीर इति। अजयपालस्य पुत्र आसीत् जयराजः; जयराजात् समजनि सामन्तसिंहः। ततः क्रमेण गूर्जकः, चन्दनः, वज्रः, विश्वपतिः इति राजपरम्परा।

द्वितीयः सर्गः। सर्वगुणविमण्डितोऽपि विश्वपतिर्न तृप्तिं लेभे इति दृष्ट्वा तस्य गुरुपुत्रो बाल्यबन्धुश्च सुनयाह्वो ब्राह्मणस्तम् अशान्तिकारणं पप्रच्छ। राजसार्वभौमत्वे एव

तस्य अभिलाष इति तस्मात् राज्ञो ज्ञात्वा मुनयस्तं शाकम्भरीदेव्या आराधनाय मनो निधातुम् उपदिदेश। अतो राजाऽपि तदर्थं कतिपयपरिजनैः प्रचुरधनरत्नैश्च सह वनविहारव्यपदेशेन राज्याद् बहिर्निर्जगाम।

तृतीयः सर्गः। कठोरेण आराधनेन विश्वपतिः शाकम्भरीदेव्या दर्शनं लब्ध्वा तां तुष्टाव।

चतुर्थः सर्गः। स्तवतुष्टा देवी स्वके राज्ये लवणप्राचुर्यं भविष्यति इति तस्मै वरं ददौ। विश्वपतेः पुत्र आसीत् हरिराजः। पारसीकः यवनराजः हरिराजस्य राज्यं जेतुकामः तद् अवरुरोध; किन्तु हरिराजसैन्यैः पराजितः सन् पलायामास।

पञ्चमः सर्गः। हरिराजस्य पुत्रः सिंहराजः अवन्तिपतिकन्यां मनोरमामुपयेमे। पुनस्तयोः पुत्रो न जात इति तौ कठोरां तपश्चर्यां चक्रतुः। अतः भ्रातुष्पुत्रः भीमदेवो यौवराज्येऽभिषिक्त आसीत्। दिग्विजय-क्रमेण भीमदेवो मगधाङ्ग-गौड-वङ्ग-कलिङ्ग-कुन्तल-लाट-भूखण्डान् अधिचकार। ततो जगाम स द्वारवतीनगरीम्। भूयोऽपि असौ विजिग्ये खस-काम्बोज-शकादिकं पाश्चात्यशक्तिसमूहम्। ततः पूर्वमेव कामरूपं व्यजयत।

षष्ठः सर्गः। भीमदेवस्य तनयो विग्रहदेवोऽतिसमृद्धं गुर्जरदेशमधिचकार। विग्रहस्य पुत्र आसीद् गुन्ददेवः, तस्य पुत्रो वल्लभः। वल्लभस्तु भूयसा शौर्यवीर्यवान् चेदिपतिं भोजं पराजित्य प्रथमतः कारागाररुद्धं चकार, ततो मुक्तिं तस्मै ददौ। अतः राजपरम्परा—रामनाथ-चामुण्ड-दुर्लभराज-दुसलदेव-वीशला इति। वीशलस्तु अवन्तिपतिं कर्णं विजित्य अवन्ति-देशं स्वराज्यान्तर्गतं चकार। भूयोऽपि राजपरम्परा—पृथ्वीराज-वह्लणानलदेवाश्चेति। पुष्करतीर्थसंस्कर्ता आसीदेषोऽन्तिमो राजा अनलदेवः।

सप्तमाष्टम-नवमसर्गाः। अतो राजपरम्परा जगदेव-वीसलदेवाजपाला इति। अजपालः सुदामनामक-नागस्य कन्यां विजयामुपयेमे; तस्यां च लेभे पुत्रं गङ्गदेवम्।

दशमः सर्गः। गङ्गदेवस्य पुत्रः सोमेश्वरः कुन्तलाधिपकन्यां कर्पूरदेवीमुपयेमे। तया च लेभे पुत्रद्वयं—ज्येष्ठं पृथ्वीराजं कनिष्ठं च माणिक्यरायम्। एष एव स पृथ्वीराजो यः कान्यकुब्जात् जयचन्द्रकन्यां कान्तिमतीं जहार। म्लेच्छपतिं सहावुद्दीनम् एष एव क्रमेण एकविंशतिवारं पराजित्य मुक्तिं ददौ। तदनन्तरं तु साहावुद्दिनोऽसौ पृथ्वीराजं पराजित्य तस्य चक्षुर्द्वयमुत्पाट्य तं कारागाररुद्धं चकार। पृथ्वीराजस्तु चन्दनामकस्य कस्यचित् कारानिवासिनो जनस्य साहायकं लब्ध्वा कौशलेन साहावुद्दिनं जघान। ततः कुरुजाङ्गलम् आश्रयामास, तत्रैव ममार च॥

एकादशः सर्गः। ततः क्रमेण अस्मिन् राजपरिवारे जन्म परिजगृहुः प्रह्लाद-गोविन्द-राज-वीरनारायण-वाग्भट-जैत्रसिंहाख्या नृपाः। जैत्रसिंहोऽसौ सिंहपुरीनाम्नीं नगरीं निर्ममे। अस्य पुत्रो हम्मीरदेवः। एष राजा तुरुष्कान् विजित्य दिल्लीनगरं स्वाधिकारे नीत्वा रण-

स्तम्भपुरीमेव राजधानीं चकार। महान् अयं राजा भूयसा दानशीलः शौर्यवीर्यसमन्वितोऽपि आल्लावदीनेन तद्भ्राता उल्लूखानेन च आक्रान्तः नष्टभाग्यो बभूव।

द्वादशः सर्गः। हम्मीरदेवो महिषीवृन्देभ्यः अग्निप्रवेशाय अनुमतिं दत्त्वा युद्धच्छेल एव प्राणान् तत्याज।

त्रयोदशः सर्गः। हम्मीरदेवस्य पूर्वतनः सप्तमः पुरुष आसीत् साहावुद्दिनसंहारकस्य पृथ्वीराजस्य कनिष्ठो भ्राता माणिक्यरायः। कालक्रमेण शूरजनः अस्यैव माणिक्यरायस्य वंशे जन्म परिजग्राह। तत्र तु अयं क्रमः—माणिक्यराय-चण्डराज-भीमराज-विजयराज-रयण-कोल्हन-वङ्गदेव-समरसिंह-नरपाल-हम्मीर-वरसिंह-भारमल्ल-(धाराजानि) नर्मद (दशरथकन्याजयन्तीपति) अर्जुन-शूरजना इति। उदयभूभृदाश्रयेण तस्य शूरजनस्य श्रीवृद्धिरिति ग्रन्थेऽस्मिन् उच्यते। मालवाधीशं पराजित्य शूरजनः कोटा-दुर्गं स्वाधिकारं निनाय।

चतुर्दशः सर्गः। शूरजनोऽसौ राजा वंशवहूलाजनाधिपजगमालकन्यकां कनकावतीमुपयेमे।

पञ्चदशः सर्गः। पतिगृहं गच्छन्तीं कनकावतीं प्रति तन्मातुरुपदेशः,उपवनविहारादिश्च अत्र वर्ण्यते।

षोडशः सर्गः। कनकावतीशूरजनयोः पुत्र आसीद् भोजदेवः। दिल्लीश्वर आकवरस्तु शूरजनं पराजेतुमैच्छत। इतः पूर्वं तु शूरजनः पारसीक-तुरुष्क-सैन्यदलं त्रयोदशवारं युधि पराजिग्ये ; अत आकवरः स्वयमेव तम् आचक्रमे। पट्टनपुरतः शूरजनो नदीम् उत्तीर्य रणस्तम्भदुर्गं जगाम।

सप्तदशः सर्गः। आकवरसाहस्तु शूरजनस्य वीरत्वदर्शनसन्तुष्टस्तं बहुधा सम्मेने।

अष्टादशः सर्गः। अथ परेद्युः आकवरसाहस्य दूतप्रवरः सन्धिहेतोः शूरजनसकाशम् आजगाम। आकवरसाहः रणस्तम्भपुरविनिमयेन नर्मदातीरपवित्रस्थलानि, यमुनापरिशोभितमथुरास्थलविशेषान्, जाह्नवीपरिवेष्टितकाशीधामादिकञ्च तस्मै दातुमियेष इति दूतोऽसौ निवेदयामास। अतः तीर्थं गन्तुकामोऽसौ राजा शूरजनः नर्मदातः मथुरामागत्य तस्माद् गोपालव्यासेन सह वृन्दावनं परिबभ्राम।

ऊनविंशः सर्गः। वृन्दावनतो राजा काशीं गन्तुकामः प्रयागमगच्छत्, तस्मात् काशीम् आजगाम। माघमासे राजा काशीधाम्नि आगच्छदिति उक्तं चन्द्रशेखरेण। वाराणस्यां राजा ममार ; मणिकर्णिकायां तस्य दाहक्रिया सम्पादिता। कनकावतीप्रभृतयः राजपत्न्यः सहमरणं चक्रुः।

विंशः सर्गः। मृते शूरजने तत्पुत्रो भोजदेवः तस्य सिंहासनमधिरुरोह। गुर्जरदेशजय-

काले सम्राट् आकवरसाहः भोजदेवस्य साहायकमियेष ; तत्प्रदानेन भोजदेव आकवरस्य सातिशयं प्रीतिपात्रं बभूव । शूर्जनचरितस्य अन्तिमे सर्गे उक्तमास्ते यत् भोजदेवः सुह्म-वङ्ग-विदर्भ-विदेह-त्रिगर्त-मालवादिकान् देशान् विजित्य इति ।

ग्रन्थमाहात्म्यम्

प्रसङ्गक्रमेण मया अस्य ग्रन्थस्य कवित्वोत्कर्षमधिकृत्य किञ्चिद् वक्तुमिष्यते । शूर्जन-चरितस्य रचनाशैली रघुवंशसदृशीति वक्तुं नाल्पमपि बिभेति मे चेतः । विंशत्या सर्गैर्मण्डिते द्वि-सहस्राधिकश्लोकात्मके ग्रन्थेऽस्मिन् न कुत्रापि रचनाकाठिन्यम् अयथापदप्रयोगः कष्टकल्पना वा दृश्यते । परन्तु सर्वत्र महत् सौकर्यं गुणालङ्कारादिषु सर्वेषु काव्यमाहात्म्येषु । षोडशशततमे अब्दे वङ्गेषु एष महाकविर्जन्म परिजग्राह इति अहो सौभाग्यमस्माकं वङ्गीयानाम् । अत्रत्या रचनारीतिः काचन भवतुसु प्रदर्श्यते ।

भगवती शाकम्भरी वृन्दावतीपुरे सर्वजनवन्द्या देवी, तामुद्दिश्य ग्रन्थारम्भे कविः लिखित-वान्—

शुम्भादिदम्भदलनेन विजृम्भमाणां शम्भुप्रमोदभरपल्लवितप्रभावाम् ।
संभावितां नुतिभिरम्बुजसंभवाद्यैः शाकंभरीं भगवतीमनिशं भजामः ॥ १, ३

अत्र अनुप्रासचातुर्यं भावसौकर्यं भाषापाटवं च मनोहरम् । सप्तमे सर्गे शरद्वर्णना-प्रसङ्गेन कविना उक्तम्—

विदूरभिन्नाधरपत्रमीषद् विकासिकिञ्जल्करदं दधाना ।
ससौरभोद्गारमुखारविन्दं विमुक्तनिद्रा नलिनी जजृम्भे ॥ ७, ६

अत्र नलिनीवर्णनप्रसङ्गेन नायिकायाः कस्याश्चन विवृतिर्ध्वन्यते । अत्रोभयसाधारणानि विशेषणानि कविरयं तथा सरलया पद्धत्या निबद्धवान् यथास्य अर्थबोधे स्वल्पोऽपि विलम्बो न भवेत् ।

कूजन् मुहुः शोणमुखः समन्ताद् व्यापारयन् पत्रमपेतधैर्यः ।
तारुण्यमत्तालिविलासलीलां सरोजिनीं हंसयुवा न सेहे ॥ ७. १२

अत्र हंसयुवप्रसङ्गेन प्रतिनायकचरित्रवर्णनमतीव मधुरमेव ॥

इत्थं प्रतिश्लोकमेव कवेरस्य सरसलेखचातुर्यं नयनपथमवतरति पाठकानाम् । स्वभाव-सुन्दराणि पद्यानि स्वल्पालङ्काराण्यनलङ्काराणि च नाल्पमपि वैरस्यमुत्पादयन्ति प्रेक्षावताम् । अत एवात्र अलङ्काराणामौत्कट्यं परिहृत्य ग्रन्थकृता स्वकीयलेखस्य सरलतायां सरसतायां स्वच्छन्दतायाञ्च दत्तमवधानं सर्वथा सफलमेव जातमिति विश्वसिमः ।

प्रसङ्गतोऽत्र वङ्गीयैः रचितेषु ग्रन्थेषु शिलालिपिषु च सन्निबद्धानि ऐतिहासिकानि विवरणानि संक्षेपतो दीयन्ते ।

(१) खीष्टीयदशमशताब्द्या अन्तिमे भागे गौडाभिनन्दो रामचरिते रामपालमेवं स्तुतवान्

एकः स पालतिलकश्चिरमस्तु सम्राट् कोटिव्ययो न गणितः प्रतिपाठकालम् ।
येनास्य रामचरितस्य समं सदस्यैरेकैक-सूक्ति-परिभावनगद्गदेन ॥

अस्मिन् ग्रन्थे बहवः श्लोका वर्तन्ते येभ्यः रामपालस्य महामहिमा व्यज्यते ॥

(२) रामचरिताख्ये काव्यग्रन्थे सन्ध्याकर-नन्दिमहोदयः पालवंशीयरामपालस्य प्रशस्तिं कृतवान् । अस्मिन् ग्रन्थे श्लोकाः सर्वे इत्थं निर्मिता यथा प्रत्येकशः रामायणीयप्रसिद्ध-घटना रामपालघटना वा व्यज्यते । रामपालस्य पितृभूरपि वरेन्द्रीति ख्याता ; वरेन्द्री सीताया नाम च । इत्यनेन प्रकारेण रामपालजीवनवृत्तान्तेन सह रामायणीयघटनायाः पारम्पर्यक्रमेण वर्णना कृता ॥

(३) यथा प्राचीने काले तथा मध्यवर्तिनि समयेऽपि इत्थं वङ्गीयाः स्वदेशे विदेशे च बहुधा इतिहासप्रसिद्धाः सञ्जाताः, लेखनीमुखेन रत्नराजिं विनिर्माय संरचितवन्तश्च । एतासु रत्नराजिषु ऐतिहासिक्यः विवृतयो बहुधा वर्तन्ते यासां समुच्चयः अस्माभिरधुना कार्यः ।

(क) काश्मीरराज्यस्थ-ललितादित्यस्य मन्त्री आसीद् वङ्गीयः शक्तिस्वामीत्याख्यः कश्चन । याज्ञवल्क्यसम आसीत्तस्य पुत्रः कल्याणस्वामीति । तस्य पुत्रः कान्तिचन्द्रः, तस्य पुत्रश्च प्रख्यातो न्यायमञ्जरीकारो जयन्तभट्टः ; जयन्तभट्टस्य पुत्र आसीत् कादम्बरीकथा-सारप्रणेता अभिनन्दः ।

(ख) इत्थं पारमारभोजस्य सभायामासीत् (ख्रीष्टीय १०००—१०५५ अब्दे) गौडान्तर्गतभट्टकौशलग्रामनिवासी लक्ष्मीधरः । असौ कविवर्यः चक्रपाणिविजयाख्यं काव्यं चकार (Indian Culture, I. 70 3-704).

(ग) दक्षिणराढास्थ-नवग्रामनिवासी हलायुधः मालवेषु वसतिं चकार । विक्रम ११२० =ख्रीष्टाब्द १०६३ संवत्सरे स चतुःषष्टिसंख्यकान् श्लोकान् रचयामास । ते अधुना मध्य-प्रदेशीयनिमारमण्डले [जेला] अमरेश्वरमन्दिरगात्रे क्षोदिता दृश्यन्ते ।

(घ) आशाधरशिष्यो मदनो बाल्ये वयसि मालवान् गतः बालसरस्वतीः इत्युपाधिं लेभे । पारमारभोजवंशावतंसस्य राज्ञः अर्जुनवर्मणोऽसौ कालक्रमेण गुरुर्बभूव (१२१०-१२१८ ख्रीष्टाब्दे) । एष एव पारिजातमञ्जरीनाटकस्य रचयिता । अर्जुनवर्मद्वारा गुर्जराधिप-जयसिंहस्य पराजय एव अस्य नाटकस्य विरचनहेतुः । अनेन सुमेधसा कविना अर्जुनवर्मप्रशस्ति-मुखेन प्रस्तरलिपयः कतिचन विनिर्मिताः, याभिः ऐतिहासिकघटनाप्रपूर्तिः जाता ।

(ङ) छन्देल्लराजपरमर्दिसभायां गदाधरस्तत्पुत्रौ देवधर-धर्मधरौ च सभास्तारा आसन् ।

(च) गौडीयः कवी रामचन्द्रभारतीः वीरवतीग्रामनिवासी आसीत् । सिंहलराज-द्वितीय-पराक्रमबाहु- (१२२५-६० खीष्टाब्द) समये असौ सिंहलं जगाम । तत्र राहुल-

स्यान्तेवासी सन् बौद्धविद्यानिष्णातो बभूव। असौ एव भक्तिलता-वृत्तमाला-वृत्तरत्नाकर-पञ्जिकाख्यग्रन्थत्रयस्य कर्ता (Indian Antiquary, 1930, p. 27).

षोडशशताब्द्याः शेषार्धे प्रद्योतनापरनाम-पद्मनाभभट्टाचार्यो वङ्गेषु जन्म परिजग्राह। असौ रेओया-राजस्य परं प्रीतिपात्रं बभूव। कालक्रमेण वीरभद्रचम्पूकाव्यं चकार च।

(छ) रेओयाख्यविशिष्टभूखण्डस्य वघेलनृपवंशस्य अन्तिमावतंसस्वरूपोऽयं वीरभद्राख्यो नृपः। एतद्राजपरिवारविषयमधिकृत्य मया लिखितमासीत् अकवरीयकालिदासकृतरामचन्द्रयशःप्रबन्धाख्यग्रन्थस्य भूमिकायाम्। व्याघ्रपल्लयाः प्रख्यातोऽयं राजवंशः लोकमुखेन वघेल इति संक्षिप्तो जातः। राजपरम्पराऽत्र—शालिवाहन-वीरसिंह-वीरभानु-रामचन्द्र-वीरभद्रा इति। एतैः सार्धं मोगलवंशीयनृपाणां महत् सख्यमवर्तत। वीरभद्रपिता राजरामचन्द्रेण तानसेनः दिल्लीराजधान्याम् उपहारस्वरूपेण प्रेषितोऽवर्तत। तस्मादेव अस्य वंशस्य दिल्लीराजपरिवारेण साकं महासख्यप्रकर्षः उपाचीयत सम्यग् रूपेण।

एष रामचन्द्रराजः गौड़देशस्य कीर्तिसिंहपुत्र-माधवसिंहकन्यकां यशोदामुपयेमे। तस्याः अजायत सुतो वीरभद्रः। अहो दुर्भाग्यं यत् पितुर्मृत्योरेकवत्सराभ्यन्तर एव दिल्लीगमनसमये एष वीरभद्रः १५९३ खीष्टाब्दे प्राणान् तत्याज। पितुः मृत्योर्वार्तां प्राप्य यानमारुह्य स्वनगरं प्रति स प्रस्थितः। पथि तु यानात् पतितः कालक्रमेण मृत्युमुखं जगाम।

ग्रन्थेऽस्मिन् प्रतापरुद्र-चन्द्रभानुप्रभृतीनां वृत्तानि सुलिखितानि वर्तन्ते। तेषु ऐतिहासिकानां सन्तोषो बहुधा स्यात्।

अन्येषु राजकीयविषयेष्वपि गौडीयानामधिकारः प्रावर्तत। लेखनव्यापारः गौडीय-करण-कायस्थानामेव अधिकार आसीत् सर्वत्र भारतखण्डेषु। यत्र यत्र प्रशस्तिलेखनप्रयोजनमन्वभूयत, तत्र तत्रैव गौडीयकरणकायस्थानाम् आह्वानमासीत्॥

अनेन क्रमेण वङ्गीयकविभिः बहुशः इतिहासवृत्तानि लेखनीमुखेन संरक्षितानि, यानि अधुना अस्माभिः आकलय्याकलय्य प्रकाशयितव्यानि, विश्लेषणमुखेन ऐतिहासिकवृत्तान्तैः तुलनीयानि च।

Gopal Chunder Law Memorial

Text Series Vol. I.

गौडकवि-चन्द्रशेखर-प्रणीतं

शूर्जन-चरितम्

[प्रथमः सर्गः]

श्रीगणेशाय नमः

कार्यं प्रकाशयति कारणमंतरेण स्वेच्छानुरूपविभवः प्रभुरव्ययो यः ।
सामोपगीत**शिवकीर्तन**नामधेयः श्यामः समग्रयतु सर्वसमीहितं नः ॥१॥
यस्याः कृपालवसुधापरिशीलनेन निर्माल्यशेषमगुणोऽपि पुमान् पुराणः ।
तां मन्महे निगमसारगिरामुपास्यामाशापुरां पुरुषकारखनिं पुरारेः ॥२॥
शुंभादिदंभदलनेन विजृंभमाणां शंभुप्रमोदभरपल्लवितप्रभावाम् ।
संभावितां नुतिभिरंबुजसंभवाद्यैः शाकंभरीं भगवतीमनिशं भजामः ॥३॥
पीयूषसारसरसान् भणितिप्रवाहान् मूकेऽपि वत्सलतया प्रतिपादयंती ।
देवी गिरामपि चिराय विरामशून्यमाविःकरोतु करुणोपचितं प्रसादम् ॥४॥
औचित्यमात्रमवलंब्य नमामि साधूनेतेषु मे किमपि नैव निवेद्यमस्ति ।
ये निर्निमित्तमुपकारपराः परेषामारोपितानपि गुणान्छतशाखयंति ॥५॥
राज्ञामपारगुणसारधुरंधराणां वंशानहं कृशमतिप्रसरो विवक्षुः ।
पद्भ्यामुदग्रगिरिशेखरमारुरुक्षोः पंगोर्विवेकविकलः पदवीं प्रपन्नः ॥६॥
आज्ञाबलात्तदपि **शूरजनस्य** राज्ञः स्वांतस्थितेन हरिणा स्वयमीरितस्य ।
सोऽहं विहाय परिहासभयं[1] सभायां लौल्येन साहसरसं सहसा प्रपन्नः ॥७॥
जिह्वाविलोलनविलासवशाद् द्विजिह्वा मूर्ध्नां धृता अपि नहि प्रकृतिं त्यजंति ।
तेभ्यो न भीतिरिह भूपतिशूर्जनस्य जागर्ति जांगलिकवत् करुणाविशेषः ॥८॥
चौहानवंशभवभूमिपुरंदराणामाद्यो यथा तनुभृतां पुरुषः पुराणः ।
ख्यातः क्षितावजनि दीक्षित**वासुदेव**नामा स्वधर्मसुमनीकृतवासुदेवः ॥९॥

---

1. M. भार्यं ।

सत्ये युधिष्ठिर उदग्रबलेन भीमश्चापेऽर्जुनः स नकुलस्तुरगाधिरोहे ।
शास्त्राभियोगसमये सहदेव एवमेकोऽवतार इव पांडवपंचकस्य ॥१०॥
यः कामपाल इव धामनिधिर्बलेन जग्राह काम इव वामदृशां मनांसि ।
कामारिवत् करुणयाऽधिककोमलात्मा कामानपूरि परितः शरणागतानाम् ॥११॥
उद्दामधाम्नि सवितुः सविधेऽपि काष्ठासंगेन धूमविकृतैरकृतांतराये ।
यस्य प्रतापदहने गहने निपेतुर्दृप्यत्सपत्न[1] पृतनापतयः पतंगाः ॥१२॥
नक्तं दिनं सममदीपि सुमेरुशृङ्गमारोहति स्म महसाऽर्दितसैंहिकेयः ।
अस्तं जगाम न कदापि जगत्प्रकाशस्तस्य प्रतापतपनः पुनरन्य एव ॥१३॥
क्षीरांबुधिः सुरगणैरपनीतसारः पूर्णो विधुर्विघस एव विधुंतुदस्य ।
रुद्राचलोऽपि तुलितो रजनीचरेण को नाम साम्यमय[2]तामदसीयकीर्तेः ॥१४॥
दुःकीर्तिपङ्कगतवैरियशीमृणाललेशानशेषयितुमाशु गवेषयंती ।
यस्योल्लसद्विशदवारिदगर्भशुभ्रा बभ्राम विश्वमखिलं किल कीर्तिहंसी ॥१५॥
संग्रामसीम्नि शमनभ्रुकुटीसमानं यस्मिन् विधुन्वति धनुर्धरणीवतंसे ।
दर्पोद्भटप्रतिभटप्रमदाजनानां सीमंतसांद्रखचिता मणयो निपेतुः ॥१६॥
विध्वानतो वधिरितैर्हत[3]दुंदुभीनामंधीकृतैश्च पृतनारजसां भरेण ।
मार्गेषु वारणमदैरतिपिच्छिलेषु नो वेद्मि विद्रुतममुष्य कथं द्विषद्भिः ॥१७॥
एतस्य दानसलिलव्ययितप्रवाहा **चर्मण्वती** ध्रुवमधा[4]स्यत पंकभावम् ।
नापूरयिष्यत यदि प्रसभोपरुद्धविद्वेषिवामनयनानयनांबुपूरैः ॥१८॥
वृंदारकाधिपदृशामपि लोभनीयां वृंदानि यः सुमनसां सुमना दधानाम् ।
वृंदाटवीमभिमतामिव नंदसूनुर्**वृंदावतीं** पुरमनाकुलमध्युवास ॥१९॥
तस्मादजायत सुतो **नरदेव**नाम्ना धाम्ना परानधरयन्नरदेवमुख्यान् ।
रूपेण यं निरुपमेण निरूप्यमाणं नार्यो नराकृतिममन्वत देवमेव ॥२०॥
तेनाजनिष्ट यशसाऽर्दितपूर्णचंद्रः **श्रीचंद्र** इत्यभिहितस्तनयो नयज्ञः ।
यस्याऽऽसमुद्रमपनिद्रभुजप्रतापैरेकातपत्रमवनीवलयं बभूव ॥२१॥
तस्मिन्नलंकृतवति त्रिदिवं वयोऽते पुत्रः स्वपैतृकपदं प्रतिपद्यते स्म ।
यः पालयन्नपि जयं निजपौरुषेण प्राप्तः क्षिता**वजयपाल** इति प्रसिद्धिम् ॥२२॥
उच्चैस्तया ध्रुवमलंध्यतया परेषां तेनाजयेन निरमायि परोऽपि मेरुः ।
तस्मादभूद**जयमेरु**रिति प्रसिद्धं दुर्गं तदद्भुतफलं किल योगसिद्धेः ॥२३॥

---

1. M. सव्यत्न । 2. M. मया ।
3. M. र्यंत । 4. M. सधा ।

तेनापि सूनुरनुरूपगुणोज्ज्वलेन राजन् जयेन जनितो **जयराज**नामा ।
दोर्दंडचंडिमचमत्कृतिचारुदृप्यत्कोदंडतांडवितदंडितवैरिवर्गः ॥२४॥
सामंतसिंह इति तस्य सुतः प्रतीतः सिंहासनं निजकुलोचितमारुरुक्षुः ।
सामंतवीरतरुणांस्तरसा रिपूणां व्यद्रावयद् द्विपगणानिव दृप्तसिंहः ॥२५॥
तस्याऽऽत्मजो गुरुयशाः किल **गूर्जकाख्यः** स्फूर्जत्प्रतापभरभंजितवैरिवीजः ।
यस्मिन् वितन्वति निरंतररत्नवर्षं रत्नाकरा वव्रतिरेऽर्थिन एव सर्वे ॥२६॥
तन्नंदनो नरपतिर्भुवि **चन्दनो**ऽभूद् यश्चंदनद्रव इवाखिलनंदनोऽपि ।
लग्नो हृदि प्रियविमुक्तरिपुप्रियाणां भूमानमानयदनारतमुग्रतापम् ॥२७॥
बिभ्रत् सदा सुरभितां विशदस्वभावः शीतो भजत्सु परि[पूरि]तदक्षिणाशः ।
स क्ष्मापतिर्जगति चंदन एव साक्षात् किंतु द्विजिह्वपरिषन्मिलनं न सेहे ॥२८॥
प्रौढाहितावनिभृदुद्धतपक्षवज्रं वज्रायुधप्रतिममायतविक्रमेण ।
राजन्यवीरनिकुरंबकिरीटवज्रं **वज्रा**भिधं स तनयं जनयांचकार ॥२९॥
वज्राद्व्यजायत वशीकृतविश्वराज्यः प्राज्यैर्गुणैर्जगति **विश्वपतिः** प्रतीतः ।
यो विश्वनाथवनिताचरणावलंबी विश्वंभराखिलधुरां बिभरांबभूव ॥३०॥
कामं बभूवुरपरेऽपि पुरा नरेशा धन्या परं तु धरणीयमनेन भर्त्रा ।
आलंबते न कमला कतमं समृद्धं नारायणोरसि परं लभते प्रतिष्ठाम् ॥३१॥
कीर्त्याऽस्य चंद्रकरकोमलयाऽतिशुभ्रं शोणं नवार्ककिरणप्रतिमैः प्रतापैः ।
श्यामद्युति द्विषदकीर्तिमसीभिरित्थं[1] चित्रं तदांऽबरमराजत दिग्वधूनाम् ॥३२॥
भूभृद्विशालकटकं समकालमेव तस्मिन् रणो[2]द्यमिनि दुर्दिनयांबभूव[3] ।
दानद्रवैर्द्विपकदंबककुंभजातैर्बाष्पैश्च वैरिवनितानयनाब्जमुक्तैः ॥३३॥
आह्लादितद्विजगणाविरतप्रवाहां पद्मावतारसुरभिं परिभूततृष्णाम् ।
एतस्य दानजलनिर्झरिणीं विगाह्य को नाम नाजनि जनोऽत्र विमुक्ततापः ॥३४॥
आकारतो न परमस्य भुजद्वयस्य स्वर्वासिवृक्षविटपैः प्रतिपक्षतासीत् ।
अप्रार्थितं धनमनेन वनीयकेभ्यो विश्राणय संततमहारि यशोऽपि तेषाम् ॥३५॥
वांछाधिकद्रविणवर्षिणि याचकानां यस्योज्ज्वले जगति जाग्रति पंचशाखे ।
वीतप्रयोजनतया सुरपादपानां पंचत्वमेव बत युक्ततरं प्रतीमः ॥३६॥
न स्म प्रमाद्यति मदेन स मेदिनीशो नापि प्रमाद्यति रिपौ प्रजिघाय शस्त्रम् ।
नायं क्वचिद्विमुखतां समितौ जगाम प्रत्यर्थिनं न विमुखं पुनरन्वियेष ॥३७॥

1. M. मसांभिरिच्छं । 2. M. रणे । 3. M. भुवः ।

कामं क्रमेण नितरां दुरतिक्रमेण दोर्विक्रमेण वसुधां वशयांबभूव ।
भूपालरीतिरिति नीतिपथोपनेतॄन्नेता स मंत्रसचिवान् समयेऽभ्यनंदत् ॥३८॥
यस्मिञ्जयाहितमतौ समराजिरेषु जातं रजः प्रतिभटेषु तमस्तदैव ।
सत्त्वं स्व[1]पक्षपृतनासु विपक्षजायावक्षोजहारलतिकास्वपि निर्गुणत्वम् ॥३९॥
पारींद्रमेव मृगयन्मृगयां गतोसौ नान्याञ्जघान घनया घृणया परीतः ।
नष्टं तदैव परिपंथिनितंबिनीनां वक्षोजपत्रमकरीभिरिदं विचित्रम् ॥४०॥
नाश्चर्यमेतदमुमेकमपि द्विषंतो दोषाहता[2] यदि रणेषु बहूनपश्यन् ।
एकोऽप्यनेक इव कैरवबांधवोऽसावाभासते तिमिरताडितलोचनानाम् ॥४१॥
संपद्युतोऽपि तरुणोऽपि नराधिपोऽपि नांगीचकार स कदाचन पानलीलाम् ।
बाणाः पुनः परपुरं सपदि प्रविश्य रक्तासवं निभृतमेव निपीतवंतः ॥४२॥
स्तब्धत्वहेतुमपनीतविशेषदृष्टिं गुर्वंकुशानपि हठादवसादयंतम् ।
यो वैरिणां च करिणां[3] च तदाश्रितानामत्याजयन्मदमुदंचितमंचितौजाः ॥४३॥

समुल्लंघ्य क्षीरांबुधिमधरितः शीतकिरणः
समाक्रान्तं शश्वद् गिरिशगिरिगौरीगुरुपदम् ।
कृतश्चांतेवासी भुजगपतिरित्थं विभुतया
वितेने यत्कीर्त्या भुवनजययात्राविलसितम् ॥४४॥

इति शूरजनराय-चरिते महाकाव्ये

प्रथमः सर्गः ॥१॥

---

1. M. स्र । 2. M. तांता । 3. M. कारिणां ।

[द्वितीयः सर्गः]

अथ विश्वपतिः क्रमागतं प्रतिपद्यापि स पैतृकं पदम् ।
अविशिष्टतयाऽन्यभूभृतां न मनस्वी भजते स्म निर्वृतिम् ॥१॥
सदसि स्पृहणीयसौहृदैः सवयोभिः समशीलचेष्टितैः ।
न बबंध धृतिं स बंधुभिर्नवहर्म्येषु हिरण्मयेष्वपि ॥२॥
करिणः परिणद्धकंधरा नवश्रृङ्गारितचारुविग्रहाः ।
मदनिर्झरमेदुराननाः न मुदे तस्य बभूवुरीशितुः ॥३॥
दिवमुत्पतितुं कृतोद्यमा विनिरुद्धा विनियम्य सादिभिः ।
अभवन्न[वना]वनायुजाः प्रमदायास्य न मेदिनीभुजः ॥४॥
दयिताधरचारुपल्लवाः कुसुमोद्भेदविजृंभितस्मिताः ।
अलिगुञ्जितमंजुगीतयो रुरुधुस्तस्य मनो न[1] वीरुधः ॥५॥
सरसीरुहसौरभोज्ज्वला कलहंसीकलनादकोमला ।
सरसी विमलाशयाऽप्यलं सरसीकर्तुमभून्न भूभृतम् ॥६॥
समये[2] समुदीरितोच्चकैर्जयशब्दैरवदानशंसिभिः ।
स ननंद न वंदिचारणैर्विरुदालीपदबंधकोविदैः ॥७॥
शिथिलेतरबंधबंधुरा सुकुमारापि विदग्धभूपतेः[3] ।
रसभावनिरंतराऽप्यहो कविवाणी न विनोदभूरभूत् ॥८॥
मधुमत्तविदग्धकामिनी मणितादप्यधिकं मनोरमान् ।
अभिनन्दति न स्म भूपतिः स विपञ्चीकलनिक्वणानपि ॥९॥
मदनेऽप्युपदेष्टुमिच्छवः कुटिलभ्रूदलवल्गुवल्गनैः ।
नयनांततिरस्तरंगितैस्तृणयंत्यस्तरुणीर्नभःसदाम् ॥१०॥
सविलासपदांबुजार्पणैरनुगृह्णत्य[4] इवावनीतलम् ।
प्रमदा न मदालसा मनागपि निन्युर्वशतां विशांपतिम् ॥११॥ युग्मम् ।
इति दुर्मनसं मनीषिणं विषये सत्यपि वीतवासनम् ।
अधिराजतया दुरासदं तमलं बोधयितुं न कश्चन ॥१२॥
तनयोऽस्य गुरोरथैकदा **सुनयो** नाम नयोपबृंहितः ।
समशीलवयोविचेष्टितैरधिरूढः किल बालमित्रताम् ॥१३॥

---

1. M. र ।
2. M. समुये ।
3. M. भूतपतेः ।
4. M. ह्णंत्य ।

वपुषा ललितेन चेष्टितैरभिरामैर्भणितैश्च सूनृतैः ।
विशदं परितो विकाशयन्ननिशं विश्वजनीनमाशयम् ॥१४॥
द्विगुणं खलु बिंबमात्मना सहसादर्शसमीपगं दधत् ।
कलयन्नधिकोज्ज्वलाः कला रुचिमासाद्य च कृष्णपक्षगाम् ॥१५॥
न च वक्रतया विकारितो न कलङ्केन कदाचिदंकितः ।
श्रितवान्नहि जातु वारुणीं[1] न च दोषाकरतामुपागतः[2] ॥१६॥
तमसा न तिरस्कृतः क्वचित् प्रतिपक्षो वपुषा मनोभुवः ।
अपरो ननु कोऽपि निर्मितो द्विजराजः कुतुकेन वेधसा ॥१७॥
श्रुतिघोषपवित्रितश्रुतिः स्मृतिसंभेदसमेधितस्मृतिः ।
प्रथितः पथि तर्क[कर्क]शे विजयी जैमिनिशास्त्रविस्तरे ॥१८॥
सुविवेकविशेषितात्मनामपि वेदांतविदां विशारदः ।
इतिहासपुराणपारगः सतताभ्यस्तसमस्तभारतः ॥१९॥
पुरुहूतपुरोहितोपमः किल कामंदकनीतिनिर्णये ।
विनयेन विनीतचापलः सहजां बिभ्रदपि प्रगल्भताम् ॥२०॥
रहसि स्थितमाहितस्थितिः समयज्ञः समये समेत्य तम् ।
इदमानतकंधरः शनैरधिगम्यानुमतिं न्यवेदयत् ॥२१॥ कुलकम् ।
उपदिष्टमुपायदर्शिभिर्न विना प्रश्नमुदीरयेत् क्वचित् ।
इति सर्वत एव सज्जते किमुताधृष्यतमेषु राजसु ॥२२॥
अतिविस्मयिनीं तथापि ते नृप निर्वेदनिवेदिनीं स्थितिम् ।
अवलोक्य वितर्कविक्लवं हृदयं मे दिशति प्रगल्भताम् ॥२३॥
इयमायतिमंजुला मही महनीयोज्ज्वलविक्रमेण ते ।
चिरमुद्धृतवैरिकंटका सुतरां पाणितलावलंबिनी ॥२४॥
प्रणयैः सुहृदः सभाजिता महसा विद्विषतां सभा जिता ।
चरितैर्जगदुत्तरैस्त्वया जगदेतन्नृपतेऽनुरंजितम् ॥२५॥
नितरां निरुपप्लवाः प्रजा वसुपूर्णा वशगा वसुंधरा ।
परितः परितर्पितो मखैः समये वर्षति वारि वासवः ॥२६॥
तव जाग्रति दोर्युगे भुवो धुरि धुर्याः प्रतिलब्धविश्रमाः ।
करियूथपकैतवादमी धृतसेवाः सविधे कुलाद्रयः ॥२७॥

---

1. M. णी । 2. M. ता ।

अमितैः परिता विस्तवरैर्वसुविश्राणननीरनिर्भरैः ।
अपि जांगलभूमयस्त्वया विहितास्तावददेवमातृकाः ॥२८॥
अभिरामतरं निरामयं भवतो वीक्ष्य वपुर्वधूजनः ।
नरदेव निरादरोऽभवद् भिषजोर्नाकनिवासिनोरपि ॥२९॥
इति ते कृतकृत्यता मया कृतिनां नायक निश्चिता धिया ।
सुविचारयतापि दृश्यते न च निर्वेदनिदानमण्वपि ॥३०॥
रिपवो वनगोचरा अपि स्फुटमुत्साहविपर्ययं तव ।
निशमय्य निधातुमिच्छवः पुनराशांकुरमात्मनो हृदि ॥३१॥
विधुरं ध्रुवमप्रसादतः सदसि प्रेक्ष्य सदीशितुर्मुखम् ।
तव नोद्विजतेऽनुजीविनां हृदयं भूरिवितर्कसंकुलम् ॥३२॥
सरितां पतिरप्य[1]धीरतां भजते कारणगौरवात् क्वचित् ।
न कदापि मनो महीयसां प्रलयेऽपि प्रतियाति वैकृतम् ॥३३॥
विषयेष्वधिका विरागिता विजनेषु स्पृहयालुता तथा ।
शमिनां समवैति शर्मणे महसाक्रांतभुवां न भूभुजाम् ॥३४॥
तनया महतां महीभृतां परिणीता हरिणीदृशस्त्वया ।
तनयांतनिदेशपात्रतामपि चासामभिनंदति स्मरः ॥३५॥
जनिता न धुरंधराः सुताः प्रमदाः प्रेमभरेण नादृताः ।
न हि सौम्य शमः समंजसस्तरुणिम्नि प्रथमातिथौ तव ॥३६॥
क्व तनुर्नवयौवनाश्रया क्व विरागस्तव देव दारुणः ।
न निदाघकठोरमातपं सुकुमारा सहते हि माधवी ॥३७॥
असमाप्य कुलक्रमागतं करणीयं निजविक्रमोचितम् ।
जननाथ विरज्यतस्तव प्रविलुप्येत पुरार्जितं यशः ॥३८॥
अथवा वितथं प्रजल्पितं मम संदेहतरंगितात्मनः ।
महतां मकरालयस्य वा कथमंतःस्थितवस्तुसंस्तवः ॥३९॥
तदहं नरदेव वेदितुं स्फुटमिच्छामि [2]चिकीर्षितं तव ।
महसो हि विना प्रकाशनान्न पदार्थस्य निरूपणं भवेत् ॥४०॥
यततां सुमना मनीषिते यदि सिध्येद्विहितैरुपक्रमैः ।
नहि तत् कृतिसाध्यमेव चेत् किमु खिद्येत खपुष्पमार्गणैः ॥४१॥

---

1. M. रथ ।		2. M. वि ।

इति वादिनमादिवर्णजं सुनयं सूनृतभाषितेन सः ।
अवदद्वदतांवरो नृपः स्वरशिष्यायितनूतनांबुदः ॥४२॥
अनुकूलतरेण यत् त्वया वचनं संप्रति सोपपत्तिकम् ।
प्रणयात् प्रणिधाय भाषितं हृदयं प्रह्वयतीव तन्मम ॥४३॥
तदपि स्वमहं विभावयन् बत साधारणमन्य[1]पार्थिवैः ।
न मनो विनियंतुमुत्सहे वशगायामपि सर्वसंपदि ॥४४॥
हरभूधरतोऽपि शाश्वती यदि जागर्ति न कीर्तिरुज्ज्वला ।
तरुणीनयनांतचंचलैः किमु साम्राज्यसमुद्भवैः सुखैः ॥४५॥
अधिगम्य निगूढमाशयं किल रत्नाकरमेखलापतेः ।
द्रुतमस्य विगाहनक्षमां प्रतिपेदे सुनयः सरस्वतीम् ॥४६॥
प्रतिपालनमात्तवस्तुनः स्वधिया तद्वदलब्धसाधनम् ।
द्वयमाहुरिहेष्टसाधनं तदुपायाः परमुद्यमाः परे ॥४७॥
अनयोः प्रथमे प्रवर्तते नियतं सर्वजनः प्रयत्नतः ।
विरमत्यपि नाफलोदयं तदसिद्धौ महदेव दुर्यशः ॥४८॥
अपरं तु निरंतरं गुणैर्नयविक्रांतिमुखैः प्रसाधयन् ।
लभतेऽद्भुतकीर्ति-सत्कृती यदि न स्यान्मदतो विकत्थनः ॥४९॥
कति न क्षितिरक्षिणः क्षिताविह जाताः परिभोगलालसाः।
गणयंति जनास्तमेव तु त्रिजगद्यस्य यशोभिरुज्ज्वलम्[2] ॥५०॥
अवनीमवनीशवंशजा वशयंतः कुलजेन तेजसा ।
सुकृतैरुपभुंजते परं न हि तत्राधिकविक्रमः क्रमः ॥५१॥
यदि कश्चन जायते पुमानिह विश्वोद्भटबुद्धिपौरुषः ।
स समुज्ज्वलयन्निजान्वयं ध्वनयत्युद्भटकीर्तिडिंडिमम् ॥५२॥
महसां निधयो महोदधेर्मणिवर्ग्याः कति वा न जज्ञिरे ।
हरिकंठतटाधिरोहणात् परमेकः प्रथितोऽस्ति कौस्तुभः ॥५३॥
मनुवंशभुवां भगीरथस्त्रिजगद्गीतयशा विशालधीः ।
रघुपंक्तिरथादयः परे प्रथितास्ते पृथगद्भुतैर्गुणैः ॥५४॥
अपरस्तव पूर्वजेषु कः प्रथितो दीक्षित वासुदेवतः ।
स्वयमर्जितमूर्जितौजसा नवराज्यं नृवरः शशास यः[3] ॥५५॥

1. M. मव्य । 2. M. द्वलं । 3. M. य ।

इतरोऽपि तदन्वयोद्भवोऽजयपालः स कथं न गण्यताम् ।
उपपुष्करमन्यदुष्करं निरमायोऽजयमेरुदुर्गकम् ॥५६॥

श्रमविक्रमनीतिरीतिभिस्त्वमसाधारणमर्जयन् यशः ।
भ[1]वितासि भुवि प्रतिष्ठितो ध्रुवमाकल्पमनल्पपौरुषः ॥५७॥

मतिमानतिमानुषं यशः पदवीं वा प्रतिपित्सुरुच्छ्रिताम् ।
त[2]पसा जपसाधनेन वा वरिवस्येद्विधिनेष्टदेवताम् ॥५८॥

अखण्डब्रह्माण्डं सहचरितगाण्डीववलयः
　　स्वदोर्दण्डेनैव प्रसभमपहर्तुं प्रभुरपि ।
समाराध्य श्रद्धासमुचिततपोभिः पशुपतिं
　　प्रपेदे रौद्रास्त्रं स किल नरनामा नरहरिः ॥५९॥

त्वमप्येवं देवं कमपि सुखसेवं परतरं
　　भजन्नद्धा श्रद्धाधिकतरविशुद्धाशयतया ।
अरण्ये पुण्ये वा क्वचन पशुशून्येऽपि विषये
　　ध्रुवां सिद्धिं विद्धि प्रगुणितसमृद्धिं करगताम् ॥६०॥

शुम्भासुरप्रशमनी सकलार्थदात्री शाकंभरी जनपदे भवति प्रतीता ।
आराधयन्नभिमतां परदेवतां तां वीतांतरायमवधारय सिद्धमर्थम् ॥६१॥

इति गिरमनुरूपां नीति-सौहार्दरीत्योः सुनयमुखसमुत्थां सोऽपि सम्यग् विचार्य ।
नरपतिरतिभूमिं प्राप्तया मोदलक्ष्म्या विकसितवदनश्रीरादरादभ्यनन्दत् ॥६२॥

अथ सुनयसहायः सम्यगह्नि प्रसन्नः परिणतसचिवेषु स्वां धुरं सन्निवेश्य ।
गिरिविपिनविहारव्याजतो राजवर्यः परिमितपरिवारः प्रौढसारः प्रतस्थे ॥६३॥

इति सूर्जनचरिते महाकाव्ये द्वितीयः सर्गः ॥२॥

---

1. M. भा ।　　　　2. M. ता ।

[तृतीयः सर्गः]

पुरस्कृतः पार्श्वचरैरथाल्पैः प्रजेश्वरः पुष्परथाधिरूढः ।
प्रसन्नचेता दिवसे प्रशस्ते द्विजैः कृतस्वस्त्ययनः प्रतस्थे ॥१॥
तमन्वगान्मानवदेवमुच्चैः प्रेमानुबन्धेन वशो वयस्यः ।
यशो जगत्सु प्रथयिष्यमाणं राजा ऋतूनामिव कामदेवम् ॥२॥
तमुत्तराशां तरसा प्रयान्तं तेजःप्रकर्षं प्रतिलप्स्य[1]मानम् ।
गुरोस्तनूजोऽनुजगाम धाम्नामधीशमह्नाय यथा निदाघः ॥३॥
अनुप्रयाणाय कृतानुबंधान्निवर्त्य बंधून् वसुधाधिनाथः ।
सम्भाव्य पौरानपि पौरकान्तः कान्तैर्वचोभिर्निरियाय पुर्याः ॥४॥
समश्नुवानांस्तपनोप[2]ताप-वह्निप्रवेशोग्रतपःफलानि ।
कुम्भस्तनीभिः परिरब्धकं[3]ठान् सम्भावयामास स पूर्णकुम्भान् ॥५॥
मालाः सिताम्भोजदलाभिरामा नृपः पताका इव कार्यसिद्धेः ।
प्रसारितास्ता अपि चारुदृष्टीः प्रत्यग्रहीन्मालिकनागरीणाम् ॥६॥
तस्योपरिष्टात् परितः पतन्तं निवारयन्तो रविरश्मिजालम् ।
विनैव दण्डेन शरत्पयोदाः सितातपत्रत्वमयुस्तदानीम् ॥७॥
गन्धानुमेयानपनीतनिद्र-सरोजराजीमकरन्दबिन्दून् ।
उपाहरन्ती मिहिरांशुतप्तं सिषेविरे तं सरसीसमीराः ॥८॥
पर्यंतमासाद्य ततः पदव्या दिनैः कियद्भिः सुकृती सुखेन ।
पूर्वोपदिष्टं सुनयेन दूराच्छाकम्भरीदेशमपश्यदग्रे ॥९॥
ज्ञातस्तदाऽभ्रंकषया विदूराद् देव्याः पुरीहर्म्यपताकयैव ।
नृपाय तस्मै पुनरुक्तवाग्भिरावेदितो जानपदैः स देशः ॥१०॥
दृष्ट्वा जयन्तीमथ वैजयन्तीमानन्दतः स्यन्दनतोऽवरुह्य ।
साष्टांगपातं मुहुरष्टमूर्तेः कुटुम्बिनीं विश्वपतिर्ववन्दे ॥११॥
पुरोपकंठं प्रतिपत्स्यमानं पुरोधसा तेन समं निशम्य ।
प्रत्युद्ययुः पौरजनाः प्रमोदान्नृपोचितोपायनपाणयस्ते ॥१२॥
आतिथ्यसम्भारभृतां सपर्यां प्रगृह्य तेषां सुमनाः स राजा ।
प्रश्नैरुदारैः कुशलप्रधानैरनुग्रहो विग्रहवान् बभूव ॥१३॥

---

1. M. श्य । 2. M. नांनुस्तपनोप । 3. M. कां ।

तत्रैव वाद्योपवनेऽतिवाह्य निशीथिनीं तां शिथिलाध्वखेदः ।
प्रातः परेद्युः प्रयतान्तरात्मा पतिः प्रजानामविशत् पुरं तत् ॥१४॥
स ग्रामसीमासमवस्थितांस्तान् विनायकादीन् विनयात् प्रणम्य ।
अपश्यदाश्चर्यतरङ्गितात्मा तरङ्गिणीरोधसि पुष्पवाटीम् ॥१५॥
यस्यां पुरोपाजितभूरिपुण्यैरावासमासाद्य जनः कथंचित् ।
मनोरथं चैत्ररथे न चक्रे न नन्दने नन्दयति स्म चेतः ॥१६॥
सुवर्णभूमीरचितालवालस्फुरत्तमालद्रुमकैतवेन ।
वृन्दावनावासमपास्य यस्यां पीताम्बरः प्रीतिवशादुवास ॥१७॥
नीपद्रुमे यत्र सदाऽपनिद्रं प्रसूनपुंजं परितो दधाने ।
अनारतं नीरदराजिलक्ष्मीरलंभि भृंगैरुपरि भ्रमद्भिः ॥१८॥
यस्यां निनादैर्विशदच्छदानां पुंस्कोकिलानां कलकंठशब्दैः ।
स्पर्धानुबन्धीनि विरामशून्यं विरेजिरे बर्हिणकूजितानि ॥१९॥
यस्यां लवंगीमपि मल्लिकां च जातीं च रोलंबयुवाऽवलंब्य ।
पिबन्मुहुः स्तोकतरं मरंदं[1] चकार तासामिव तारतम्यम् ॥२०॥
स्वर्नायिकाकल्पितकर्ण[2]पूरमंदारगुत्सेन सहावतीर्णाः ।
यत्पुष्पवल्लीषु विलासलोलाः पुनर्न दध्युस्त्रिदिवं द्विरेफाः ॥२१॥
दृशो[3]रिदं पूर्वतया विशेषादाकर्षिणीं तामवलोकमानः ।
विशांपतिर्विस्मयविस्मृतेन नासीन्निमेषेण कृतांतरायः ॥२२॥
ततो भृतोत्साहभरे नरेंद्रे निधाय दृष्टिं स निधिर्गुणानाम् ।
जगाद योग्यं जगदम्बिकाया विगाहमानः सुनयो वनांतम् ॥२३॥
उद्यानमेतन्मदनारिपत्न्याः सदर्तुभिः षड्भिरुपास्यमानम् ।
निषेवमाणो विजितारिषट्कः समश्नुते षण्मुखगां समृद्धिम् ॥२४॥
मृगावलीझंकृतिसंकुलेन वनप्रियाणां कलकूजितेन ।
तिरोहितं पंचमगीतमस्मिन्नाऽऽकर्ण्यते किन्नरकामिनीनाम् ॥२५॥
कदम्बवीथीमनु वेदिमध्यमध्यासिता व्योमसदां सुमध्याः ।
अस्मिन् भवानीमुपवीणयंति वाणीमुखादुल्लसितैः प्रबंधैः ॥२६॥
अस्यांतरे संततरत्नजालैर्हिरण्मयोऽसौ खचितः समन्तात् ।
प्रासादराजो गिरिराजपुत्र्याः पुरोऽपरो राजति रत्नसानुः ॥२७॥

1. M. मदंरंदं । 2. M. कर्ण । 3. M. दशो ।

विनिर्मितं हीरदलैरुदारैः प्रालंविमुक्तालतिकं समंतात् ।
दण्डं महानीलमयं दधानं पश्यातपत्रं सितमद्रिपुत्र्याः ॥२८॥
श्रियं[1] सितच्छत्रतले दधाति दंडो महानीलविनिर्मितोऽयम् ।
स्वर्भानुदंतव्रणवर्त्मनाऽधः पतन्नि[2]वेन्दोस्तनु[3]रेखयांऽकः ॥२९॥
अधो दधानं नवनीलदंडं छत्रं पुरः पश्य सितांशु[4]गौरं ।
उपेन्द्रपादोपरिवर्तमानं स्थिरं महावर्तमिव द्युनद्याः ॥३०॥
तरंगिता मंदतरैर्मरुद्भिर्निशाकरांशुप्रतिमाः पताकाः ।
अनेकधा भिन्नतयाऽतिसूक्ष्मा विभांति धारा इव नाकनद्याः ॥३१॥
अमूनि चालोकय चारुरत्नैश्चत्वारि चामीकरतोरणानि ।
येषां बहिष्ठा हरितामधीशाः सेवां वहंति प्रतिहारहार्याम् ॥३२॥
विनिह्नुतं दीप्तिवितानकेन सितांशुरत्नस्य वितानजालम् ।
प्रांता[5]हितस्वर्गतरुप्रसूनमालोपगूढालिरुतैः प्रतीतम् ॥३३॥
अत्रागतानां सहसैव सिद्धिर्मा भैष्ट विघ्नादिति हस्तचिह्नम् ।
दिदेश देवी निजशासनं तु पंचांगुलीकैतवतो गृहेषु ॥३४॥
शुभ्रत्रिपुंड्रच्छलतो दधानास्त्रिस्रोतसं मूर्धनि साधकेन्द्राः ।
रुद्राक्षदामोज्ज्वलनीलकंठाः सर्वज्ञतां साधु भजंत एते ॥३५॥
पद्मासनस्था अपि हंसलीनाः श्रुत्यातिरिक्त[6] विधिमन्वयुर्य ।
ध्यायंति धन्या नगराजकन्यापादांबुजं तेऽत्र समाधिभाजः ॥३६॥
क्रोडीकृतायामपि नाम लक्ष्म्यां सत्त्वैकमूर्तिः पुरुषोत्तमोऽयम् ।
आस्ते जगत्पालनयोग्यमत्र लोकोत्तरं पौरुषमीहमानः ॥३७॥
कस्तूरिकाकर्दमितप्रतीराः ससैकताश्चंद्रपरागपूरैः ।
कालागुरुश्यामलितैः क्वचिच्च सशैवलाः केसरगुच्छपुच्छैः ॥३८॥
विलेपनैर्ग्रंथिलगंधसारद्रवप्रधानैर्घनगंधसारैः ।
विनिर्मिताः पार्थिव पश्य कुल्याः कुलान्यलीनां भृशमन्धयंतीः ॥३९॥
आवृत्य वक्त्रं वसनाञ्चलेन पुरो भ्रमद्भृंगभयेन भीरुः ।
निर्मातुकामा कमलस्य मालां गुणैर्निजं[7] गुंफति पाणिपद्मम् ॥४०॥

---

1. M. श्रिरं । 2. M. पातन्नि । 3. M. स्तवु ।
4. M. तांसु । 5. M. प्रांत । 6. 'निरुक्तम्' इति भवेत् ।
7. M. गुणेनिसं ।

अच्छेतु[1]कामा गुरुसारधूपं गता गवाक्षावधिभृ'गपंक्तिः ।
तस्मिन् गते सूक्ष्मतया तु जालैर्नतानेयं[2] शनकैर्निवृत्ता ॥४१॥
अशेषतः संचरितेऽपि धूमे न धूमपालं तरुणी जहाति ।
प्रतार्यमाणा श्वसितानुसाराद् भ्रमद्भिरभ्यर्णतया द्विरेफैः[3] ॥४२॥
प्रद्योतयंती परितः प्रदीपान् स्वभूषणेषु प्रतिबिम्बिताङ्गान् ।
मनोभुवो मूर्तिमता प्रतापेनाऽऽलिङ्गितेव प्रतिभाति तन्वी ॥४३॥
इदं भवानीभवनं पुनः किं चित्रेण संभावयति स्म सुभ्रूः ।
अलभ्यवस्तुप्रतिपादनेन चित्रं प्रकृत्यैव समस्तमस्याः[4] ॥४४॥
असौ स्वभक्तिप्रतिपादनाय भक्तिं शिवासद्मभुवस्तनोतु ।
तथापि कामं कमलागुणानां विभक्तिमङ्गीकुरुते कृशाङ्गी ॥४५।
क्वचिद् विपंचीक्वणितानुविद्धैर्वेणुप्रणादानुगतैः सुगीतैः ।
नृत्यन्नतांगीरशनाकलापं संलापिमंजीररुतैश्च तारैः ॥४६॥
संमार्जनाकौशलदत्तरङ्गैराकारितानां मुखरैर्मृदंगैः ।
शिखंडिनां तांडवपंडितानां केकाभिरेकांतमनोहराभिः ॥४७॥
स्तोत्रैः पवित्रैर्निगमागमस्थैः स ब्रह्मघोषैर्जयशब्दमिश्रैः ।
श्रद्धानिबद्धाञ्जलिभिर्जनौघैर्भक्त्यानुपूर्व्या परिपाठ्यमानैः ॥४८॥
प्रवेष्टुमंतर्मठ[5]मुद्यतानां नृणामहंपूर्विकयाऽतिरागात् ।
कोलाहलैः काहलिशंखभेरीघंटादिनिर्ह्रादनिरुद्धदिग्भिः ॥४९॥
वाद्यैरथान्यैरनवद्यरूपैरैक्यं गतः कोऽपि बभूव घोषः ।
नानाविधानाश्रयतः सुगंधोन्मिश्रो यथा गंधवहस्य गंधः ॥५०॥
एवं स शृण्वन् सुनयस्य वाणीं विनीतवेशः प्रविवेश वेश्म ।
पुष्पादिसंभारभृतोऽथ भृत्यास्तमन्वयुः केचन मानवेन्द्रम् ॥५१॥
यथोपचारं स नृपः सपर्यां समाप्य सोमार्धभृतो महिष्याः ।
प्रणम्य सम्यक् स्तुतिपाठगीतैरायात् सदः साधकसत्तमानाम् ॥५२॥
तत्रा[6]भिवाद्य प्रथमं मनीषी मनीषितं चाथ निवेद्य तेभ्यः ।
सांगां स विद्यां विदुषां प्रसंगादासेदिवान् सिद्धिमिवाद्वितीयाम् ॥५३॥

---

1. 'आच्छेतु' इति स्यात् ।
2. M. नतेयम् ।
3. M. रेफे ।
4. M. मस्य ।
5. M. मेव ।
6. M. ताला ।

अक्षीणया दक्षिणया स तेषां दाक्षिण्यभाजां प्रथमः प्रमोदम् ।
संपाद्य सद्यः प्रतिपद्यते स्म तथानुपूर्व्या[1] विधिमर्हणायाः ॥५४॥
अजातरूपाभरणोऽपि मूर्ध्नि स जातरूपो जनितो जटाभिः ।
विमुक्तवानक्षगुणेऽपि संगं भृशं बभूवाक्षगुणेषु सक्तः ॥५५॥
मुदं विधाता किल देवतानां विशुद्धपक्षाश्रयणात् स राजा ।
वृत्तं दधानः परिपूर्णमेव बभौ मृगेणेव मृगाजिनेन ॥५६॥
वन्यं फलं मूलमथार्द्रपर्णं शुष्कं तदेवेति नृपः क्रमेण ।
प्रकल्पयन् भक्ष्यमपेततृष्णो दभ स्तृतं स्थंडिलमध्यशेत ॥५७॥
श्रद्धासमृद्धागमसंप्रदायसत्त्वानुरूपैरखिलोपहारैः ।
त्रिसंध्यमेवांधकवैरिजायामाराधयामास धरावतंसः ॥५८॥
कुर्वन् यथाकालमुपात्तकृत्यं निराकृतप्रावरणो नृवीरः ।
अम्बापदद्वंद्वनिवेशितात्मा न द्वंद्वदुःखानि विदांचकारः ॥५९॥
यमेन नित्यं नियमेन चापं नितांतमासादितभावशुद्धिः ।
सिंहासनार्होऽप्युचितं मुनीनां पद्मासनं शांतमना बबंध ॥६०॥
सप्राणपंचेन्द्रियसंयमेन स निस्तरंगं निजमंतरंगम् ।
नासाग्रसंदंशितशांतदृष्टिर्नियोजयामास निजेष्टदेवे ॥६१॥
सर्वेन्द्रियाणां विनिरुध्य[2] वृत्तिं स वीतसंकल्पतया कथंचित् ।
शनैः शनैः सानुमतस्तनूजामंतःपदव्याः पथिकीं चकार ॥६२॥
अभ्यासयोगेन निरंतरेण निरंतराये हृदि[3] तस्य राज्ञः ।
विनैव निर्बंधमवंध्यसेवा शाकंभरी प्रादुरभूदजस्रम् ॥६३॥
तद्ध्यानधाराविनिमग्नचेता विस्मृत्य सर्वान् विषयान् वशींद्रः ।
दशासु सर्वासु समस्तदिक्षु ददर्श तां दैवतद्वंदवंद्याम् ॥६४॥
स्वप्नेषु स प्रेष्ठतमां पुरारेः पश्यन् विशेषान्न तु विस्मितोऽभूत् ।
ददर्श यज्जागरणेऽपि योगी जगंति पूर्णानि तयैव तावत् ॥६५॥
अंतः स्फुरंत्याः परदेवताया महीयमानो महसा महीशः ।
सुदुःसहोऽभूत्तपसा कृशोऽपि यथार्ककांतः किरणेन भानोः ॥६६॥
इत्थं जपैरभिषवैर्यजनैस्तपोभिर्ध्यानेन होमविधिना द्विजतर्पणैश्च ।
अन्यैश्च भक्तिरचितैरुचितोपचारैराविश्चकार जननी नृपतौ प्रसादम् ॥६७॥

---

1. M. पूर्वा । 2. M. रुध्या । 3. M. रुदि ।

वरय वरमभीप्सितं ददामि द्रुतमिह विश्व[1]पते न तेऽस्तु भीतिः ।
निरुपधिवरिवस्ययाऽनया ते मम समजायत संप्रति प्रसादः ॥६८॥
आलोक्य तां तरुणभास्करकोटिजैत्रज्योतिर्विशेषविभवादविभाव्यमूर्तिम् ।
न प्रत्य[2]पद्यत किमप्यवशांतरात्मा खिद्यत्सवेपथुतनुर्मनुजाधिनाथः ॥६९॥

इति सूरजन-चरिते महाकाव्ये
तृतीयः सर्गः ॥३॥

---

1. M. तिश्व ।　　2. M. प्रस ।

[चतुर्थः सर्गः]

स क्षणात् प्रकृतिमेत्य पार्थिवः प्रार्थिताधिकफलोपधायिनीम् ।
स्तोतुमद्रितनयामुपाददे भारतीमिति सुभक्तिभावितः ॥१॥
गौरि शौरिगिरिशांबुजासनास्त्वद्गुणोक्तिषु निबद्धवासनाः ।
आननानि दधतो बहून्यपि स्पंदयंति रसना न साध्वसात् ॥२॥
वैभवं तव भवानि वेदितुं कोऽहमत्र गुरुमोहविह्वलः ।
नावधारयितुमुत्सहेत यत् सावधानमपि वैधसं मनः ॥३॥
रूपमौपनिषदाः सदातनं चिन्मयं तव वदंति केचन ।
चेतनेति चितिरित्यथापरे शब्दभेदचतुराः पुराविदः ॥४॥
यद्बहिस्थ[1]मखिलप्रपंचतस्तद्विदामनुभवैकवेदनम् ।
स्वप्रकाशमवकाशि सर्वतः पार्वति त्वमसि तत्त्ववस्तु तत् ॥५॥
त्वां विना जननि[2]चेतनामयी नैव चेतितुमपि क्षमः पुमान् ।
किं पुनस्त्रिभुवनस्य निर्मितौ पालने प्रलयकल्पनेऽथवा ॥६॥
त्वत्कलाभिरणिमादिभिः परं सिद्धिभिः परशिवः समेधितः ।
ईशितेति गिरिपुत्रि गीयते निःकलोऽपि निखिलार्थदर्शिभिः ॥७॥
पद्मभूवदनपद्मपावनीं वाङ्मयीं प्रकृतिमाश्रयामि ते ।
या प्रसूय निगमाञ्जगत्प्रसूः सप्रकाशमकरोज्जगत्त्रयम् ॥८॥
निर्गुणस्य न शरीरसंस्थितिः सर्व एव हि गुणास्त्वदा[3]श्रयाः ।
ब्रह्मविष्णुगिरिशाः शरीरिणो युक्तमेव वशगास्तवांबिके ॥९॥
अप्यनावरणमीश्वरं शिवे सर्वतस्तिरयसि प्रभावतः ।
अप्यलीकमखिलं यथार्थवद् व्यातनोषि विभुता तवाद्भुता ॥१०॥
पंचवक्त्र-चतुराननौ कथं वैभवं तव विवेक्तुमुद्यतौ ।
अप्यनंतवपुरेव शंसितुं यत् सहस्रवदनोऽपि न क्षमः ॥११॥
ज्ञानशक्तिरसि मुक्तिसाधनं मुक्तिरप्यचलपुत्रि मुक्तिदा ।
बंधहेतुरसि बंधरूपिणी बंधमोचनकरी च जन्मिनाम् ॥१२॥
निर्गुणोऽपि सगुणस्त्वदाश्रयात् त्वां विना बहुगुणोऽपि निर्गुणः ।
इंदिरे हरिहृदेकमंदिरे त्वत्कृपाऽल्पतपसां न पार्श्वगा ॥१३॥

---

1. छमिति भवेत् । 2. M. जजनि । 3. M. स्तदा

शुंभदैत्यदलने रणांगने का प्रशस्तिरधिका चकास्ति ते ।
अप्यखंडजगदंड[मराड]लं चंडि खंडयसि हेलयैव यत् ॥१४॥
त्वामपारमहिमोपबृंहितां स्तोतुमुद्यमवती मनागसौ[1] ।
किं करोमि रसना निरङ्कुशा शंकते न खलु शंकरप्रिये ॥१५॥
त्वद्गुणश्रवणसाधनं मया नाश्रितं सदुपदेशिनां सदः ।
त्वं गता श्रुतिपथं यदि क्वचिन्नादरान्मनसि चाधिरोपिता ॥१६॥
मादृशाऽलसतया शयालुना कुर्वताऽप्यनुपपत्तिकल्पनम् ।
नैव पाणियुगलं पवित्रितं शैलपुत्रि परिचर्यया तव ॥१७॥
चिंतनेन सुलभा त्वमंतरं प्राणिनां श्रितवती निरंतरम् ।
मानसं तदपि न क्षणं मया पादयोस्तव शिवे निवेशितम् ॥१८॥
दुर्निवारतरदुष्टवासना-सूत्रसंयमितचेतसा मया ।
एवमेव जननि प्रमाद्यता यापितानि जनुषां शतान्यपि ॥१९॥
तेन तेन विहितेन कर्मणा तासु तासु विविधासु योनिषु ।
संसरञ्छरणमत्र जन्मनि त्वां गतोऽस्मि कृपया तवेरितः ॥२०॥
भूरिजन्मजनितं महेश्वरि क्षन्तुमर्हसि ममागसां शतम् ।
कर्म किञ्चिदपि साध्वसाधु वा यत् करोमि न विना त्वदाज्ञया ॥२१॥
एतदेव जनुषः फलं महद् यत् तवांब करुणैकपात्रता ।
किं पुनस्त्रिदशवृंददुर्लभं दर्शनं भुवनवन्दिते तव ॥२२॥
चञ्चलाञ्चलविलासचञ्चला रत्नकांचनमहीसमृद्धयः ।
कीर्तिरुन्नमति[2] येन शाश्वती वैभवं वितर देवि तन्मयि ॥२३॥
उल्लसद्विशदभक्तिभाविता भारतीमिति निशम्य भूभृतः ।
बिभ्रती प्रगुणितां प्रसन्नतां तं जगाद जगदम्बिका पुनः ॥२४॥
संततं मम समाश्रयादयं भू[3]पते जनपदः प्रतिष्ठितः ।
नामधेयमपि मामकं दधन्मूलतो लवणमाशु जायताम् ॥२५॥
धावनाय निजवाहमीरयन् यावतीं भुवमुपैषि तावती ।
भाविनी लवणसाद् विवर्तितो यावदक्षि न दधासि पृष्ठतः ॥२६॥
क्षोणिपैरधिबलैरनुक्षणं खन्यमानदृढमूलबंधनः ।
देश एव विलयं व्रजेदतः कांचनस्य न खनिर्विनिर्मिता ॥२७॥

1. M. थसौ । 2. M. नुलनति । 3. M. भूत ।

इत्युदीरितवती तिरोदधे तारकारमणमौलिगेहिनी ।
तं निदेशमधिमौलि धारयन् दण्डवद् भुवि ननाम भूपतिः ॥२८॥
सोऽधिरुह्य तरुणं तुरङ्गमं रंहसा हसितहेलिवाहनम् ।
ताडयन्नकरुणं कशाञ्चलैः प्राग्गुदच्छिथिलबल्गमग्रतः ॥२९॥
पूर्णमेत्य मतिमान्मनोरथं स प्रणम्य परमेश्वरीं पुनः ।
गीयमानविभवः पुरोगमैर्निर्वृतो निववृते निजां पुरीम् ॥३०॥
संनिवृत्तमधिगत्य पार्थिवं बान्धवाः प्रकृतयश्च सैनिकैः ।
प्रत्युदीयुरथ दूरतो द्रुतं वारिवाहमिव बर्हिणां गणाः ॥३१॥
रेणुभिः पिहितहेलिमण्डलं प्रोल्लसद्द्विपनिपीतदिङ्मुखम् ।
घोरणध्वनितयन्त्रितताम्बरं स्वामिनाऽथ समगंस्त तद्बलम् ॥३२॥
प्रेक्ष्य पाण्डुशतपत्रसोदरं छत्रमस्य पुरतो रथोपरि ।
स्यन्दनद्विरदवाजिवाहना वाहनान्निजनिजादवातरन् ॥३३॥
यावदुद्यमभृतो भवन्ति ते पादधारगमनाय मन्त्रिणः ।
तावदेव नरदेवनोदितः स्यन्दनः स्यदवशादुपासदत् ॥३४॥
स प्रणम्य गुरुवर्गमादरात् सौहृदेन परिरभ्य बान्धवान् ।
प्रीतिचारुभणितैः कृतानतीनन्वरञ्जयदथानुजीविनः ॥३५॥
आज्ञयाऽवनिपतेस्ततः परं वाहनानि नियतानि सैनिकैः ।
इन्द्रियैरिव मनोनिदेशितैः स्वैरमात्मविषयाः प्रपेदिरे ॥३६॥
वाहिनीभिरिति तत्र सङ्गतः स प्रवाहमधिकं प्रगल्भयन् ।
उच्चचाल जलधिर्यथाऽपरो मन्द्रघोषमुखरीकृताम्बरः ॥३७॥
मञ्जुलामतनुमङ्गलश्रियं चिन्वतीभिरथ पौरयोषितः ।
लाजवृष्टिभिरिवार्धदृष्टिभिर्मेदिनीपतिमपूजयन्मुहुः ॥३८॥
स्वां प्रविश्य नगरीं नगात्मजानुग्रहं निगमयन्निजौजसा ।
स्कन्दवद्भृशममन्दशक्तिभृत् संदधे सुमनसां स नन्दथुम् ॥३९॥
सेवनाद् गिरिभुवो भुवः प्रभुं तं निशम्य सपदि प्रतिष्ठितम् ।
शत्रवोऽपि शरणार्थिनस्तदा भूयसीर्गिरिभुवः सिषेविरे ॥४०॥
पूर्वमेव पृथिवीभुजाऽमुना धीरतादिकमहारि वारिधेः ।
कुर्वताऽथ लवणाकरं परं हन्त तस्य जडतैव शोषिता ॥४१॥
एवमुज्ज्वलितकीर्तिमण्डलो मण्डलाग्रसचिवः शुचिव्रतः ।
वीरविश्वपतिरोजसाऽञ्जसा विश्वमेव वशमानिनाय सः ॥४२॥

सूनु[1]रस्य **हरिराज**संज्ञया विश्रुतो[2]हरिपदैकजीवनः ।
रंहसा हरिगणं विलङ्घयन् राजति स्म हरिवत् प्रभावतः ॥४३॥

तं कुमारमपि सारवत्तया पारगं परबलस्य संयुगे ।
उन्नयन्नयनरञ्जनं गुरुर्मेदिनीगुरुधुरामलम्भयत्[3] ॥४४॥

शाकंभरीयलवणाकरमूर्तिकीर्तिं संस्थाप्य तत्र तनुजे मनुजेशतां च ।
शाकम्भरीपदविभावनसावधानो धाम प्रधानमथ विश्वपतिर्जगाम ॥४५॥

गुरुर्गौरीलोकं किमु जिगमिषुर्योग्यतनये समं साम्राज्येन[4]न्यधित गुणजातं निजमपि ।
यशःशेषे तस्मिन् यदिह हरिराजे समजनि प्रतापोदग्रत्वं द्विगुणितमथान्योऽपि महिमा ॥४६॥

उपरतमवगत्य वज्रसूनुं यवनपतिर्जवनेन वाजिनाऽथ ।
सहचरितचमूचरस्तरस्वी समरमुत्क्रमनास्ततार **सिन्धुम्** ॥४७॥

अभिपतितुमुदग्रानुद्यतान् **पारसीकान्** करिण इव मदान्धान् दूतवक्त्राद् विदित्वा ।
हरिरिव हरिराजस्तान्नियन्तुं नियन्ता सममु[5]चितबलेन द्राक् प्रतीचीं प्रतस्थे ॥४८॥

कोदण्डं गाण्डिवस्याप्युपचितयशसश्चण्डतां पण्डयन्तं
　　दोर्दण्डोद्दण्डदर्पप्रकटितविकटध्वानधन्यं धुनानः ।
काण्डीरः काण्डपातैरथ रिपुरथिनां खण्डयन्मुण्डजालं
　　तस्तार स्फारधारोद्धुर[रुधिर]धुनी[6]धोरणीभिर्धरित्रीम् ॥४९॥

दोर्लीलाविदलितदारुणप्रतीपप्रोद्दामद्विरदघटाकटाद्विमुक्तैः ।
क्षोणीशः क्षितिमकिरद् विपक्षलक्ष्मीबाष्पाम्बुस्तवकनिभैः स मौक्तिकौघैः ॥५०॥

अयमितकचचुम्बितस्तनां[7]ताः कररुहखण्डितपाटलार्द्रगण्डाः ।
उयवकयुवती रतिप्रवृत्ता इव विदधे विरहय्य भर्तृभिर्यः ॥५१॥

हूनाः स्थूणा इवासंस्तनयधनसुहृच्छोकसन्दानदूना
मद्राः स्वीकृत्य भद्राकरणमपि निजं त्यक्तभद्रासनास्थाः ।
चीना मन्दाक्षदीनाः सपदि रणमुखे दुद्रुवुर्वीतचीना
म्लेच्छाः स्वेच्छाविहारं प्रतिजहुरि[त]रे प्राप्य मूर्च्छाविरामम् ॥५२॥

जित्वैवं जवनाश्ववेन विजयं श्रीचिह्नमुर्वीपतिदुर्गं[8]**योधपुरं** च **मण्डव**पुरस्याभ्यर्णतो निर्ममे ।
यस्याद्यापि विलोकनात् स्मृतपुरावृत्तास्**तुरुष्काधिपाः**
कम्पार्ताः पतितं विदन्ति न शिरस्त्राणं पुरस्त्रासतः ॥५३॥

इति सूर्जनचरिते महाकाव्ये चतुर्थः सर्गः ॥४॥

---

1. M. सूपु । 2. M. श्रोतो । 3. M. म्मयत् । 4. M. ज्यं न । 5. M. मनु । 6. M. धनी । 7. M. सूनां । 8. M. पूर्वीपतेदुर्गं ।

[पञ्चमः सर्गः]

सुरद्विषः क्रव्यभुजो द्विषंस्तान्निहत्य वीर्याधिकदुर्दुरूढान् ।
जयश्रियं राम इवात्मकान्तामसौ समुद्धृत्य पुरीं प्रतस्थे ॥१॥
अजायतास्मादथ **सिंहराजः** सिंहोजितो यस्य मृधे द्विषन्तः ।
विनेशुराशु स्फुटसिंहनादैर्नृसिंहनादैरिव दानवेन्द्राः ॥२॥
यः पक्षवेगाद् विघटय्य दूराद् दुरन्तमग्रे परवाहिनीशम् ।
सुधां गरुत्मानिव यत्नगुप्तामनल्पलभ्यां श्रियमाजहार ॥३॥
स्वबन्धुभिर्वन्ध्ययशोभिमानैः स्वप्राणरक्षानिपुणैर्निरस्ताः ।
वन्दीकृता विद्विषतां कुमारीः[1] सोऽन्वग्रहीद् दास्यपदे निधाय ॥४॥
नियोजिताः काश्चन वीजनाय भयादिदंपूर्वतयाऽतिमूढाः ।
स्खलन्ति शश्वद् वलयानि बालाः प्रकोष्ठमूलेषु निवेशयन्त्यः ॥५॥
क्षणं दृगम्बुस्तिमितोत्तरीयव्यक्तस्तनोपान्तधृतैकहस्ताः ।
करस्थबालव्यजनानि दीर्घैरवीजयन्निश्वसितैरशीतैः ॥६॥ युग्मम् ।
नितान्तमादर्शमपि प्रसन्नं निःश्वासधाराभिरथान्धयन्ती ।
क्लान्ता चिरं[2] काचन मार्जनेन श्यामं दधौ पाणिमिवाननाब्जम् ॥७॥
आदाय ताम्बुलकरङ्कमन्या कलङ्कमेवाऽऽत्मकुलस्य कन्या ।
नालं विमोक्तुं न च वोढुमग्रे व्यग्रा न चक्रे कतमां व्यवस्थाम्[3] ॥८॥
गङ्गाम्बुसङ्गादतिगौरवाढ्यं भृङ्गारमादाय कृताङ्गभङ्गा ।
पाणेः सकम्पात् पतितेन तेन स्वयं न काचित् पतिता कथञ्चित् ॥९॥
इत्थं सपर्यासु भृशानभिज्ञा ज्ञात्वापि राज्ञा नहि ता निषिद्धाः ।
कदर्थनं वैरिकुलस्य कार्यं नहीशितुः[4] सेवयितुं प्रयत्नः ॥१०॥
आदत्त रम्या अपि वैरिरामा वीरप्रकृत्यैव नृपो न कामात् ।
नदीरयस्तुङ्गतरूंस्तरङ्गैरुत्सङ्गयेत् किं फलपुष्पलोभात् ॥११॥
निजानुरूपां गुणरूपशीलै**रवन्तिनाथस्य** ततस्तनूजाम् ।
मनोरमां नाम मनोभिरामामुदूढवानूढकुलप्रतिष्ठः ॥१२॥
अनङ्गसर्वस्वमथाङ्गमङ्गं तारुण्यतारं[5] तरलायताक्षी ।
सा बिभ्रती विभ्रमकौशलेन विशाम्पतिं तं वशमानिनाय ॥१३॥

---

1. M. री । 2. M. धिर ।
3. M. स्था । 4. M. तद्दंसितुः । 5. भारमिति भवेत् ।

तयोस्तथाऽन्योन्यमनोनुवृत्तौ सदाऽनुकूलव्यवसायभाजोः ।
निशीथिनीभिः कियतीभिरेव जगाम काष्ठां प्रणयानुबन्धः ॥१४॥
तस्याः प्ररूढेन स सौहृदेन सन्दानितान्तःकरणः सदैव ।
अमन्यत स्वं खलु सापराधं छायावलोकेऽप्यपराङ्गनायाः ॥१५॥
समृद्धराज्यो बहुभार्यतायां राजोचितायामपि सिंहराजः ।
वितीर्यमाणा अपि वीतदोषा नाङ्गीकरोति स्म नरेन्द्रकन्याः ॥१६॥
प्रतीक्षमाणः सुतमात्मतुल्यं मनोरमायां मनुजाधिनाथः ।
पराङ्मुखः सोऽन्यपरिग्रहेषु समाहितात्मा समयं निनाय ॥१७॥
उपासितारौ सततं सुतार्थे तत्रोपयुक्तान्यथ दैवतानि ।
तौ दम्पती सम्प्रयतौ प्रयत्नात् पृथग्विधान्याददतुर्व्रतानि ॥१८॥
ऋत्विग्भिरभ्यस्तसमस्ततन्त्रैः सदा[1]गमासादितसिद्धमन्त्रैः ।
अप्रीणयत् पुत्रदपुण्यलिप्सुः सप्तार्चिषं सोऽर्पितसम्यगृद्धिः ॥१९॥
भूरीणि भूयिष्ठफलानि दानान्यदाद् वदान्यप्रवरः सदापि ।
उपस्थितायामथ कामनायामन्यैव धन्याऽजनि दानधारा ॥२०॥
स भारतादिश्रवणे द्विजेन्द्रान् सभारतान् सन्ततमाश्रितोऽपि ।
सन्तानकादप्यधिकं दुरापं सन्तानकामो मनुते स्म कामम् ॥२१॥
बोधिद्रुमं बुद्धिमती कथञ्चित् परीत्य पारिप्लवलोचना सा ।
रूक्षत्वचं वक्षसि योजयन्ती कदर्थनं स्वार्थवशाद्विषेहे ॥२२॥
वैद्यैः सुविद्यैर्यशसाऽनवद्यैः सिद्धौ प्रसिद्धैरपि शुद्धवृत्तैः ।
प्रसाधितां सन्ततिमौषधानां सा सन्ततं सन्ततये सिषेवे ॥२३॥
एवंविधैस्तैर्विविधैरुपायैः प्रयासभाजोऽप्यवनीभुजोऽस्य ।
मनोरथे नाभवदङ्कुरोऽपि चिरन्तने बीज इवोषरोप्ते ॥२४॥
सोऽचिन्तयत् सञ्चितपुण्यकर्मा मर्माविधं वीक्ष्य विधेर्विधित्साम् ।
मनीषिते स्वेऽतितरां निराशः प्रियाकरिष्यन्निजपूर्वजानाम् ॥२५॥
श्रद्धानुबद्धान्यपि वैदिकानि केनापि नाङ्गेन वियोजितानि ।
कर्माणि हन्त स्वफले पराञ्चि को वेद भावं भवितव्यतायाः ॥२६॥
वेदानुशिष्टे पथि शिष्टजुष्टे नास्त्येव सन्देहलवावतारः ।
फलानुमेयस्य महान् ममायमधर्मराशेरशिवो विवर्तः ॥२७॥

---

1. M. सद ।

नूनं ममान्ते रिपवो दुरन्ता निःशङ्कमस्वामिकमस्मदीयम् ।
राष्ट्रं ग्रहीष्यन्ति गिरिप्रदेशं विपन्नपारीन्द्रमिव द्विपेन्द्राः ॥२८॥
वृन्दावतीयं कुलराजधानी पाणौ परेषां पतितैव तावत् ।
अतो निवृत्ता भुवि चाहुआनवंशस्य वार्तापि यशोविलोपात्[1] ॥२९॥
स्नेहेन पुत्रप्रतिमं ममापि जवीयसः पुत्रमतो युवानम् ।
राज्येऽभिषेक्ष्यामि समक्षमेव भीमं रिपूणामिह **भीमदेवम्** ॥३०॥
निश्चित्य चित्तेन विधेयमेवं बुधोपमः प्रेमवशात् प्रियां ताम् ।
आभाष्य विद्याविशदांस्तथान्यानामन्त्र्य मन्त्रिप्रवरांश्च राजा ॥३१॥
दिदेश भीमस्य महाभिषेकसंभारमाहर्तुमथ स्वभृत्यान् ।
तेऽप्येतदाज्ञानुपदं तदैव सम्पादयामासुरदीर्घसूत्राः ॥३२॥ [युग्मकम्]
ततः समाहूय समाहितात्मा हिताय वंशस्य पुरोहितांश्च ।
समर्पयामास समः स पित्रा भीमाय धीमान् निजमाधिपत्यम् ॥३३॥
तत्रातिभूमिं गतमस्य दृष्ट्वा निर्वेदमुद्वेगविदीर्णचेताः ।
बाष्पाम्बुपूरं गुरुवत्सलत्वान्नापारयद्वारयितुं कुमारः ॥३४॥
तस्याभिषेकप्रभवप्रवाहैरुवाह शैत्यं सुतरां धरित्री ।
विवेश तस्या दवथुः प्रथीयानन्तः परानीकपृथुस्तनीनाम् ॥३५॥
निवेशितैकाङ्गुलिरेकमस्य गुरुर्ललाटे तिलकं चकार ।
स्वबान्धवैरञ्जलिभिः परेषां व्यतीतसंख्यास्तिलका विकीर्णाः ॥३६॥
तमभ्यसिञ्चत् सकृदेव राज्ये गुरुः पयोभिः किल पुष्करोत्थैः ।
सदाऽभ्यसिञ्चन्निजगर्भरूपं रिपुस्त्रियो लोचनपुष्करोत्थैः ॥३७॥
महाभिषेकेण महीयमानं नवोत्थितं सोममिवाम्बुराशेः ।
मुदा प्रबाष्पः प्रवया युवानमालिंग्य राजानमिदं जगाद ॥३८॥
निशम्य मा[म]प्रजमुज्झि[2]तास्त्वं कुतर्कचक्राहितवक्रचित्ताः ।
उद्भावयन्तः किमपि प्रतीपा विप्लावयिष्यन्ति बलेन देशान् ॥३९॥
अतः करस्थामपि राजलक्ष्मीं विजित्य भूयोऽपि भुवोऽधिपांस्तान् ।
गुरोर्गृहीतामिव वत्स विद्यां पारायणेन प्रवणीकुरुष्व ॥४०॥
तथेति तथ्यां गिरमाशिषं च गुरोर्गृहीत्वाऽवनतेन मूर्ध्ना ।
पताकिनीभिर्नृपतिः परीतः प्रातः प्रतस्थे प्रथितप्रतापः ॥४१॥

---

1. M पाता ।   2. M. मुभि ।

प्रोत्साहयन् साहसिकप्रवीरानुत्कर्तयन् कातरलोकचेतः ।
दिग्जैत्रयात्रोचितदुन्दुभीनां प्रास्थानिकः प्रादुरभूत् प्रणादः ॥४२॥
युगान्तजीमूतनिनादघोरां[1]स्तत्तूर्यघोषाननलं विसोढुम् ।
आकारयामासुरिवात्मपालानाशाः प्रतिश्रुन्मिषतस्तदानीम् ॥४३॥
चमूधराणां[2] चरणोद्धतैः खं रुन्धद्भिरन्धंकरणैः खरांशोः ।
दिक्पालदन्तावलदाननद्यो जम्बालभावं[3]दधिरे रजोभिः ॥४४॥
उपायनैः सम्यगुपायविज्ञो विज्ञातसारो **मगधाधिनाथः** ।
तमागतं मार्गत एव दूरात् प्रत्युद्गमात् प्रीततरं चकार ॥४५॥
संग्रामसीम्नि क्षणदत्तरङ्गा**नङ्गान्नि**रङ्गान्नयविद् विधाय ।
जगाम गङ्गातटवर्त्मनैव **गौडो**पकण्ठं [ग]रुडोपमानः ॥४६॥
सिन्धोरगाधेऽम्भसि शीर्णरश्मौ निमग्नमूर्तौ तरणौ रणेषु ।
तमोनुदं सोममिवाथ **वङ्गा**स्तमेव राजानमयुः शरण्यम् ॥४७॥
कालिङ्ग्यसैन्यं स्वबलान्नियम्य यथा बलं कौरवमुग्रवीर्यम् ।
जिष्णु[4]र्यशोभिः सह शालवाणां जहार वृन्दानि विषाणिनां सः ॥४८॥
मौर्वीसनाथं करमात्मनोऽसौ कर्णावतंसं समितौ विधास्यन् ।
चकार **कार्णाट**कुटुम्बिनीनां कर्णावतंसे विफलं प्रयासम् ॥४९॥
तं **कुन्तलाः** कुन्तलतामहार्यं[5] कुन्तीतनूजप्रतिमप्रतापम् ।
विलोक्य पर्याकुलकुन्तलांता विदुद्रुवुर्दूरविमुक्तकान्ताः ॥५०॥
आतङ्कतः प्रच्युतमुच्चलंत्यास्ताटङ्कचक्रं किल **लाटनार्याः** ।
रणाङ्गनं रिङ्गति भीमदेवे निजं न भूयः पदमारुरोह ॥५१॥
सम्पाद्य **पम्पा**-कमलेषु मैत्रीं **गोदां** प्रमोदादवगाह्य गाढम् ।
आपीय **तापी**पयसां पृषन्ति तं पार्थिवं पावयति स्म वातः ॥५२॥
रसातिरेकेण मिथः समेताज्जग्राह[6]युग्माद् युगपद् द्वयं सः ।
मुक्ताकलापानपि **ताम्रपर्ण्याः** सुजातरत्नान्यपि **तोयराशेः** ॥५३॥
यशःपताकाङ्कितशेखराणि निवेश्य तस्मिञ्जयकेतनानि ।
सांयात्रिकेभ्यः प्रथमोपनीतं वलिं समादत्त बली यथार्थम् ॥५४॥
ततः पथा तेन रथाङ्गपाणेः प्रियामयं **द्वारवती**मुपेत्य ।
पुण्यश्रिया पूर्णतयाऽवभासे मृजाभिरादर्श इवोज्ज्वलश्रीः ॥५५॥

---

1. M. योरां । 　　2. चराणामित्युचितम् । 　　3. M. भानू ।
4. M. जिष्ु । 　　5. महास्त्रमिति स्यात् । 　　6. M. ग्रह ।

प्राचेतसीं प्राप्य दिशं प्रचेताः **पाश्चात्त्ययोधै**र्जववत्तुरङ्गैः ।
आयोधनं सज्यधनुःसहायः प्रसारयामास पुरा शरौघैः ॥५६॥

खसानसाधूनसुभिर्वियोज्य स्वबन्धुभिः सिन्धुतटाधिवासान् ।
काम्बोजकाम्भोजवने तुषारैः **शकान्** स काण्डैः शकलीचकार ॥५७॥

इत्थं पराजित्य पराभिमर्दी नराधिनाथः प्रबलानरातीन् ।
तुरङ्गरत्नानि पुरङ्गतोऽसौ महार्हतेजांसि जहार तेषाम् ॥५८॥

आशामथासाद्य कुवेरगुप्तां स दुःसहं प्रज्वलयन् प्रतापम् ।
सारं कराक्रान्तिभरेण भास्वान् हिमाद्रिभूमेर्भृशमाचकर्ष ॥५९॥

न **कामरूपा**क्रमणे तदानीं तेजःप्रकर्षोऽपि[1] नवो नृपस्य ।
अयं हि देहप्रभया पुरैव विनापि यत्नं जितकामरूपः ॥६०॥

इत्थं विधाय जगतीजययोग्ययात्रामुत्सादितप्रतिभटक्षितिपालवर्गः ।
वृन्दावतीं रुचिरमङ्गलतोरणाङ्कां स प्राविशद् विशदकीर्तिपविलिताशः ॥६१॥

इति सूरजनचरिते महाकाव्ये
पञ्चमः सर्गः ॥५॥

1. 'र्षोऽभि' इति स्यात् ।

[षष्ठः सर्गः]

तस्य **विग्रहदेवो**ऽभूत्तनयश्चारुविग्रहः ।
विग्रहे वैरिवृन्दानां बहुशो दत्तनिग्रहः ॥१॥
पदं पैतामहं तस्मिन्नारोप्य नृपनायकः ।
प्रपेदे पूर्ववंश्यानां पदवीं वार्धकोचिताम् ॥२॥
स्वबलेन विनिर्जित्य **गूर्जरान्** भृशदुर्जयान् ।
राज्यं तेषां गुणप्राज्यमथ जग्राह विग्रहः ॥३॥
यत्पुरं परितो रत्नैः पूरयित्वा प्रजापतिः ।
यानि शिष्टानि तान्येव नीरधौ निदधे ध्रुवम् ॥४॥
आरात् पारायणे पत्युः शृण्वत्यः श्रुतिसंहिताः ।
यत्र ताः शिक्षयन्ति स्म बहून् पटुगिरः स्त्रियः ॥५॥
दधत्यो नखरत्नानि रदनच्छदविद्रुमान् ।
दन्तमुक्ताकला[1]पञ्च कण्ठकम्बुकरम्बिताः ॥६॥
पञ्चबाण-वणिक्पण्यवीथयो वामलोचनाः ।
यौवनद्रविणैः पुम्भिर्यत्रासेव्यन्त सन्ततम् ॥७॥ युग्मम् ।
सावर्ण्यादविनिर्णेयपीतकौषेयकञ्चुकाः ।
अविगूढस्वभावत्वादौन्नत्यपरिणाहयोः ॥८॥
चम्पकप्रतिमाङ्गीनां गाढगुप्ता अपि स्तनाः ।
निरावरणवद्यत्र लक्ष्यन्ते स्म विदूरतः ॥९॥ युग्मम् ।
भुजान्दोलझणत्कारिकङ्कणाकारितस्मरा ।
सविलासपदन्यासतारनूपुरकूजिता ॥१०॥
प्रगल्भं सञ्चरन्तीनां यत्र लोलदृशां मुहुः ।
स्वभावगतिरप्यासीन्नृत्यवच्चित्तहारिणी ॥११॥ [युग्मकम्]
यत्र गूर्ज[2]रगौराङ्गीदीर्घदृष्टिनिषेवणात् ।
जगतां विजये कामः संदधे दीर्घदर्शिताम् ॥१२॥
मृष्टं मुखं मृगाक्षीणां शोणस्थासकरञ्जितम् ।
बन्धुजीवार्चितस्येन्दोः सन्दधे यत्र बन्धुताम् ॥१३॥

---

1. M. कत्वा । 2. M. गूर्य ।

तत्पुरं स्ववशी कृत्वा प्रविश्य नगरं निजम् ।
अनयन्नयवित् कालं निर्वृतो निर्जिताहितः ॥१४॥
अजायत जयी तस्मात्तनुजो मनुजाधिपात् ।
कीर्तिनिन्दितकुन्देन्दु**गुन्ददेव** इति श्रुतः ॥१५॥
सुतं **वल्लभ**नामानं लभते स्म स भूपतिः ।
अगण्या गुणा यस्य स्वर्गिणामपि वल्लभाः ॥१६॥
रागिणापि प्रतापेन सङ्गताया निरन्तरम् ।
भ्रान्तिभाजोऽपि यत्कीर्तेः शुद्धिर्वैधिष्णु[1]तामगात् ॥१७॥
विकत्थमानं विक्रान्त्या **भोजं** भुजभृताम्बरः ।
तेजसा जितदिक्पाल**श्चेदिपाल**मुपाद्रवत् ॥१८॥
स वाहिनीभिः सर्वाभिरवाधितविधित्सितः ।
अक्रमेण समाक्रामन्नग्रथ[2]स्कन्धं धराभृताम् ॥१९॥
अरुणा[द]रुणप्रख्यो वेगाद्वैरिवरूथिनीम् ।
युगान्ते मुक्तमर्यादो महीमिव महार्णवः ॥२०॥
स क्षणादकरोद् दक्षः प्रतिपक्षस्य पक्षगान् ।
सैनिकाञ्छरवर्षेण सम्पराये पराङ्मुखान् ॥२१॥
तरस्वी तुरगारूढं गरुत्मानिव पन्नगम् ।
जीवग्राहं स जग्राह संग्रामे भोजभूपतिम् ॥२२॥
निःसत्त्वो वीतशौटीर्यः परपाणिस्थजीवनः ।
सोऽभूत् क्षणादगस्त्येन गृहीत इव सागरः ॥२३॥
शीर्णदंष्ट्रो यथा सिंहः प्रलीनास्त्रपरिच्छदः ।
परवान् पञ्जरावासं सेहे भोजः कथञ्चन ॥२४॥
तं नियन्त्रितमारोप्य नियन्ता निजदन्तिनि ।
ययौ विजयनिर्घोषैः साकं शाकम्भरीपुरम् ॥२५॥
कृतप्रायोपवेशं तमन्वकम्पत वल्लभः ।
कृपैव कृपणे शत्रौ शोभते जयशोभिनाम् ॥२६॥
विमोच्य वैरिणं बन्धादथावन्ध्यपराक्रमः ।
सत्कारैः सान्त्वयामास सौम्यः सापत्रपं नृपः ॥२७॥

---

1. M. श्रु । 2. M. 'क्रामदग्रथ' इति स्यात् ।

किरीटेन शिरः शत्रोः स राजा समयोजयत् ।
उच्चैःशिरस्त्वमेतस्य बभूवाधिकमद्भुतम् ॥२८॥
परं सम्भावयामास सुवर्णाभरणैः प्रभुः ।
अभूवंस्तस्य यशसा सुवर्णाभरणा दिशः ॥२९॥
कृत्वा महार्हसम्भारैर्महेन्द्रोचितमर्हणम् ।
तं प्रीतिविशदैर्वाक्यैर्विससर्ज विशांपतिः ॥३०॥
व्रजतः पथि भोजस्य यः श्रुतो दुन्दुभिध्वनिः ।
स एव वल्लभस्यासीज्जगत्यां जयघोषणा ॥३१॥
नीत्या नितान्तमित्येवं कृतकृत्यत्वमीयिवान् ।
अनामयमनाः सम्यक् शशास वसुधां सुधीः ॥३२॥
ततस्तस्मिन् यशःशेषे शेषोपमयशोभरे ।
अभवत् पृथिवीनाथो **रामनाथ**स्तदात्मजः ॥३३॥
रामोऽस्य नाथ इत्येतच्चरितैरन्वमीयत ।
भजन्ते स्वामिशीलं हि भृत्यास्तदनुवर्तिनः ॥३४॥
सुतोऽभूत्तस्य **चामुण्ड**श्चण्डदोर्दण्डमण्डनः ।
खण्डितारिचमूमुण्डैश्चामुण्डागणतोषकृत् ॥३५॥
सितातपत्रं पुत्राय प्रतिपाद्य ततः पिता ।
आस्पदं मुनिभिर्मृग्यमारुरोह मरुत्पतेः[1] ॥३६॥
चारुणा चरितेनाथ चामुण्डो मण्डयञ्जनान् ।
वृषाङ्कवरिवस्यायां वशी चित्तं न्यवेशयत् ॥३७॥
आरोप्य मेदिनीभारं मन्त्रिवृद्धेष्वगृध्नुषु ।
विततान त्रिनेत्रस्य प्रसादौपयिकीः क्रियाः ॥३८॥
त्रिसन्ध्यं त्रिविधाः पूजास्त्र्यम्बकस्य विशेषयन् ।
तप्यते स्म तपस्तीव्रं शैवव्रतपरायणः ॥३९॥
तप्ताङ्गारकरालायां सरण्यां सञ्चचार सः ।
भक्तेरनन्यगामिन्या विशुद्धिमिव दर्शयन् ॥४०॥
एवंविधैरथान्यैश्च तपोभिरतिदुष्करैः ।
प्रादात् प्रीतमनास्तस्मै प्रार्थितं प्रमथाधिपः ॥४१॥

---

1. M. तः ।

स जित्वा जित्वरः संख्ये **यवना**नीकनायकान् ।
शकानामधिपं शक्त्या कारातिथिमकारयत् ॥४२॥
सुतं **दुर्लभराजा**ख्यं कृत्वा राजानमार्यधीः ।
चामुण्डश्चन्द्रचूडस्य लोकं लोकोत्तरं ययौ ॥४३॥
सुतो **दुसलदेवो**ऽथ जातो दुर्लभराजतः ।
कुशलो वीरचर्यायां चिरं वसुमतीमशात् ॥४४॥
तस्माद् विशालयशसो **वीशलाख्यः** सुतोऽजनि ।
विषयान्वशयामास विश्वोद्गीतगुणेन यः ॥४५॥
जगद्विजयिवीर्येण वज्रपाणिसमत्विषा ।
शक्तित्रयसनाथेन तेन षाड्गुण्यशोभिना ॥४६॥
आकर्णकृष्टचापेन सङ्गरे कर्णविक्रमम् ।
कर्णं संयम्य ककुभां कर्णपूरीकृतं यशः ॥४७॥ युग्मम् ।
निबध्यावन्ध्यनिर्बन्धः स मृधे कर्णभूपतिम् ।
आददेऽ**वन्ति**नगरीं जयश्रियमिवापराम् ॥४८॥
यस्यामुत्पन्नया नित्यं विशालवसुसम्पदा ।
यथार्थनामधेयत्वं लभते स्म वसुन्धरा ॥४९॥
सौधोत्सङ्गपरिष्वङ्गनिर्वृते यत्र नीरदे ।
स्थिरसौदामिनीशोभामभजत् कामिनीजनः ॥५०॥
महाकालकिरीटस्था कला यत्र कलाभृतः ।
मालवीमुखपद्मानां द्विति(?)द्वैगुण्यमादधे ॥५१॥
रिङ्ग[1]द् गङ्गोत्तमाङ्गोऽपि यत्रानङ्गविमर्दनः ।
सिप्रारसाभिषेकाय साभिलाषः सदाऽभवत् ॥५२॥
मध्यन्दिनेऽपि देवस्य चूडाचन्द्रांशुचुम्बितम् ।
धारायन्त्रायते यत्र चन्द्रकान्तकृतं गृहम् ॥५३॥
यत्राऽऽसन्नमहादेवदृष्टिपातभयादिव ।
मालवीलोचनोपान्ते निलीनो मीनकेतनः ॥५४॥
वाणीपाणिलसद्वीणाक्वणितैर्मिलितस्वराः ।
यस्यामुप[2]जगुः सोमशेखरं नगरस्त्रियः ॥५५॥

1. M. रिङ्गं । 2. M. नुप ।

सदा हरशिरश्चन्द्रकरालम्बनलालिताः ।
सिप्राशीकरसम्भिन्नसमीरमृदुलीकृताः ॥५६॥
मानिनीसमुदायस्य यस्यां मानसवृत्तयः ।
आययुर्न कठोरत्वं वल्लीनामपि पल्लवाः ॥५७॥ युग्मम् ।
आपणैर्विलसन्मुक्ताहीरकर्पूरकंबुभिः ।
क्षीरनीरधिफेनाभैर्वितानैर्विततीकृतैः ॥५८॥
दिवाऽपि चन्द्रिकामोदमुदितैः कुमुदाकरैः ।
पुण्डरीकवनालीनमरालैः कमलाकरैः ॥५९॥
हर्म्यैर्हिमाचलोच्छ्रायैः स्फुटस्फटिककुट्टिमैः ।
श्वेतद्वीपस्य या मूर्तिर्द्वितीयेव व्यभाव्यत ॥६०। कुल[1]कम् ।
यस्यां विपणिविस्तारिमणिस्तम्बकदीधितीः ।
करैः शश्वदनुष्णां[2]शुरमुष्णात् प्रांशुभिर्निशि ॥६१॥
सारमाकृष्य कैलासात् किं वा ब्रह्मांडभाण्डतः ।
निर्मिता नु वृषाङ्केण निजावासाय या स्वयम् ॥६२॥
सिप्रासरिति स स्नात्वा विप्राणां विहितार्हणः ।
अथ प्रमथनाथस्य प्रासादं प्राविशद् वशी ॥६३॥
अर्चयित्वाऽवनीपालः पुष्पधूपादिसाधनैः ।
प्रभुं प्रभूतया भक्त्या तुष्टावाष्टतनूभृतम् ॥६४।
जय कर्पूरगौराङ्ग गिरां साम्नामगोचर ।
गरीयःकरुणागार गौरीरूढार्धविग्रहः ॥६५॥
बालचन्द्रलसद्भाल जय व्यालविभूषण ।
जय देव महाकाल जहि कालमहाभयम् ॥६६॥
कृपापालितदिक्पाल कपालप्रोल्लसत्कर ।
वेतालपृतनापाल कालकण्ठ नमोऽस्तु ते ॥६७॥
त्रिलोकीशरण त्र्यक्ष त्र्यम्बक त्रिपुरापते ।
निस्त्रैगुण्य त्रयीसार तारयास्माद् भवार्णवात् ॥६८॥
स्मृतिमात्रेण जन्तूनां शमयन्तं तमः प्रभो ।
ये त्वां तमोमयं प्राहुस्त एव तमसा हताः ॥६९॥

---

1. M. कुत । 2. M. स्तां ।

ज्वलनं जलवेणीं च विधुं विषधरं तथा ।
अस्थिमालां च बालां च बिभर्षि सममीश्वर ॥७०॥
त्वमेको विश्वनिर्माणस्थितिसंहृतिहेतुकम् ।
वितनोषि त्रिधात्मानं त्रिलोचन गुणैस्त्रिभिः ॥७१॥
अष्टमूर्तिं त्रिमूर्तिं वा त्वां वदन्तु पुराविदः ।
आनन्त्यात्तव मूर्तीनां वयमत्र निरुत्तराः ॥७२॥
कोटिशो रसनाः कस्य कस्यानन्ता सरस्वती ।
वक्तुं यः प्रतिजानीते महिमानं महेश ते ॥७३॥
अध्वराखिलसम्भारसम्भृतस्यापि धूर्जटे ।
पराचि त्वयि दक्षस्य दारुणाय[1] तपःक्रियाः ॥७४॥
नाराधितौ पुराराते पुरा ते चरणावतः ।
जननेऽस्मिन्नहं षण्णां वैरिणां पतितो मुखे ॥७५॥
दुर्वासना पिशाचीयं मोहयित्वा मतिं मम ।
बलात् कवलयामास भवत्स्मृतिकथामपि ॥७६॥
एतेनागामि जन्मापि तादृगेव निरूपयन् ।
किं वदाम्यपराद्धोऽहं त्वयि त्रिष्वपि जन्मसु ॥७७॥
निरुपाधिकृपापूरपरतन्त्रीकृतात्मनः ।
दीनोद्धरणमात्रं ते व्यसनं वृषभध्वज ॥७८॥
ममाप्यन्धधियश्छिन्धि बन्धमन्धकमर्दन ।
कृपायास्तव नायासलेशोऽप्यत्र भवेद् विभो ॥७९॥
इति स्तुतिभिरीशानं सम्भाव्य स भुवः प्रभुः ।
प्रादक्षिण्यात् परिक्रम्य प्रणिपत्य विनिर्ययौ ॥८०॥
कृत्वा करप्रदांस्तत्र बलवानथ **मालवान्** ।
जितैरनुगतो भूपैः प्राविशत् पुरमात्मनः ॥८१॥
तस्मात् पृथुगुणात् पुत्रो जातः पृथुसमप्रभः ।
पूरयन् यशसा पृथ्वीं **पृथ्वीराज** इति स्मृतः ॥८२॥
उत्पन्नस्तनुजस्तस्य प्रपन्नो दनुजद्विषम् ।
बिभ्राणो गुणबाहुल्यं **वह्लणो** वल्लभः सताम् ॥८३॥

---

1. दारुणायेति वा दारुणा यदिति वा भवेत् ।

लब्धलक्षा अपि स्वैरं नातृप्यन् पक्षसंश्रिताः ।
शतकोटितुलादानशुभ्रवो यस्य मार्गणाः ॥८४॥

निर्वाप्य प्रतिभटपार्थिवप्रतापं
सिञ्चन्त्यः किसलयिनीं स्वकीर्तिवल्लीम् ।
सञ्चेरुः सुचरितशालिनोऽस्य विष्वग्
विस्तीर्णा वितरणनीरनिर्झरिण्यः ॥८५॥

अथ गतवति नाकं बह्लणे बाहुलेय-
प्रतिनिधिरधिरूढस्तत्पदं तस्य पुत्रः ।
अभवद**नलदेव**ः शत्रुवंशाटवीना-
मनल इव समिद्धः सोमवद् बान्धवानाम् ॥८६॥

इति सूरजनचरिते महाकाव्ये
षष्ठः सर्गः ॥६॥

[सप्तमः सर्गः]

ततः समासाद्य पितुः समृद्धिं श्रियं विवस्वानिव शारदीनाम् ।
प्रचीयमानाप्रतिमप्रतापः सुदुःसहोऽभूत् सहसा महीशः ॥१॥

विशीर्णचापाश्वपलं[1] गरिम्णा त्यक्ता विपर्यस्तगभीरघोषाः ।
चिरादकिञ्चित्करतामवापुः पयोधरास्तस्य विरोधिनश्च ॥२॥

उदीयमानात् किल कुम्भयोनेर्जलाशयानामजनि प्रसादः ।
अस्योदये तु स्पृहणी[2]यनीतेः शुद्धाशयाः साधु ययुः प्रसादम् ॥३॥

स्वभर्तृशत्रोरुदयादगस्तेर्नूनं रुदत्यः कुररीरुतेन ।
समुद्रपत्न्यस्तनिमानमापुर्यथाऽस्य राज्ञः प्रतिपक्षकान्ताः ॥४॥

आह्लादयामासतुरुल्लसन्तौ लोकानुभौ शीतकर-क्षितीशौ ।
करैर्यथार्थैः समयेरितैस्तानेको वितन्वन्नपरस्तु गृह्णन् ॥५॥

क्षीरेण सप्तच्छदपादपानां तस्य द्विपानां मदलेखया च ।
आकृष्यमाणाः समसौरभत्वाद् भ्रेमुर्द्विरेफाश्चिरमन्तराले ॥६॥

अन्तः सरागापि रुचामधीशेनालम्ब्यमाना सहसा करेण ।
नितान्तमौग्ध्यान्मुखपद्ममुद्रामुपालि नालं नलिनी विमोक्तुम् ॥७॥

करेण रागाद्धनविप्रकीर्णं शनैः शनैरावरणं नियम्य ।
मुखं नलिन्या इव पद्मकोषं प्रकाशतां चण्डरुचिर्निनाय ॥८॥

विदूरभिन्नाधरपत्त्रमीषद् विकासिकिञ्जल्करदं दधाना ।
ससौरभोद्गारमुखारविन्दं विमुक्तनिद्रा नलिनी जजृम्भे ॥९॥

विजृम्भमाणोत्कलिका नलिन्यो दरोन्नमत्कण्टकिकण्ठनालाः ।
विस्फारितैः पङ्कजकोषनेत्रैर्निभालयामासुरिवात्मबन्धुम् ॥१०॥

चिर[3]प्रवासान्मिलितं मरालं पक्षानिलोद्धूततरङ्गलीला ।
प्रत्युज्जगामेव समालपन्ती सरोजिनी षट्पदझंकृतेन ॥११॥

कूजन्मुहुः शोणमुखः समन्ताद् व्यापारयन् पक्षमपेतधैर्यः ।
तारुण्यमत्तालिविलासलीलां सरोजिनीं हंसयुवा न सेहे ॥१२॥

प्रसारयञ्छीतकरः सु[4]दूरात् करं पर[5] खेदमिवाश्नुवानः ।
पतन् सरस्यां प्रतिमामिषेण कुमुद्वतीक्रोडमुपाससाद ॥१३॥

---

1. पला इति भवेत् ।
2. M. नीय ।
3. M. रिव ।
4. M. सू ।
5. M. नं ।

संयम्य नूनं जलदागमेन घनान्धकारे हरितोऽतिगूढाः[1] ।
सद्यः प्रपद्याथ नवाधिकारं यथावकाशं शरदा विमुक्ताः ॥१४॥
प्रसेदुषा शीतकरेण तावत्ताराकुलं तारतरं चकासे ।
यथाऽस्य पूर्णप्रतिबिम्बसङ्गात् कुमुद्वतीकाननमस्तनिद्रम् ॥१५॥
अम्भोधराणां नियतं भरेण कुत्रापि गर्ते गहनेऽतिलीनाः ।
घनव्यपाये रविरश्मिजालैराकृष्य दूरोन्नमिता इवाऽऽशाः ॥१६॥
नात्रासयत् पार्श्वचरान्मरालान्नामोदयामास मयूरवृन्दम् ।
आडम्बरः शारदवारिदानामवर्धयत् स्वं लघिमानमेव ॥१७॥
रसज्ञतायामपि सम्भवंत्यां न धैर्यवृत्तिः क्वचिदित्वरीणाम् ।
सत्येव सम्पद्वति पद्मषण्डे सप्तच्छदं यद् भजते स्म भृङ्गी ॥१८॥
सहंसलक्ष्माम्बरसङ्गिगौरपयोधरामुत्पलचारुनेत्राम् ।
प्रसन्नशीतांशुमुखीं सुतारनक्षत्रमालाभरणोपकण्ठाम्[2] ॥१९॥
विनिद्रबन्धूकदलाधरोष्ठीं शरच्छ्रियं चारुशरं दधानाम् ।
प्रकाशिपङ्केरुहताम्रपाणौ पतिर्ग्रहाणां जगृहे करेण ॥२०॥ [युग्मम्]
पुष्पासवं पत्रपुटैः पिबन्त्यः प्रवृद्धनेत्राननकण्ठरागाः ।
विश्रृङ्खलं श्रृङ्खलिताध्वनीनं जगुः सुगीतं कलमस्य गोप्यः ॥२१॥
शुष्यन्मुखः संमुखमापतन्तं विच्छेदखेदं गणयन्निवान्तः ।
आलम्बमानो नलिनीं नतेन मूर्ध्ना श्लथोऽभूत् कलमः क्रमेण ।२२॥
उपैतुकामा कलमान् विदूरान्मरालनिह्लादमथो निशम्य ।
शुकावलिः शङ्कितशालिगोपीमञ्जीरतारक्वणिता निवृत्ता ॥२३॥
घनोदितानां तमसामपायात् सुनिर्मलं वीतजडानुसङ्गम् ।
ज्योतिःप्रकाशाद्विलसत्प्रसादं बभौ नभः संयमिनामिवान्तः ॥२४॥
नवप्रबुद्धाम्बुरुहप्रताना वितायमानारुणरम्यरोचिः ।
निरस्तनिःशेषघनान्धकारा शरत् प्रभातस्य बभार शोभाम् ॥२५॥
तुरङ्गचारोचितराजमार्गां व्यपेतजीमूतघनान्धकाराम् ।
शरच्छ्रियं सौम्यसरित्प्रवाहां[3] स वीक्ष्य वीतप्रतिपक्षशङ्कः ॥२६॥
पुरोधसा धौम्यसमौजसाऽथ धर्मावतारोऽधिपतिर्धरित्र्याः ।
प्रातिष्ठत प्रात्यहिकं समाप्य कृत्यं कृती कार्त्तिकमासि तीर्थम् ॥२७॥

1. M. ढः । 2. M. ण्ठम् । 3. M. हा ।

स पुष्करं पुष्करपत्रनेत्रः स्वनेत्रयोराभरणीचकार ।
निर्वाणरत्नस्य खनिं जगत्याः श्रेयः समापन्नमिव द्रवत्वम् ॥२८॥
तपस्विना कुम्भसमुद्भवेन निपीतमालोक्य पतिं नदीनाम् ।
कल्पान्ततल्पं प्रथमेन पुंसा मन्ये परं तोयशयेन सृष्टम् ॥२९॥
सप्तापि गाधान् सरितामधीशानल्पप्रमाणान् पुरतः परीक्ष्य ।
क्रीडाविमर्दक्षममादिमेन क्रोडेन किं निर्मितमष्टमं वा ॥३०॥ कुलकम् (?) ॥
तं तत्र विश्रान्तदृशं धरित्रीपुरन्दरं वीक्ष्य पुरः पुरोधाः ।
प्रस्ताववित् प्रस्तुतवस्तुतत्त्वविवेचनीं[1] वाचमिमां बभाषे ॥३१॥
त्रिधा[2] विभक्तात्मतनोरमुष्य धृतावतारस्य जगद्धिताय ।
नामापि कामं समुदीर्यमाणं नारायणस्येव पुनाति विश्वम् ॥३२॥
वसुन्धरामुद्धृतवान् वराहः प्रादुर्भवन्[3] पूर्वमिहैव नूनम् ।
सप्तापि पातालतलान्यतीतस्तस्य स्थितो निर्गममार्ग एषः ॥३३॥
जगत्त्रयीपावनसावधानास्तिस्र[4]स्तनूरस्य विलोक्य नूनम् ।
उपेन्द्रपादाब्जभवाऽम्बुवेणी त्रिमार्गगा धर्व[5]धुनी बभूव ॥३४॥
वृन्दानि वृन्दारक[6]नायकानां सप्तर्षयो ब्रह्मविदश्च सिद्धाः ।
तप्त्वेह तीर्थप्रवरे तपांसि प्रपेदिरे स्वानि पदानि तावत् ॥३५॥
दिवोऽवतीर्णैर्हरिचन्दनानां निर्माय पर्णैरिह पर्णशालाः ।
वल्कं वसानैरमरद्रुमाणां तपोऽत्र चीर्णं चिरमादितेयैः ॥३६॥
मन्दाकिनी यत्र ममौ विधातुः कमण्डलौ मण्डलितप्रवाहा ।
तं कोटिशः पूरयतोऽप्यमुष्य न पूर्णता स्तोकमपि व्यपैति ॥३७॥
उद्गा[7]यतामत्र समं चतुर्णां शृण्वन्मुखेभ्यश्चतुरोऽपि वेदान्[8] ।
चतुर्मुखीकण्ठनिनादशङ्की चमत्कृतिं याति जरन्मरालः ॥३८॥
अन्ते वसन्तः कलशिञ्जितानां वाणीपदाम्भोरुहनूपुराणाम् ।
हिन्दोलनाकौतुकमन्वभूवन् हंसा विधेरस्य ततैस्तरङ्गैः ॥३९॥
तीर्थान्तराणामपि कोटयोऽस्य सेवाविधिज्ञाः सविधे सदैव ।
अध्यासते साधयितुं स्वशक्तिं पुंसामसाधारणशुद्धिदात्रीम् ॥४०॥

---

1. M. नी । 2. M. वा । 3. M. त ।
4. M. स्र । 5. स्वर्ग इति स्यात् । 6. M. का ।
7. M. दा । 8. M. दा ।

एकैकमस्मात् कमलं विचिन्वन्नवं नवं प्रत्यहमासनाय ।
सरोजिनीखण्डमखण्डरूपमपालयत् कौतुक[1]तो विरिञ्चिः ॥४१॥
अत्रावदातं शतपत्रजातं भृङ्गैः क्वचिन्मेचकितं चकास्ति ।
सव्योम शङ्के शरदभ्रखण्डं सूर्यांशुतापात् पतितं पयःसु ॥४२॥
नवेन्दुवक्राऽविरतं बिभर्ति विशालशोभां बिसकन्दलीयम् ।
मग्नस्य मध्येसलिलं सलीलं दंष्ट्रेव भूदारतनोर्मुरारेः ॥४३॥
गाहन्त एते गहनं न पाथः पाथोजिनीपल्लवभङ्गभीताः ।
दिग्दन्तिनो दूरत एव गण्डं गण्डूषितैरम्बुभिरार्द्रयन्ति ॥४४॥
अन्तर्विशत्षट्पद[2]राजिराजत्[3] सिताम्बुजस्तोममिषेण मन्ये ।
शरीरवान् सत्त्वगुणोऽत्र मूर्तं तमः समस्तं कवलीकरोति ॥४५॥
अद्याप्यमुष्मिन्नरुणद्युतीनि सद्यः प्रबुद्धानि सरोरुहाणि ।
विरिञ्चिवक्त्रप्रतिबिम्बबुद्ध्या क्रुद्धा न हंसाः परिमर्दयन्ति ॥४६॥
अपारयन् प्राणिवधं विधातुं व्यपेतपङ्केऽत्र वको वराकः ।
कारण्डवास्वादितकोमलाग्रैः शैवालकैर्वर्तयते कथञ्चित् ॥४७॥
महान्तमप्याश्रितवान्नितान्तं नीचो न[4]नीचां प्रकृतिं जहाति ।
स्वच्छन्दपद्मेऽपि सरोवरेऽस्मिन् यच्छैवलं शीलयते वकोटः ॥४८॥
अस्मिन्निशायामपि पुष्पितानां सरोरुहां रेणुभरैः पिशङ्गम् ।
स्वकान्तबुद्ध्या किल चक्रवाकी चक्राङ्गमाक्रन्दपराऽनुयाति ॥४९॥
स्वयं विधाता स विधिर्विधीनां संकल्पमालोपचितैः पदार्थैः ।
त्रेतामिहाधाय जुहाव कुर्वंस्त्रयीगिरो निखिलगुणाः कृतार्थाः ॥५०॥
स्वयं स ईशः सकलस्य कर्ता समं समस्तैरपि दैवतैस्तैः ।
मखैरखण्डैः कतमं नु देवं संप्री[5]णयामास न[6] तं विदामः ॥५१॥
हुताशने यद्विधिवद् वितीर्णं सुधाभुजां नाम सुधा तदेव ।
वषट्कृतं यद्विधिनात्मनैव तत्रा[7] कः कल्पयितुं क्षमेत ॥५२॥
सत्यामपि प्रार्थितवस्तुसिद्धेः समग्रतायामिह सप्ततन्तौ ।
वनान्तराद् व्यो[8]मसदां समूहः समित्कुशादीन् स्वयमाजहार ॥५३॥

---

1. M. का ।　　2. M. षयद् ।
3. M. जा । (अर्धतकारो नास्ति) ।　　4. M. ल ।
5. M. प्रा ।　　6. M नन ।　　7. 'तन्नाम' इति स्यात् ।　　8. M. स्यो ।

हविर्भुजस्तत्र पवित्रिताशे वितायमाने दिवि दिव्य[1]गन्धे ।
अमन्दमन्दारमरन्दधारासौरभ्यमभ्यस्तमाप लीनम् ॥५४॥
तस्मिन्मखे ब्रह्मविदामृषीणां यः सामघोषस्त्रिदिवं जगाम ।
तिरोदधे दैवतदुन्दुभीनामनारतं तेन गभीरनादः ॥५५॥
शुद्धिं वितन्वन्मलिनोऽपि सत्त्वं प्रकाशयन्नत्र तमोमयोऽपि ।
स्वयंभुवा संभृतसाधुहव्याद् धूमः कृशानोरुदभूदुदग्रः ॥५६॥
इत्थं वितन्वन् विधिवद् वितानमुत्प्रेक्ष्य विघ्नस्य पुरोऽवतारम् ।
विधिर्विधित्सुः प्रतिकारमस्य दिदेश दृष्टिं दिवसाधिनाथे ॥५७॥
बिम्बादथाम्भोजवनस्य बन्धोः स्वधामसंदोहनिगूढदेहः ।
अवात[2]रद् वातरयेण कश्चित् पुमान् पुरस्तात् परमेष्ठिनोऽस्य ॥५८॥
बाणासनं सज्यमसिं सशक्तिं महेषुधी मार्गणपूगपूर्णौ ।
बिभ्रच्चतुर्बाहुरवार्यवीर्यो वधं विधास्यन्मखबाधकानाम् ॥५९॥
ध्रुवं चतुर्बाहुरिति प्रसिद्धः स **चाहु आणः** किल लौकिकोक्त्या ।
वंशस्य कर्ता भवतां बभूव संरक्षितोऽधिक्षिति विश्वधात्रा ॥६०॥
लोकालोकेनेव भूर्लोकमेतत्तीर्थश्रेष्ठं तीर्थबन्धैः समन्तात् ।
सम्भाव्यैतत्सम्भृतैः कीर्तिपूरैः पृथ्वीमेतां पूरय क्षोणिपाल ॥६१॥
वर्षाण्येव द्वादशास्मिन्नुषित्वा स्वेच्छाभोज्यैस्तर्पयन् भूमिदेवान् ।
लब्धासि[3]त्वं ब्रह्मसायुज्यमग्रे यद् दुःप्रापं यज्व[4]नां भूरियज्ञैः[5] ॥६२॥

इति सूरजनचरिते महाकाव्ये
सप्तमः सर्गः ॥७॥

---

1. M. रुच्य। 2. M. वता। 3. M. ध्वाशि।
4. M. ज्ञ। 5. M. ज्ञै।

[अष्टमः सर्गः]

इति निशम्य गिरोऽथ पुरोधसः श्रितमनोरमपुष्कररोधसः ।
समनुमोदितवान्मुदितः प्रभुर्हितवचो हि सताममृतायते ॥१॥

अदिशदाशु च दाशरथिप्रभश्चतुरदासजनान् स जनाधिपः ।
सपदि पुष्करतीर्थपरिष्कृतौ व्रजत संप्रति सोद्यमतामिति ॥२॥

उपलदारणदारुणवर्त्तनाः परशुपट्टिशटङ्कपरिच्छदाः ।
प्रचलिताश्वपलं चपलेरितैः कलकलैरथ जानपदा जनाः ॥३॥

गुरुवरण्डकरज्जुभिरूर्जिता जितयमानुचरव्रजडम्बराः ।
मृगयुवन्मृगयूथमुपाद्रवन् द्रुतपदध्वनिनाऽध्वनि केचन ॥४॥

अगणितोन्मदवारणयूथपाः प्रसभरुद्धबिलेशयकन्दराः ।
शिखरिणां शिखराणि समापतन् प्लवगतैरपरे प्लवगा इव ॥५॥

उपरिगप्रतिबिम्बविभावनात् प्रतिमुहूर्तमुपस्थितसंभ्रमाः ।
अघटयन् घटकाः कटकान्तरे प्रणिहिताः स्फटिकोपलपट्टकान् ॥६॥

गिरिदरीशयिताः[1] शरदम्बुदाः स्फटिकपट्टधियो[2]द्यतपट्टिशैः ।
अभिहता जनताः[3] समताडयन् सपदि सस्तनितैस्तडिदग्निभिः ॥७॥

निहितमूर्ध्वमुपस्कृतमञ्जसाऽञ्जनशिलाफलकं तलशालिभिः ।
नवघ[4]नाभमुदीक्ष्य जनावृतं न विजहुर्विपिनं बत बर्हिणः ॥८॥

विकटटङ्कविदारणसम्भवैररुणितं घनगैरिकरेणुभिः ।
क्षितिभृतः क्षतजद्रववद् बभौ बहलनिर्झरनीरमनारतम् ॥९॥

परशुपातपरासुमहातरुप्रपतनोत्पतदायतनिस्वनैः ।
क्षितिभृदार्त्तरवं व्यतनोदिव प्रतिरवैर्मुखरीकृतदिङ्मुखैः ॥१०॥

उपलताडननिष्ठुरनिस्वनव्रणितकर्णयुगं गिरिगह्वरे ।
उपलताभवनं वनदेवतामिथुनमुज्झितधैर्यमवर्तत ॥११॥

विदलितद्रुममुद्धृतकण्टकं चिरनिराकृत[5]वन्यमृगद्विजम् ।
विपणिनां विनिवेशमनोरमं गिरिवनं नगरं समजायत ॥१२॥

---

1. M, ता । 2. M. या ।
3. M. नतः । 4. M. घ । 5. M. ता ।

अतिबलोद्धृतदीर्घशिलाघटाः[1] सपदि निर्मलनिर्झर[2]पूरिताः ।
तनुभृतां महतामवगाहनक्षमतमाः सरितः शतशोऽभवन् ॥१३॥
अथ रथप्रतिमैर्जववत्तया जितमनोभिरनोभिरनायतैः ।
परिजनाः परितो गिरितस्ततो मणिशिलाशकलान् समुपाहरन् ॥१४॥
शुभमुहूर्तमिवास्य महीपतेः समधिगम्य नियोगमयोपगम् ।
स्थपतयः खलु पुष्कररोधसः सुनिपुणाः परिकर्म विनिर्ममुः ॥१५॥
कनकपुष्पमिव क्रमशोभितामुपरि बिभ्रदथाधिकविस्तृतिम् ।
व्यरचि कारुगणेन सुमेरुवत् समवतारचयो मणिभिः शु[3]भैः ॥१६॥
तदुपरि प्रथितोज्ज्वलतेजसा प्रतिदिशं पृथिवीपतिना ततः ।
मणिहिरण्मयहर्म्यनिवेशनं दिविषदामुपदीकृतमायतम् ॥१७॥
प्रथममेव[ब]भूव निवासभूः सुमनसां किल पुष्करतीर्थभूः ।
अनलदेवनिवेदितमन्दिरैरजनि सा सुतराममरावती ॥१८॥
कलियुगेऽत्र निगूहितमूर्तयोऽप्यतिमनोरमधाम जिघृ[4]क्षवः ।
उपहितायतनप्रतिमामिषाद् वव्रतिरे प्रकटास्त्रिदिवौकसः ॥१९॥
अवततार हरिर्दशधा क्रमात् समयदेशविशेषवशात् पुरा ।
युगपदेव तदेकनिकेतने दशभिराविरभूत्तनुभिर्विभुः ॥२०॥
स्फटिकदेवकुले क्वचन स्थितं जलदखंडमखंडरुचिं दधे ।
हिममयावरणोज्झितमण्डले हिमकरे हरिणस्य यथा वपुः ॥२१॥
दिविषदायतनान्यभितस्तदा तरुणचारुतरारुणपल्लवैः ।
व्यरचयत् फलपुष्पपुरस्कृतान्युपवनानि घनान्यवनीपतिः ॥२२॥
नच नवस्तवके सुरभूरुहां रतिपतेर्न तथा च शरासने ।
अतितमां रतिमानशिरे यथा तदधिगत्य वनं मधुपाङ्गनाः ॥२३॥
सपदि तत्र वनेऽवनिमण्डने फलमनेकविधं यदजायत ।
तदुपयुज्य तपस्विगणः स्फुटं निजतपः फलितं सममन्यत ॥२४॥
अथ विधाय विधेयमखण्डयन् गुरुगिरां गरिमाणमकैतवम् ।
नरपतिः प्रयतश्चिरमुत्सुकप्रिय[जनां स्व]पुरं धृतिमान् ययौ ॥२५॥
अजनि तस्य सुतः सुकृतालयः क्षितितले **जगदेव** इति श्रुतः ।
विपुलसत्त्वगुणो जगतोऽप्यलं वितरणाय वनीयकवत्सलः ॥२६॥

---

1. M. वटाः । 2. M. भंर । 3. M. सु । 4. M. घ ।

उपचितो जगति प्रथितैर्गुणैर्गुणिसमाजसमादरमण्डितः ।
प्रतिहतप्रतिपक्षगणोन्नतिर्वसुमतीमशिषद् वशिनां पतिः ॥२७॥
विशदकीर्तिमतीव विशालयन् विसलतामिव तामरसाकरः ।
स किल **वीसलदेव**मजीजनद् वसुसमानगुणं वसुधाधिपः ॥२८॥
सुचरितैः सततं जनरञ्जनव्यसनिनः खलु वीसलदेवतः ।
अजपाल इति प्रथितः सुतो रिपुसमाजजयी समजायत ॥२९॥
अपि नरेन्द्रपरम्परयागतं पदमवाप्य नवाधिपतिर्भुवः ।
स्वमहसा सहसा बहुसम्पदा बहलयन् नवमन्यदिवाकरोत् ॥३०॥
यदलभन्त पुरा पृथिवीभुजो विजययानचमूचरडम्बरैः ।
स्वनगरे निवसन्नयकोविदः स तदवाप यशः प्रहसन्मुखः ॥३१॥
तरुणयन्मिथुनेषु परस्परप्रणयबंधमपाकृतकैतवम् ।
सुरभयन्नथ मन्दसमीरणं सुरभिराविरभूदभितो वनम् ॥३२॥
मलयमारुतचारु[त]राधुतस्तवकदम्भमनोरमचामरैः ।
अतिरसादतिमुक्तलता किमु स्मरसखं समयं समवीजयत् ॥३३॥
स्फुटलवङ्गलतानवसङ्गिनां मधुलिहां निनदः सम[1]मूमुहत् ।
कुसुमबाणशरासनशिञ्जिनीध्वनिरिवाध्वगवामदृशां मनः ॥३४॥
श्रियमधत्त मधूद्यम[2]संभृतां कुटिलकिंशुककोरकधोरणी ।
स्मृतिभुवोऽर्धशशाङ्कशिलीमुखावलिरिव प्रलयाय वियोगिनाम् ॥३५॥
अधरपल्लवविमर्दभयादिव क्षणविकम्पिकराकृतिपल्लवाम् ।
मुखपटाभमुदस्य रजोभरं मृदु चुचुम्ब मरुन्नवमाधवीम् ॥३६॥
सहजमेव समेत्य मधु श्रिया विकलयेत् पथिकान् वकुलद्रुमः ।
किमुत मेदुरितो मदिरेक्षणावदनवासितसीधुसुधारसैः ॥३७॥
अदशदाम्रलतानवपल्लवं सुललितस्वरहेतु कुहूमुखः ।
अभवदाशु वियोगिमृगीदृशां[3] हृदयमर्मणि दारुणवेदना ॥३८॥
स्मृतिभुवः श्वसितैरिव शीतलैरपि नितान्तमरुन्तुदकर्मभिः ।
अजनि चेतसि मन्दसमीरणैश्चिरममन्दरुजाऽध्वगयोषिताम् ॥३९॥
अधिवनान्तमशोकमहीरुहः स्फुटमशोभत कोमलपल्लवः ।
निहितदोहदमिन्दुमुखीपदं किमु सभाजयितुं प्रसृतः करः ॥४०॥

---

1. M. मु । 2. 'मधूद्गम' इति स्यात् । 3. M. शं ।

ज्वलयताऽथ पलाशमयेन्धनैर्मनसिजज्वलनं मधुयज्वना ।
विरहिणामभिचारमखे द्विजः प्रथम ऋत्विगकारि वनप्रियः ॥४१॥
दिनकृतोज्झितदक्षिणवर्त्मना प्रथयताऽतिकठोरकरोच्च[1]यम् ।
अहरहः परितापमुपेयिवान् नृपतिनेव कु[2]नीतिमता जनः ॥४२॥
परिमलैः परितः पवनेरितैर्विविधपुष्पसमृद्धिसमुद्भवैः ।
तत इतो ह्रियमाणमनाः क्वचित् स्थितिमधान्न मधुव्रतसन्ततिः ॥४३॥
कुसुमपल्लवदुर्ल[3]लिता लताः परभृतां[4]विरुतानि वनानिलः[5] ।
परममीभिरकारि वशे जगद् विभुतयैव यशो लभते स्मरः ॥४४॥
विधिवशः प्रसवोऽस्तु यथा तथा कुरुवकान्न परो रसिकस्तरुः ।
सकृदुपात्तवधूपरिरम्भजाः शिथिलिता यदमुष्य न कण्टकाः ॥४५॥
किमतिमुक्त तवापि बतेदृशी चपलता मधुपीकुलसङ्गमे ।
इति लसत्कुसुमैर्नवमालिका किमु जहास रसान्नवपुण्ड्रकम् ॥४६॥
सुरभिमासि कृशाङ्गि मृषा रुषो ग्रहिलता न हिताय तवेदृशी ।
इति निषिद्धवतीव मनस्विनीमनिलकम्प्रदलाङ्गुलिभिर्लता ॥४७॥
अनुपतद्भ्रमरावलिभेरिकाघ[6]नरवैः प्रतिवेश्म परिभ्रमन् ।
मदनयामिकवन्मलयानिलो मुहुरजागरयन्निशि नागरान् ॥४८॥
वनसमीरण[7]मन्थर चा[8]लनप्रतिदलोज्ज्वलदिन्दुमरीचयः ।
अदलयन्नयनानि वियोगिनां प्रतिनिशं तरवो घनपल्लवाः ॥४९॥
धृतनिजासनसक्तगुणं वधूकुलमदीव्यत दोलनविभ्रमैः ।
प्रियगुणग्रथितान् पथिकप्रिया मुहुरसूनधिकण्ठमदोलयन् ॥५०॥
हतहिमावरणः परिशीलयन् कमलिनीं मिलितां बहुकालतः ।
स्फुटमतृप्तमना दिननायकः शिथिलरथ्यरयः शनकैरगात् ॥५१॥
नियतमम्बुजिनीमविलोकयन्नजनि मन्दरुचिः शिशिरे रविः ।
इतरथा कथमेतदुदीक्षणात् प्रकृतिमाप पुनर्भगवान्निजाम् ॥५२॥
दिनमुखोपचितं हरितां मुखान्मलि[नि]मानमुदस्य मरीचिमान् ।
कलहखेदितवल्लभचेतसामधिमुखं निदधे हरिणीदृशाम्[9] ॥५३॥

---

1. M. द्व । 2. M. च्कु । 3. M. र्ला ।
4. M. ता । 5. M. ल । 6. M. श्व ।
7. M. णं । 8. M. वा । 9. M. शी ।

सुवदना रदनच्छदकोमला नवविमुक्तपुटा मृदुपल्लवाः ।
असितदृक्छ्वसितप्रतिरूपका मलयशैलसखा वनवायवः ॥५४॥

नववधूनिभृतालपितोपमाः परभृतापरिषत्कलनिस्वनाः ।
पृथगपि प्रभवेयुरयोगिनां विशसने किमुताधिकसंहताः ॥५५॥

विततबहुविधप्रसूनमालां भृततिलकां किल काञ्चनाढ्यभूषाम् ।
नरपतिरथ निर्ययौ तदानीं दयिततमामिव वीक्षितुं वनालीम् ॥५६॥

इति सूरजन-चरिते महाकाव्ये

अष्टमः सर्गः ॥८॥

[नवमः सर्गः]

अवनीरमणो[1] मनोरमाभिः कियतीभिः कुतुकेन कामिनीभिः ।
कुसुमाकरकौशलं दिदृक्षुर्निजमाराममथोज्ज्वलं जगाम ॥१॥
जितपल्लवविभ्रमाः कराग्रैर्विहसंत्यो नखरोचिषा प्रसूनम् ।
मुखरैः करनूपुरैरलीनां दुरहङ्कारमनारतं हरन्त्यः ॥२॥
भणितैरनृतीकृतामृतौघैः कलकण्ठीविरुतानि कुण्ठयन्त्यः ।
शिथिलां सुरभिश्रियं वितेनुः प्रविशन्त्यः पृषतीदृशो वनान्तम् ॥३॥ युग्मम् ।
करमर्पयितुं कृतानुबन्धां नवसूनस्तवकेषु वामनेत्राम् ।
प्रतिषेद्धुमसूयया किमुच्चैः कृतनादं मधुपालिरुच्चचाल ॥४॥
अविसह्यमनङ्गकिंकरीभिः सहकाराङ्कुभङ्गमङ्गनाभिः ।
अवलोक्य विदू[र]मुत्पतन्ती विकला किं पिककामिनी चुकूज ॥५॥
घनकुञ्जतिरोहितं ध्रुवत्यास्तरुमुच्चैः कुसुमाशया युवत्याः ।
कलकङ्कणझंकृतं निशम्य क्षणसम्भावितवैशसा सपत्नी ॥६॥
स्फुरिताधरपल्लवा सकम्पा पवमानोल्लसितेव कापि वल्ली ।
अरुणं मुखमातपेन भूयोऽप्यरुणिम्नैव तिरोहितं वहन्ती ॥७॥
द्रुतमुच्चलितुं कृतप्रयत्ना विनिरुद्धा घनवीरुधां वितानैः ।
सहसाऽवचितैः सह प्रसूनैर्न दुकूलं गलितं विदांचकार ॥८॥ कुलकम् (?) ।
जननावधि सेवितां नितान्तं बत सत्स्वामिवधूमिवान्तरार्द्राम् ।
स्वपदव्यसनेऽपि षट्पदाली सुमनःसन्ततिमन्वियाय दूरम् ॥९॥
नमितो नहि नावधूनितो वा क्रमितो[2] नांकुशसंकुलैरुपायैः ।
स्वयमेव समाकिरत् प्रसूनैर्वकुलो लम्भितदोहदो वधूभिः ॥१०॥
सुचिरं कुसुमानि केसराणामवकीर्णान्यपि मारुतेन दूरात् ।
यदखण्डितसौरभाणि रामामुखमाध्वीकरसस्य स प्रभावः ॥११॥
परिहासपुरःसरं प्रियेण प्रहितस्य स्थलकमलस्य (?) रेणुः ।
अविशन्नयनान्तरं नताङ्ग्याः वव्रृते बाष्पतरङ्गिणी सपत्न्याः ॥१२॥
अरुणैस्तरुणेन रेणुपूरैः परितो रञ्जितमाननं मृगाक्ष्याः ।
नतमानयति स्म शोणिमानं गुरुमन्युः प्रतिकामिनीजनस्य ॥१३॥

---

1. M. माणो । 2. M. क्रसितो ।

अवचित्य पुरोगतानि तावत् कुसुमानि त्वरितैव पञ्चषाणि ।
करमध्यगतानि गोपयन्ती सविधे मुग्धवधूर्मनोधिपस्य ॥१४॥
निपुणे निजदेवमर्चयेति प्रथिताकूतमुदाहृताथ सख्या ।
कुटिलीकृतपाटलांतनेत्रा वदनेऽस्याः क्षिपतिस्म तानि तूर्णम् ॥१५॥
नवखण्डितपल्लवावलीनां क्षरितक्षीरकषायितः क्रमेण ।
श्रमसीकरजालकेऽबलानां क्षणमस्पन्द इवास गन्धवाहः ॥१६॥
स मुदा समुदायमङ्गनानां श्रमखेदादलसालसं चलन्तम् ।
न विवेद विदूरतां भजन्तं वनलक्ष्मीविनिभालनान्नरेन्द्रः ॥१७॥
अवगाह्य च काननं महीपः स मुहूर्तादथ देवतासहायः ।
अवलोकयति स्म लोकपालप्रतिमल्लः कमलाकरं प्रफुल्लम् ॥१८॥
तटसीमनि तस्य वेदिकायां स्फुटकंकेल्लिनिकुञ्जरा[1]जितायाम् ।
अमृताञ्जनतामयं निनाय स्वदृशोः कामपि कामिनीमपूर्वाम् ॥१९॥
चिकुरार्पितदिव्यदामगन्धादुपरिष्टात् परितो विवर्तमानैः ।
शिखिपत्त्रकृतातपत्रकान्तिं कलयद्भिर्भ्रमरैर्निषेव्यमाणाम् ॥२०॥
पतनोत्पतनाकुलद्विरेफं मुहुरुन्मुद्रणमुद्रणाभियोगात् ।
स्फुरदङ्गुलिमृद्यमानपत्त्रं क्रमयन्तीं कमलं करस्थनालम् ॥२१॥
मदनज्वरमुल्बणानुबन्धं मदनेऽपि प्रसभं निवेशयन्तीम् ।
नवविभ्रमसम्भृतैरपाङ्गैरपि चिल्लीदलताण्डवप्रसङ्गैः ॥२२॥
वशिनां प्रथमोऽपि पार्थिवेन्द्रः स तदालोकसमानकालमेव ।
युगपद् विशिखैः प्रसूनकेतोरभवन्मर्मणि पञ्चभिर्विभिन्नः ॥२३॥
विनियम्य च मानसं प्रयत्नात् क्षणमक्षीणमतिः पतिः पृथिव्याः ।
इदमन्तरचिन्तयत्तदानीं बहुभिर्व्याकुलितेन्द्रियो वितर्कैः ॥२४॥
किमियं वनदेवतैव तावन्मधुलक्ष्मीः किमु लक्षणीयमूर्तिः ।
वरुणालयसोदरादमुष्माद् वरुणश्रीः सरसः किमुन्ममज्ज ॥२५॥
इदमद्भुतकौशलं विधातुर्मदिराक्षीरमणीयताविधाने ।
त्रिदिवेऽपि सुदुर्लभं प्रतीमः किमुतास्मिन्मसृणे मनुष्यलोके ॥२६॥
मधुना मधुरीकृते वनेऽस्मिन् सततं सन्निहितः प्रसूनबाणः ।
विजने विजरीहरीति तस्य प्रतिकुञ्जं सहधर्मचारिणी वा ॥२७॥

---

1. M. रं ।

कुसुमाकरशीलिते वनेऽस्मिन्मदनः संनिहितः सहैव रत्या ।
रतिरेव विभाव्यते पुरस्तादतनुत्वादपरः परोक्ष एव ॥२८॥
स्वयमेव समीपमेत्य तावत् प्रणयप्रश्नपुरःसरं कृशाङ्ग्याः ।
कुलजातिनिवासचेष्टितानि प्रतिपत्स्ये निखिलानि सावधानः ॥२९॥
इति चिन्तयति क्षणं क्षितीशे मदनाकूतमरं तरङ्गयन्ती ।
अविशत् सरसीहृदं तदन्तःकरणं चापि समं सुमध्यमा सा ॥३०॥
अथ रीतिममानुषीममुष्याः प्रविलोक्याकृतिविभ्रमानुरूपाम् ।
सुविषण्णमना मनोरथानामपि दुःप्रापमभीप्सितं स मेने ॥३१॥
स तथागतया तयैव शक्त्या नृपतिर्मर्मणि कीलितः स्मरेण ।
अवधूय विषेयमात्मनीनं विवशात्मा दिवसान्निनाय शून्यः ॥३२॥
धृतिमेतु धृतिः कथं नु तस्मिन् स्थितिरीतिः स्थितिमीहतां कथं वा ।
स्मृतिभूरतिभूमिमागतो यन्मतिसंस्थां समतीत्य वर्तते स्म ॥३३॥
अथ कश्चन मागधेययोगान्मिलितः संसदि सिद्धपूरुषोऽस्य ।
विनयेन निवेदितो नृपेण प्रणिधाय प्रमना मनाग् बभाषे ॥३४॥
क्षितिनायक नाकलोकतोऽपि स्पृहणीयोज्ज्वलधाम्नि नागलोके ।
भवतीष्टगुणः सुदामनाम्ना प्रथितो वासुकिवंशजो भुजङ्गः ॥३५॥
सुचरित्रपवित्रितादमुष्मादुदभूदन्वयभूषणं कुमारी ।
विदिता **विजया**ख्यया त्रिलोकीजयलक्ष्म्या इव मन्मथस्य मूर्तिः ॥३६॥
इयमायतकौतुका भ्रमन्तो क्रमतस्ते कमलाकरादधस्तात् ।
विकचाम्बुजसौरभाद् व्युदस्य द्रुतमम्भांसि कदाचिदुन्ममज्ज ॥३७॥
मधुमासविशेषितामभिख्यामभिवीक्ष्योपवनस्य वामनेत्रा ।
नववञ्जुलवेदिकानिषण्णा चिरमासीद् विरतेतरप्रसङ्गा ॥३८॥
विशिखैर्विषमायुधस्य तीक्ष्णैः कृतरन्ध्रे हृदि वेदिमध्यमायाः ।
विहरन् विपिनान्तरे त्वमस्या नयनोपान्तपथेन संप्रविष्टः ॥३९॥
परतन्त्रतया पितुः स्वभावादपि दुर्लंघ्यतया कुलीनतायाः ।
अदयं मदनेन पीड्यमानाऽप्यतिचक्राम न शीलपद्धतिं सा ॥४०॥
तदहःप्रभृति प्रतीत्य तस्याः किमपि स्वांतजवैकृतं वयस्याः ।
अपि लंघितगेहदेहलीकां परिवव्रुः परिवर्धमानशङ्काः ॥४१॥
अवशस्वतनुः प्रसूनकेतोर्विधियोगेन गता विधेयभावम् ।
बत पञ्जरगेव चक्रवाकी विकला जीवितुमेव जीवतीयम् ॥४२॥

हृदये हृदयङ्गमं भवन्तं प्रतिसन्धाय रहो निमीलिताक्षी ।
स्वजनैः प्रतिबोधिता कथञ्चित् प्रतिपेदे परमुत्तरं प्रतीपम् ॥४३॥
इति मन्मथ एवमुक्तकारी युवयोर्निर्मितवान्मिथोऽनुरागम् ।
अपरं तु फलं मनोरथानां करसंस्थं किल केवलं विधातुः ॥४४॥
स्वमनीषितसाधनाय य[1]त्नादवनीश प्रवणीकृतात्मचेताः ।
भगवन्तमनन्तरायसिद्धिं तमनन्तं त्वमनन्तरं भजेथाः ॥४५॥
कतिभिर्दिवसैर्जगन्निवासे वरिवस्याविधिना तव प्रसन्ने ।
भुवनत्रयमप्यधीनमेतत् किमु पातालतलस्थितैकनारी ॥४६॥
गिरमित्थमुदीर्य सोपदेशां स दिशं स्वाभिमतां जगाम सिद्धः ।
परमेशमुपास्य पार्थिवोऽपि प्रमनाः प्रार्थितलाभतो बभूव ॥४७॥
अथ यस्य जलाशयस्य तीरे तरुणीं तां नयनातिथीचकार ।
परवानिव निर्ममज्ज दूरं विहरन्नम्भसि तस्य भूमिपालः ॥४८॥
क्षणतः पृथुपन्नगोत्तमांगोल्लसदुत्तुंगमणीमयूखजालैः ।
अपहस्तितपीवरान्धकारं फणिलोकं स विलोकयाञ्चकार ॥४९॥
वदनैर्मदनैकतानिदानैर्विलसत्पन्नगनागरीजनानाम् ।
इतरे हसति स्म यज्जगत्यौ शशिनैकेन कृतार्थतां प्रपन्ने ॥५०॥
रजनीशदिनेशयोरयोगादविनिर्धारितवासरत्रियामे ।
अनिशं सरसीरुहं सहासं मुदिता यत्र निरन्तरं रथाङ्गाः ॥५१॥
इतरत्र यदर्जितं तपोभिः सुकृतं विस्मृतकैतवप्रपञ्चैः ।
फलमस्य महार्हमश्नुवानाश्चिरकालं निवसन्ति यत्र जीवाः ॥५२॥
न जराकृतवैकृतप्रसङ्गो न च विच्छेदविभीषिकावकाशः ।
मिथुनस्य मिथोऽनुरागबन्धो नितरां यत्र निरामयश्चकास्ति ॥५३॥
वनितास्यनिशाकरैरसंख्यैर्बहुभिर्भोगिफणामणीदिनेशैः ।
उपरिस्थितियोग्यतां दधानं किमिवाधोभुवनं बुधास्तदाहुः ॥५४॥
स ददर्श दुरासदं समन्तात् किरणैस्तत्र शशांककोटिकल्पैः ।
हिमशैलमिव द्वितीयमुर्वीतलमाविश्य पुरो विरोचमानम् ॥५५॥
परितः खचिते प्रवालमुक्तामणिमाणिक्यमहेन्द्रनीलहीरैः ।
स्थितमुज्ज्वलशातकुम्भपट्टे[2] मृदुपदम्बरसंस्तराभिरामे ॥५६॥

---

1. M. या ।		2. M. दे ।

प्रगुणीकृतकान्तिमुन्मयूखैर्मणिभिः स्फारफणो[1] परि स्फुरद्भिः ।
जगतः प्रलयं विधातुमग्रे निजदेहे निहितैरिवांशुमद्भिः ॥५७॥
मुखमुज्ज्वलमेककुण्डलेन भ्रमदालोहितलोचनं दधानम् ।
अलिभिः कलिभिन्नसाहचर्यैः परिवेशायितमास्थितैः परी[2]तम् ॥५८॥
स्फटिका......परीतं वसने नीलिमधामनी दधानम् ।
नवनीलसरोजकाननाभ्यामिव गीर्वाणतरङ्गिणी[3]प्रवाहम् ॥५९॥
अवलोक्य तमद्भुताभिरामं स भृशं सम्भ्रमसम्भृतः सभायाम् ।
प्रणिपत्य मुहुर्मुहुः फणीन्द्रं विनिबद्धाञ्जलि दूरतोऽवतस्थे ॥६०॥
अथ तं करुणाञ्चितेन किञ्चिन्नृपमालोक्य दृगञ्चलेन देवः ।
समचारयदीष[4]दन्तिकस्थे भुवमेकां भुजगे सुदामनाम्नि[5] ॥६१॥
स तथेति तदिङ्गितं तदानीमभिनन्द्य[6] द्रुतमेव काद्रवेयः ।
निजमालयमानयन्मनीषी बहुमानेन मनुष्यदेवमेनम् ॥६२॥
अतिथेः क्षितिलोकवासिनोऽस्य प्रभुणैव प्रथमं समर्थितस्य ।
उचितं रचयाञ्चकार यत्नान्नरनाथस्य समर्हणं सुदामा ॥६३॥
अवतीर्णममुं कुतोऽपि लोकादपरं मन्मथमेव मन्यमानाः ।
परिवत्र्रुरवारिताभियोगा नगरस्था वरवर्णिनीसमूहाः ॥६४॥
विजया निजया ह्रिया निरुद्धा निजसौधस्य निषेव्य चन्द्रशालाम् ।
नयने विततीकृते कृशाङ्गी बत वातायनवर्त्मनि न्यधत्त ॥६५॥
उपलभ्य च दर्शनं तदानीं तदसंभाव्यतरं मनुष्यभर्तुः ।
समरोपयदात्मजीविताशालतिकामुच्छ्वसिते पुनः स्वचित्ते ॥६६॥
अपनीतपरिश्रमं कदाचित् प्रणयेन प्रवणीकृतं फणीशः ।
तमनुक्रमवित् क्रमादपृच्छत् कुलनामाश्रयदेशकांक्षितानि ॥६७॥
मिलितः पृथिवीपतिं पृथिव्यां कृपया यः समशिक्षयद्विधेयम् ।
भुवनानि परिभ्रमन् स सिद्धः पुरुषः प्रादुरभूत्तयोः पुरस्तात् ॥६८॥
अथ सम्भ्रमतः समुत्थिताभ्यां कृतपादग्रहणस्तदा स ताभ्याम् ।
उपविश्य विशेषवित् सुदाम्ने नृपतेः कृतजन्मुदाजहार वृत्तम् ॥६९॥
अथ भगवदनुग्रहेण साक्षान्निरुपमरूपनिरूपणेन चास्य ।
गुणसमुदयमाकलय्य तस्मै नरपतये तनयां ददौ सुदामा ॥७०॥

---

1. M. फाणो । 2. M. रि । 3. M. ण ।
4. M. प । 5. M. म्नि । 6. M. वन्द्य ।

स्मरस्य स्वारस्यात्समुचितसमारम्भकृतिनः
समानेन प्रेम्णा मिलितमनसोर्यौवनजुषोः ।
विधिस्ततसं[1]वादिव्यवसितविशेषेण घटय-
न्नुदारं दाम्पत्यं समगत समग्रेण यशसा ॥७१॥

अथाभिवाद्य क्षितिपः स मान्यान् सुदामपुत्र्या समुदा समेतः ।
प्रसेदुषः पन्नगलोकभर्तुर्निदेशतः स्वां[2] नगरीं जगाम ॥७२॥

भुक्त्वाऽवनिं चिरमवञ्चितयाचकोऽयं यास्यन् वनान्तपदवीमथ यौवनान्ते ।
आसञ्जयद्विजयिनीं क्षितिपाललक्ष्मीं पुत्रे गुणोदयगरीयसि **गङ्गदेवे** ॥७३॥

इति सूरजन-चरिते महाकाव्ये
नवमः सर्गः ॥९॥

---

1. M. स्त'।   2. M. स्वा।

[दशमः सर्गः]

जज्ञे नृदेवादथ गङ्गदेवात् **सोमेश्वरो** नाम समः स्मरेण ।
राज्यं गुणप्राज्यमनुक्रमज्ञः क्रमागतं यः सुमुखः शशास ॥१॥

प्रलम्बबाहुः परिणाहिवक्षाः प्रलम्बवैरिप्रतिमल्लमूर्तिः ।
विहारभूमिर्विजयस्य भूमाविहारविन्दप्रभवेण सृष्टः ॥२॥

स्वभावरम्येण मनोजमैत्रीं स्वभाबलेनाविरतं दधानम् ।
विभावयन्ति स्म निभालयन्त्यो विभावरीकान्तममुं सुमध्याः[1] ॥३॥

शकुन्तलाभां गुणरूपशीलैः स **कुन्तला**नामधिपस्य पुत्रीम् ।
कर्पूरधारां जनलोचनानां **कर्पूरदेवी**मुदुवाह विद्वान् ॥४॥

लावण्यपुण्यामृतपूर्णवेणी मनोभुवो मूर्तिमती प्रशस्तिः ।
आसीत् कलानामधिदेवता सा विनोदभूमिश्च विदग्धतायाः ॥५॥

चिरं त्रिलोकीजयजातभूरिश्रमेण विश्रामनिमित्तमेषा ।
सारं समाकृष्य निजायुधानां स्मरेण नूनं निरमायि शक्तिः ॥६॥

असूयतासौ सुतनुस्तनूजौ जयप्रभावाविव विक्रमर्द्धिः ।
नृपस्तयोः पूर्वजमाह **पृथ्वीराजं** स **माणिक्य**मथानुजातम् ॥७॥

गुणैर्महार्घैर्महसा यशोभिरन्योन्यसाध[2]र्म्यमुभौ दधानौ ।
सौभ्रात्रसम्पादितशुद्धचित्तावैक्यं दधाते स्म यथाश्विनेयौ ॥८॥

विभज्य राज्यं भुजवीर्यभाजौ पित्रा प्रणीतं प्रतिपालयन्तौ ।
निशाकरार्काविव न स्वकीयमतीयतुस्तौ समयं कथञ्चित् ॥९॥

पित्रार्पितायामवितृप्तचेताः सम्पद्यथ प्राप्तगुणप्रकर्षः ।
ज्यायांस्तयोः सन्ततमात्मतेजःसमृद्धिसाध्यां विभुतामियेष ॥१०॥

पुरो बहिः क्वापि विहारभूमौ वसन्तमेनं प्रतिहारपाली ।
समागतां काञ्चन **कान्यकुब्जा**न्न्यवेदयत् पार्श्वचरी प्रगल्भाम् ॥११॥

तदिङ्गितेनाधिगतप्रवेशा विधाय शश्वन्नृपतौ प्रणामम् ।
पृष्टा समाचष्ट समाहितासौ हितार्थिनी भर्तुरथाऽऽत्मजायाः ॥१२॥

यमश्ववारा नवलक्षसंख्याः संख्येष्वसंख्येयगुणं भजन्ते ।
कन्या ततोऽजायत **कान्यकुब्ज**क्षितीश्वरात् **कान्तिमती**ति नाम्ना ॥१३॥

---

1. M. समध्या ।   2. M. धा ।

सुवर्णशैलात् पृथिवीविभागं पयांसि पीयूषपयोधिमध्यात् ।
तेजः शरच्छीतमरीचिबिम्बाच्छ्रीखण्डशैलानिलतस्तदंशम् ॥१४॥
आकाशमाकृष्य पुनः स्वकीयतूणीररन्ध्रान्निजनैपुणेन ।
विनिर्ममे काचन सृष्टिरन्या मन्ये मनोजेन मनोहरा सा ॥१५॥　युग्मम् ।
निर्माय तां मन्मथजैत्रसिद्धिमाकृष्टसारा विधिना पदार्थाः ।
ये न्यक्कृताः किं नु त एव जाताः सुधा-सुधांशूत्पल[1]-पङ्कजाद्याः ॥१६॥
सुधामयः कोऽपि भवेत् पयोधिर्मथ्नाति तं चेत् स्वयमेव कामः[2] ।
जायेत चेत् काचन तत्र लक्ष्मीः समानतामञ्चति सैव तस्याः ॥१७॥
एकैककर्मण्युचिते समर्थाः संमोहनाद्या[3] मदनस्य बाणाः ।
इयं तु तस्य स्फुटयत्यजस्रं कर्माद्भुतं मार्गणपञ्चकस्य ॥१८॥
अभ्यास[4]मभ्यासवशादुगतायाः पितुः कदाचित्तनुमध्यमायाः ।
कर्णान्तरस्था विविशुस्त्वदीया गुणोच्चयाश्चारणगीयमानाः ॥१९॥
सा वर्तमाना तरुणिम्नि नव्ये कामे द[5]धत्यङ्कुरितामवस्थाम् ।
येते निगूढान्यपि मानसानि निगूहितुं सन्ततमीहितानि ॥२०॥
निजेन्द्रियेभ्योऽपि निगूह्यमानं गाहेत कोऽन्तःकरणं कुमार्याः ।
अनन्यजन्माऽयमनन्यवृत्तिरुपायतो यन्मतिमानुपास्ते ॥२१॥
[6]कलाविलासेप्यलसं कृशांग्याः ससञ्ज नालं जनरञ्जनाय ।
क्रीडाविनोदेषु विनोदितेच्छं सखीसमाजे न ममज्ज चेतः ॥२२॥
दिने दिने दूनधियो नताङ्ग्याः प्रपद्यमानं परिपाण्डिमानम् ।
सुवर्णपङ्केरुहकान्ति वक्त्रं बभूव दुर्वर्णसरोजवर्णम् ॥२३॥
प्रतिक्षणं क्षामतरीभवन्त्या भवत्कृते पाण्डरदीर्घमस्याः ।
चकर्ष कृष्णप्रतिपन्मृगाङ्कबिम्बस्य कान्तिं मुखमुत्पलाक्ष्याः ॥२४॥
जानौ कफोणिं शिथिले कपोलं कराम्बुजन्मन्यथ नासिकायाम् ।
निधाय दृष्टिं त्वयि चित्तवृत्तिं निनाय दीना कतिचिद्दिनानि ॥२५॥
अथैकदा कन्दलितानुरागा यामे तुरीये किल यामवत्याः ।
स्वप्नान्तरे कञ्चन पञ्चबाणसमानकान्तिं सुमुखी ददर्श ॥२६॥

---

1. M. ल्प ।　2. M. यः ।　3. M. या ।
4. M. श ।　5. M. व ।　6. M. का ।

ततस्तदीयाननपूर्णचन्द्रविलोकनान्मानसमिन्दुमुख्याः ।
विमुक्तमर्यादमभूत्तरङ्गै[1]र्गभीरमप्यम्बु यथाऽम्बुराशेः ॥२७॥
कुरण्टं विवेकांकुशमाशु कृत्वा व्रीडाख्य-वारीं विघटय्य दूरे ।
छित्त्वा तदन्तःस्थितिश्रृंखलां च बभ्राम कन्दर्पमदद्विपेन्द्रः ॥२८॥
मृगीदृशा संसदि सङ्गिनीनां हासप्रसङ्गे विहितं तया यत् ।
शुष्काधरे शीर्णरुचि स्मितं तन्नालं कपोलस्य विकासनाय ॥२९॥
कुशेशयाक्षी निशि निःशलाके यदश्रुपूरं विजहौ निषण्णा ।
उच्छूनशोणेक्षणमञ्जनेन स्नातं तदावेदयदाननाब्जम् ॥३०॥
न्यस्तं स्तनान्ते तनुमध्यमाया बलात् सखीभिर्नलिनीपलाशम् ।
तदुष्मणा तत्क्षणमेव शीर्णं निश्वासझंझापवनैर्विकीर्णम् ॥३१॥
मृणालजालं यदि नाम तीव्रतापेन नीयेत न नीलिमानम् ।
निश्चीयतां निश्चलदेहवल्ली कथं नु तस्मिन्मिलिता मृगाक्ष्याः ॥३२॥
निर्बन्धपृष्टाप न सन्दधाति प्रश्नानुरूपोत्तरमातुरा सा ।
[2]बाष्पाम्बुरुद्धार्धपदं कदाचित् स्वयं गृणीते तव नाम तन्वी ॥३३॥
ऋज्वी यदीन्दोश्चरमा कला स्याद् यद्युष्मभावं च भजेदभीक्ष्णम् ।
तदा मनोजाग्नितनूकृतायास्तनोरमुष्यास्तुलनामुपैति ॥३४॥
सर्वेन्द्रियाणि प्रतिपत्तिशून्यान्यस्या दधत्याः सततं वयस्याः ।
विलोचनोन्मीलनमीलनाभ्यां प्रबोधमूर्छे परमुन्नयन्ति ॥३५॥
अवाप्तदाहस्तनुते स्म दाहं मूर्छां गतोऽसौ व्यतरच्च मूर्छाम् ।
मन्ये मनोभूरतनुत्वमस्यै निजं पदं दित्सति सेव्यमानः ॥३६॥
अत्रान्तरेऽरुन्तुदमन्यदेव दैवेन वैमुख्यभृतोपनीतम् ।
जामातरं प्रार्थयते प्रतीपो राजानमन्यं जनको यदस्याः ॥३७॥
अथातिरेकस्रवदश्रुवर्षैराप्लावयन्ती वपुरुष्णमुष्णैः ।
प्रत्येकमाभाष्य सखीः कथञ्चिच्छनैर्बभाषे करुणं कुमारी ॥३८॥
अहो महामोहजविभ्रमोऽयं व्योमस्थितेन्दोः परिशीलनाय ।
रसातलावस्थितपञ्जरान्तःस्थिता चकोरी कुरुते यदाशाम्[3] ॥३९॥
असंस्तुते पुंसि नराधिनाथे हासाय संदेशवचो वधूनाम् ।
तत्रापि पाणिग्रहणाय कन्यावचोविकासोऽपि विडम्बनाय ॥४०॥

---

1. M. अतः परं 'वारी तु गजबन्धनी' इत्यधिकं वर्तते ।		2. M. व ।
3. M. शं ।

अतीव दुःप्रापमनोरथेऽस्मिन्नाशाङ्कुरस्यापि न मेऽवकाशः ।
अतः परं पञ्चशरस्य पञ्चसहस्रसंख्या विशिखाः पतन्तु ॥४१॥
इति ब्रुवाणां वरवर्णिनीं तां हृदा विनिर्णीय सखी जगाद ।
त्वय्येव तावद् विशिनष्टि शोभां मनोऽनुरूपो हि मनोरथस्ते ॥४२॥
लावण्यतारुण्यगुणाभिजात्यैरनूनता ते नियतं नताङ्गि ।
जागर्ति योग्यद्वययोजनायां विधेर्विदग्धाभिमता च वृत्तिः ॥४३॥
तद् धैर्यवृत्त्या विनिरुध्य बाधां कालं कियन्तं प्रतिपालय त्वम् ।
यावद् विदध्यामहमात्मबुद्ध्या कमप्युपायं कमलायताक्षि ॥४४॥
इत्थं समाश्वास्य सखीं सखेदं समीक्ष्य मां साश्रुमुखी जगाद ।
[वृं]दावतीं प्राप्य पुरः समस्तं पृथ्वीपतेस्तस्य निवेदयेति ॥४५॥
तदेतदावेदितमग्रतस्ते यथानुभूतं ननु भूपतीश ।
व्रजाम्यहं शाधि मम क्षमस्व वैजात्यमेतत् परतन्त्रवृत्तेः ॥४६॥
एवं निवेद्यानतकन्धरा सा धराभृता भूमिभुजो भुजिष्या ।
प्रमोदमञ्जुस्मितकौमुदीभिर्मुखेन्दुमुद्भासयता बभाषे ॥४७॥
संसारकासारसरोरुहिण्यास्तस्याः स्मरस्याप्यधिदेवतायाः ।
पीयूषधारामधुरा गुणौघा मया मुहुः श्रोत्रपुटेन पीताः ॥४८॥
जानीहि पाणिस्थितमेव तावन्महन्मनोराज्यफलं मृगाक्ष्याः ।
एवं यदि त्वत्कथनानुरूपस्तस्यामपि स्यादनुरागबन्धः ॥४९॥
कमप्युपायं समुपेत्य कुर्यां तापापनोदं मदिरेक्षणायाः ।
विश्राणयत्यन्यवराय तां चेत् पिता तदीयो मयि बद्धवैरः ॥५०॥
द्रष्टुं चिरादस्ति कुतूहलं मे तत् कान्यकुब्जं नगरं गरीयः ।
तत् साधु जातं सुकृतेन पुंसां कार्यद्वयं साधयति क्रियैका ॥५१॥
तद्गच्छ संवर्धय सावधाना कल्याणि कान्तां मम वाचिकेन ।
इती[1]रयित्वा त्वरितं कृतज्ञः कृतप्रसादो विससर्ज दूतीम् ॥५२॥
स वन्दिनं नन्दितबन्धुवर्गः कृत्वा प्रधानं प्रधनाग्रयायी ।
प्रच्छन्नवेशोऽप्यविशत् प्रसन्नकान्तिः क्षितीशः किल कान्यकुब्जम् ॥५३॥
तस्याः पितुः साहसमाशयं च प्रवेशनिर्या[2]णपथं च पुर्याः ।
पृथ्वीपतिः प्रेक्षितुमात्मवेशं विहाय वैतालिकमन्वियाय ॥५४॥

---

1. M. ति ।　　　　2. M. र्ज्ञा ।

शतेन सार्धेन महःसमृद्धैः सामन्तमुख्यैः सुमुखैः समेतः ।
पताकिनीः पूर्णपरिच्छदं च पुर्यां परित्यज्य नृपः प्रतस्थे ॥५५॥
व्यपेतभूपालपरिच्छदोऽपि स लोभनीयोऽजनि लोचनानाम् ।
विनापि जाम्बूनदमुद्रणेन मनो हरत्येव मणिर्महार्हः ॥५६॥
व्रजेयदायं **जयचन्द्र**गोष्ठीं तदा भवेत् पार्श्वचरोऽपरस्य ।
स्थितः स्वकीये शिविरे स एव पृथ्वीपतिस्तावदभूदधृष्यः ॥५७॥
पुरं समन्तादकुतोभयोऽसौ कुतूहली कृत्यविनिर्णयाय ।
बभ्राम तद्गोपुरतोरणादृश्यङ्गाटकाक्रीडकृतोपशोभम् ॥५८॥
स रोधसा सञ्चरते स्म नित्यं सुरापगायास्तुरगद्वितीयः ।
वीचीपरीरम्भणमेदुरेण संवीज्यमानो वनमारुतेन ॥५९॥
कुमुद्वतीकामुककान्तिपूरैर्धौतान्धकारासु निशीथिनीषु ।
कदाचिदस्याः पुलिनं जगाम तुरङ्गमं पाययितुं पयांसि ॥६०॥
निमग्नवक्त्रं पिबतो हयस्य वल्गावलच्छो[1]णितफेनगन्धात् ।
आपेतुरत्याकुलमुत्पलाक्षीचक्षुर्विलोलाः सहसा शफर्यः ॥६१॥
विलोक्य तां कौतुकमग्नचेताश्चिक्षेप मुक्ताः क्षितिपः स्वकण्ठात् ।
लाजाशया तत्र जलाशयान्तःस्थिताः समुत्पेतुरनेकशस्ताः ॥६२॥
क्रीडन्तमेवं तुरगद्वितीयं विलोकयामास विशालसत्त्वम् ।
तं कान्यकुब्जेश्वरकन्यका सा प्रासादवातायनगा सखीभिः ॥६३॥
रूपेण गम्भीरमनोरमेण लोकोत्तरेणापि विचेष्टितेन ।
पर्याकुला विस्मयकौतुकाभ्यां स्वैरं बभाषे क्षितिपात्मजा सा ॥६४॥
कोऽयं कलानाथ इवामृतानि किरन् दृशोः कन्दलयन्ननङ्गम् ।
एकोऽप्यनेकावृतवत् प्रभावाद् व्यपेतशङ्को विजरी[हरी]ति ॥६५॥
लाजानिवाऽऽजानुभुजोऽनुवेलं क्षिपत्यसौ पाथसि मौक्तिकानि ।
सत्त्वेन रूपेण जनातिगेन मन्ये भुवः कोऽपि भवेदधीशः ॥६६॥
निमज्जयन्ती हृदयं मृगाक्ष्याः सुधाम्बुराशौ मधुरैर्वचोभिः ।
जगाद तां बुद्धिमती भुजिष्या वृन्दावतीं या नगरीं गतासीत् ॥६७॥
असंशयं सोऽयमशीर्णसत्त्वः सोमेश्वरस्य प्रथमस्तनूजः ।
आकारतो वा गुणवैभवाद् वा कस्तेन तुल्यो जगति द्वितीयः ॥६८॥

1. M. स्थो ।

प्रत्येषि नो चेन्मम शंसितेन कृशाङ्गि सन्देहविनोदनाय ।
अस्यान्तिकं प्रेषय कान्तिराशेः काञ्चित्तदा प्रत्ययितां भुजिष्याम् ॥६६॥
स्वभाव एवायमधीश्वराणां छायाद्वितीया अपि कौतुकेन ।
परीतमात्मानमुदारभृत्यवर्गैरिवाव्य[1] प्रधियो विदन्ति ॥७०॥
समापिते सम्प्रति हाररत्ने जिघृक्षुरन्यान्यपि मौक्तिकानि ।
पश्चात् स्थितं कञ्चन मन्यमानः प्रसारयिष्यत्ययमग्रपाणिम् ॥७१॥
प्रियां निशम्येति गिरं तदीयां कुतूहलेनाऽऽकुलिता कुमारी ।
समर्प्य[2] मुक्ताफलजालकानि जवेन काञ्चित् प्रजिघाय दूतीम् ॥७२॥
आदेशतोऽस्याः सविधं जगाम दूती मनोवृत्तिरिव द्वितीया ।
मीनावलीरिङ्गणलोलदृष्टेर्मीनाङ्कमानं हरतो नृपस्य ॥७३॥
अधृष्यरूपस्य धराभृतोऽस्य भीताऽप्यसौ साहसबद्धधैर्या ।
समीप[3]मासाद्य शनैर्नयज्ञा च्छायेव पश्चादवतिष्ठते स्म ॥७४॥
कौतूहलक्षिप्तहृदा नृपेण क्षिप्ते समस्ते सरिति स्वहारे ।
प्रसारिते पाणितलेऽस्य पश्चादुपानयन्मौक्तिकजालकं सा ॥७५॥
क्रमेण मीनास्यमुपागतासु मुक्तासु तास्वग्रथितासु तन्वी ।
आच्छिद्य सद्यो निजकण्ठदेशादकुण्ठसत्त्वा विततार हारम् ॥७६॥
अथाङ्गनाकण्ठविभूषणं तद् विलोक्य विस्मेरमना मनीषी ।
विवर्त्य वक्त्रं विततप्रभावो विलोकयंस्तामबलां बभाषे ॥७७॥
का त्वं कुतस्त्याऽसि निशाचरीवद् घने निशीथे विजने भ्रमन्ती ।
त्वया किमर्थं व्ययितानि तावन्महार्घ[4] मुक्ताफलजालकानि ॥७८॥
तथा प्रगल्भापि नृपप्रभावात् सा साध्वसोत्कम्पितचित्तवृत्तिः ।
प्रणम्य सङ्कोचितगात्रयष्टिः सगद्गदं प्रत्यवदत् कथञ्चित् ॥७९॥
अहं महाभाग महीश्वरस्य कुमारिकायाः परिचारिकाऽस्मि ।
प्रमाणयन्ती नियमेन तस्या निदेशमस्यां निशि बंभ्रमीमि ॥८०॥
मया पराधीनतया विमुक्ता स्वाभाविकी भीतिरपि त्रपापि ।
प्रभोर्निदेशस्य नितान्तवश्या गुणागुणं नैव विचारयन्ती ॥८१॥
एकं भवन्तं विहरन्तमत्र स्वतन्त्रमत्यन्तमगाधसत्त्वम् ।
अन्तःपुरस्था ददृशुः कृशांग्यो वातायनालम्बिदृ[5]गम्बुजाताः ॥८२॥

---

1. M. य ।　　2. M. र्थं ।　　3. M. पया ।
4. M. र्यं ।　　5. M. दृद ।

आ[1]रूढसौधोच्छ्रितचन्द्रशाला बाला च सा त्वामवलोकयन्ती ।
अपृच्छदच्छाशयमायताक्षी पुनः पुनः पार्श्वचरीसमाजम् ॥८३॥
सख्यः[2] समक्षीक्रियते पुरस्तात् कोऽयं विलासायुधवद्विलासी ।
धरावतीर्णः किमु रोहिणीशो हिनस्ति धैर्यस्थितिमङ्गनानाम् ॥८४॥
तस्या भुजिष्याऽद्भुतसा[हसा]या पुरा रणस्तंभपुरं गतासीत् ।
आचष्ट सा स्पष्टमयं स पृथ्वीराजो मया तत्र हि दृष्टपूर्वः ॥८५॥
अन्या जगाद ग्रहिला स्वपक्षे साक्षेपमस्या विनिगृह्य वाचम् ।
असावसंभावितभाषितेन येते मनस्तोषयितुं भवत्याः ॥८६॥
यत्प्रस्थितौ वारणवाजिपत्तिभरेण दोलायितमेति भूमिः ।
एकाकिनोऽस्य भ्रमणं निशायां प्रत्येतु कोऽस्मिन् परराष्ट्रचक्रे ॥८७॥
भवन्ति तुल्याकृतयोऽप्यनेके लोकेऽत्र का विप्रतिपत्तिशङ्का ।
कल्याणि तुल्यासि यथा रतेस्त्वं मुखेन तुल्यश्च यथा तवेन्दुः ॥८८॥
तस्योपमानं यदि मानवेषु न वेत्सि रूपेण गुणैश्च तैस्तैः ।
विद्याधरो वा धरणीं विहर्तुं वृन्दारकः कश्चन वाऽवतीर्णः ॥८९॥
एवं ब्रुवाणां स्मयपूर्वमेनां भूयोऽपि सा सस्मितमाबभाषे ।
प्रत्यक्षदृष्टं किमियं पदार्थं वितण्डया खण्ड[3]यितुं प्रवृत्ता ॥९०॥
प्रतिश्रुतं पिष्टपविश्रुतेन पुरो ममात्रागमनाय येन ।
अभ्यागतो निह्नुतराजलक्ष्मा स क्ष्माधिनाथः किल पक्ष्मलाक्षि ॥९१॥
इत्थं तयोरत्र चिराय वादद्यूतं प्रवृत्तं कुतुकेन सख्योः ।
नृपात्मजा सुन्दर सन्दिहाना मां प्राहिणोत्तत्त्वविनिर्णयाय ॥९२॥
उदीरयित्वे(?)दमुपात्तमौनां मनाग् विहस्येति बभाण भूपः ।
बाले तवानेन गवेषणेन फलं न किञ्चित् प्रविलोकयामि ॥९३॥
प्रत्येष्यति त्वद्वचनादियं चेत् सन्देग्धि किं बुद्धिमतीवचोभिः ।
जनः कुतर्कोपहतप्रतीतिर्नहि प्रमाणीकुरुतेऽन्यवाणीम् ॥९४॥
तां मद्वचोभिर्वद सन्दिहानामागामिनी कामिनि यामिनीयम् ।
सनिर्णयं ते हृदयं विधात्री सन्धेहि धैर्यं कियतोऽपि यामान् ॥९५॥
इत्युक्तवान्मुक्तसरित्प्रतीरः प्रत्यागमत् स्वं शिविरं स वीरः ।
साऽपि प्रविष्टा सुमनाः पुरान्तः प्रमोदयामास मनः कुमार्याः ॥९६॥

1. M. अ । 2. M. ख्य । 3. M. डि ।

आकर्ण्य सन्देशहरोपनीतं सन्देहहारि प्रियभाषितं तत् ।
आसन्नसङ्गं तमुदीक्षमाणा क्षणं मृगाक्षी युगवद् विवेद ॥९७॥
अन्येद्युरुन्निद्रकुमुद्वतीके काले कलाविद् विहिताभ्युपायः ।
अलक्ष्यमाणः प्रतिहारपालैः पुरं कुमार्याः प्रमना विवेश ॥९८॥
आयांतमेतं कथितं सखीभिः सितेक्षणा सत्यतया न मेने ।
उपेयुषि प्रेयसि पार्श्वमक्ष्णोः सम्भावयामास निजं भ्रमं सा ॥९९॥
प्रस्वेदकम्पाकुलदेहवल्ली कर्तव्यवस्तुन्यपि मूढचेताः ।
अभ्यागतस्याभिमतस्य पत्युः प्रत्युद्गमे नालमभून्मृगाक्षी ॥१००॥
स्पन्देन शंसन् प्रियसङ्गमूरुर्वामोऽपि यो दक्षिणतां बभार ।
स्तम्भं दधद् भर्तुरथोपचारे वाम्यं पुनर्वामदृशः स भेजे ॥१०१॥
अथोपनीते रभसोत्थिताभिर्वरासने कान्तिमतीसखीभिः ।
सुखोपविष्टो विशदस्मितार्द्रैः सम्भावयामास वचोभिरेताः ॥१०२॥
अयोजयत्तन्मिथुनं मनोज्ञं योग्यद्वयीयोजनविद् विधाता ।
प्राज्योदितस्नेहसमिद्धमन्तर्मनोभवाग्निं विनिधाय साक्ष्ये ॥१०३॥
मनोऽनुवृत्तिं मदनस्य तन्वन् प्रमाणयन् प्रेम नवं प्रियायाः ।
स विस्मृतान्यव्यसनप्रसङ्गो निनाय कान्तः कतिचित्त्रियामाः ॥१०४॥
वधूस्वभावान्नमितं मुखाब्जं समुन्नमय्य प्रणयात् प्रियायाः ।
प्रयातुकामः शिविरं स विज्ञः शनैरथाभाषत नीरजाक्षीम् ॥१०५॥
न मां समायातमिहायताक्षि कश्चिद् विजानाति जनो मदीयः ।
अतो ममादर्शनजातखेदः कर्ता कुतर्काननुजीविलोकः ॥१०६॥
मया विनाऽसौ विषयं विषादी [यदि] व्रजेद् वीरजनो मदीयः ।
अनन्तरैरन्तरमेत्य भूपैस्ततो विलुप्येत बलेन राष्ट्रम् ॥१०७॥
न चोत्सहे सोढुमहं मुहूर्तमपि त्वदीयं विरहं वरोरु ।
सम्भाव्य सामन्तजनं समस्तं समग्रयिष्यामि मनोरथं ते ॥१०८॥
इतीरिता रीतिविदा प्रियेण तरङ्गितान्तःकरणा कृशाङ्गी ।
निश्वस्य बाष्पाम्बुभरेण पूर्णां दृशं दधे दीनतमां सखीषु ॥१०९॥
ततो भविष्यद्विरहोपतप्तं मुखेन्दुमालोक्य स कान्तिमत्याः ।
पाणौ समादाय दयालुरेनां निशान्तमध्यान्निशि निर्जगाम ॥११०॥
अतीत्य कक्षाः सुतरां स दक्षो द्वारि स्थितानां तुरगोत्तमानाम् ।
आच्छिद्य कंचिज्जविनं प्रवीणं समं कलत्रेण समारुरोह ॥१११॥

द्वारस्थितैरस्फुरितस्वकृत्यैः स विस्मयत्रासमुदीक्ष्यमाणः ।
जगाम तेनैव तुरङ्गमेण निजं निवेशं धरणीवतंसः ॥११२॥
सामन्तमुख्यः समुपेत्य कश्चिन्मुदाऽथ भूपालमुदाजहार ।
ससाधनः साध[1]य तावदिन्द्रप्रस्थोन्मु[2]खस्त्वं सुमनाः सदारः ॥११३॥
चत्वारि यावत् किल योजनानि व्रजस्यतिक्रम्य जनधिनाथ ।
तव प्रसादादहमेक एव निवारयिष्यामि विरोधिसैन्यम् ॥११४॥
अन्योऽब्रवीद् वीरवरः सगर्वं गव्यूतिषट्कावधि यासि यावत् ।
तावन्महीशाहितवाहिनीनामहं निरोत्स्यामि रयं यथाद्रिः ॥११५॥
एवं हरिप्रस्थगमे यथेच्छं भवन्ति यावन्त्यपि योजनानि ।
विभज्य तान्येव गृहीतवन्तो युद्धाय सर्वे कृतसत्यबन्धाः ॥११६॥
ते हि प्रवीरा मनुजाकृतिं तां हठाद्वहन्तो दनुजावताराः ।
आयोधनाग्रे निधनं भजन्ते स्वमूर्तिलाभाय निजेच्छयैव ॥११७॥
रिङ्गत्तुरङ्गं विलसच्छताङ्गमुत्तुङ्गमातङ्गमुपात्तपत्ति ।
स्फुरत्पताकं घनघोषघोरं सैन्यं रिपोः संनिदधे तदानीम् ॥११८॥
धैर्यातिरेकादवधीर्य तत्तु पृथ्वीपतिः पूर्णमनाः प्रतस्थे ।
अव्यग्रचेताः पुनरग्रतोऽस्य सामन्त एकः समराय तस्थौ ॥११९॥
अथाऽऽपतत् तत प्रतिपक्षसैन्यं व्यग्रीचकारोग्ररयः स एकः ।
प्रतीपवातः प्रबलः खगानां व्यूहं यथा व्योमनि सञ्चरन्तम् ॥१२०॥
प्रजह्नुरेनं युगपन्निवृत्ताः सपत्नसेनापतयोऽतिदृप्ताः ।
शरद्व्यपाये शतपत्रषण्डं यथा पुरः प्राणहरास्तुषाराः ॥१२१॥
यथाप्रतिज्ञं प्रतिपक्षयोधान् स योधयित्वा समये स्वकीये ।
हेतुं प्रकल्प्याहितहेतिजालं तं दानवो मानवदेहमौज्झत् ॥१२२॥
तस्यात्यये सत्वरमापपात पताकिनी सा **जयचन्द्र**गुप्ता ।
पीनस्तनीस्तेन उदस्तभीतिर्यया दिशा सञ्चरते स्म राजा ॥१२३॥
एकैकशः क्लेशितशात्रवास्ते संहृत्य सैन्यानि पुरोगतानि ।
तीर्णप्रतिज्ञासरितः कृतज्ञा जग्मुर्गतिं वीरजनोपदिष्टाम् ॥१२४॥
एवं प्रवृत्ते पथि सम्पराये नृपो हरिप्रस्थमुपैति यावत् ।
क्रमेण तावत् पृथुविक्रमास्ते स्तोकावशेषाः सुभटा बभूवुः ॥१२५॥

---

1. M. अत्र याहि इत्यधिकम्, मन्ये साधय इत्यस्यार्थचिख्यापयिषया केनचित् पादटीकारूपेण लिखितमनुलिपिकृत्प्रमादेन श्लोकान्तर्गतम् । 2. M. मु ।

पुरं तदासाद्य ततः समृद्धं सोमेश्वरस्यान्वयमण्डनोऽसौ ।
अमित्रसेनामथनाय चक्रे मनः स्वयं मन्युरयेण दीप्तः ॥१२६॥
स कान्यकुब्जाधिपतिः सुघोरं संग्राममासाद्य समाप्तसत्त्वः ।
वृन्दावतीशेन वितीर्णभङ्गो यमानुजाया निममज्ज नीरे ॥१२७॥
इति प्रतीतः प्रतिपद्य जायामनन्यलभ्यां विजयश्रियं च ।
तस्मिन् पुरे पूर्णमनोरथोऽसौ चक्रे स्थितिं कत्यपि वासराणि ॥१२८॥
कालेऽथ कल्पाग्निसमप्रतापो विजित्य सर्वाः स दिशः क्रमेण ।
सहावदीनाह्वयमाहवेषु महाबलं म्लेच्छपतिं बबन्ध ॥१२९॥
जिह्मस्वभावं खलु राजनीतेर्दयार्द्रभावादवधीर्य धीरः ।
त्रिःसप्तकृत्वोऽपि निबध्य शत्रुं कारातिथीकृत्य विमुंचति स्म ॥१३०॥
तथोपकर्तारममुं कृतघ्नः कृत्वा सदम्भं यवनः प्रबन्धम् ।
नियम्य देशं निजमानिनाय किमस्त्यकार्यं बत दुर्जनानाम् ॥१३१॥
तं यन्त्रितं मन्त्रितमन्दनीतिर्व्यपेतशस्त्रं विपरीतचेताः ।
प्रणोदितः प्राणहरेण धात्रा वियोजयामास विलोचनाभ्याम् ॥१३२॥
विधेः कृपारोधिविचेष्टितेन मर्मच्छिदा तेन मनस्विनोऽस्य ।
स्वयं निरेष्यन्नियतं नियत्या जीवोऽस्य वैरोद्धरणाय रुद्धः ॥१३३॥
असौ विदूरस्थितमित्रबन्धुरन्धः स्वयं शत्रुमुखान्तरस्थः ।
पारं विपद्वारिनिधेरपश्यन् प्रायोपवेशाय बबन्ध चेतः ॥१३४॥
अथ भ्रमन् भूवलयं विवृण्वन् भोगावलीं भाग्यविलासभाजाम् ।
चन्दाभिधः पूर्वमनोनचित्तै[1]र्मित्रीकृतस्तत्र जगाम बन्दी ॥१३५॥
निमग्नमेनं व्यसनाम्बुराशौ विलोक्य बन्दी स विदीर्णचेताः ।
रहः समभ्येत्य समाहितात्मा स्वनामजाती प्रथयांचकार ॥१३६॥
निरुध्य धैर्यातिशयेन बाष्पप्रवाहमव्याहततीव्रवेगम् ।
कण्ठस्खलद्गद्गदभाषितेन स बोधयामास कथञ्चिदेनम् ॥१३७॥
योग्यं जगत्यामथ वाप्ययोग्यं सम्भावितं वाप्यथवा तदन्यत् ।
नास्त्येव तद्वस्तु विचार्यमाणं न यत् स्वतन्त्रस्य विधेर्विधेयम् ॥१३८॥
आयोधनाग्रे बहवो हि योधा जयं लभन्तेऽत्र विपर्ययं च ।
एतादृशी दुःसहदुर्दशा तु न जातु दृक्श्रोत्रपथं विवेश ॥१३९॥

---

1. पूर्वमनेन वित्तैरिति भवेत् ।

वैरायितं वैरिणि तावदेव यावन्न स स्यादपनीतदर्पः ।
वशीकृते तत्र तु विक्रमेण कारुण्यमेवोचितमुत्तमानाम् ॥१४०॥
जिह्मस्वभावाद्यदि नाम केऽचन्न मोक्तुमेवापकृतिं सहन्ते ।
प्राणान् परं हन्त हरन्ति शत्रोर्न तादृशं वैकृतमावहन्ति ॥१४१॥
ईदृश्यपारे व्यसनान्धकारे त्रपाकरं जीवनमेव शल्यम् ।
साधारणस्यापि भवेज्जनस्य जनातिगानां किमु तत्प्रभूणाम् ॥१४२॥
तथापि वैरं विरतान्यकृत्यो निर्यातयिष्यन्निजयैव शक्त्या ।
कालं कियन्तं किल यन्त्रितोऽपि कलेवरं रक्ष निजं सहिष्णुः ॥१४३॥
सम्भावनीयेऽपि नृणामपाये तदागमाय त्वरितो न हि स्यात् ।
कुत्रापि दैवस्य विपर्ययेण पराजयः स्याद् विजयस्य हेतुः ॥१४४॥
वदन्तमेवं मृदु वन्दिनं त[मुक्त्या च]प्रीत्या च नितान्तरम्यम् ।
प्रत्याहताशेषमनोरथोऽसौ प्रत्याह कृच्छ्रेण पतिः प्रजानाम् ॥१४५॥
मग्ने निकारायतनीरराशौ प्रेमानुबन्धं मयि सन्दधानः ।
भवानभाणी[द्]यदिदं विचार्य श्रद्धालुतां तत्र भजेन्न मेऽन्तः ॥१४६॥
सैन्याः सुहृद्बन्धुजनाः सहाया धनान्यथान्यान्यपि साधनानि ।
कार्यानुबन्धीनि भवन्ति यानि मय्येकमप्यस्ति किमङ्ग तेषाम् ॥१४७॥
आस्तामनास्थावसतिः क्रियासु साधारणी विप्रतिपत्तिरन्या ।
स्वभावसिद्धं बत देहिनां यत्तदप्यपास्तं नयनद्वयं नः ॥१४८॥
यथा विपाणैरिह शिल्पकार्यै यथा कदर्यस्य यशोऽर्जनेषु ।
तथा ममान्धस्य मनोरथोऽयं वीरोचितायां[1] बत वैरशुद्धौ ॥१४९॥
ज्ञातप्रभावः पुनराह वन्दी मन्दीकरिष्यन् नृपतेरनास्थाम् ।
मतं मदीयं मतिमन्निशम्य रो[2]चेत चेत्त[त्]त्वरितं विधेयम् ॥१५०॥
अनन्यसाध्यः[3] किल शब्दवेधी बाणस्तवाधीनतरस्तरस्वी ।
तेनैव मन्मन्त्रसमेधितेन समीहितं साधय सावधानः ॥१५१॥
निर्माय कञ्चित्कपटप्रबन्धमहं करिष्यामि तथाऽभ्युपायम् ।
यथा करस्थं तव कार्मुकं स्याच्छरव्यतां याति यथा सपत्नः ॥१५२॥
इत्थं स निर्णीय[4] समं नृपेण जगाम गोष्ठीं यवनाधिपस्य ।
दिनैः कियद्भिर्निजविद्ययाऽसावरञ्जयत्तं सह मन्त्रिमुख्यैः ॥१५३॥

---

1. M. तयां । 2. M. तो । 3. M. धः ।
4. M. र्णाय ।

अथैकदा चित्रकथाप्रसङ्गे साहावदीसंसदि[1] स प्रगल्भः ।
कुतूहलाद्भर्तरि सावधाने स्फीतां मुदा वाचमुदाजहार ॥१५४॥
योऽसौ महाराज मृधे निरुध्य विनीतनेत्रो भवता निबद्धः ।
अयःकटाहान् विशिखेन विध्येदेकेन सोऽतीक्ष्णमुखेन सप्त ॥१५५॥
इती[2]रितः कालसमीरितोऽसौ तत्कालमाकारितवीरलोकः ।
पुराद्बहिः कौतुकरङ्गभूमिं विशालमञ्चां रचयां[3] चकार ॥१५६॥
प्रतन्यमानप्रतिनादभिन्नप्रभिन्नदिग्वारणकर्णरन्ध्रे ।
निरुन्धति व्योमदरीमुदग्रध्वनौ मुदा ताडितदुन्दुभीनाम् ॥१५७॥
समीरणासङ्गतरङ्गिताभिर्लसत्पताकाभिरलङ्कृताग्रे ।
अयःकटाहेषु निवेशितेषु स्तम्भे समुत्तम्भितहेमकुम्भे ॥१५८॥
सुखोपविष्टेषु यथानिवेशं प्रवीरवर्गेषु कुतूहलेन ।
आह्वाययामास सहावदीनः सहावनोशेन[4] स वन्दिनं तम् ॥१५६॥
ज्वलन्तमन्तर्व्यसनस्य तापाच्छ्वसन्तमुच्चै रनुवेलमुष्णम् ।
विशीर्णसर्वव्यवसायसत्त्वं दृष्टिं विना दृष्टिविषं यथैकम् ॥१६०॥
प्रतिद्विपास्कन्दनभिन्नदन्तं द्विपं यथा क्षीणमदप्रवाहम् ।
स्वर्भानुसम्भिन्नमिवार्कबिम्बमार्द्रेन्धनेनेव विरुग्नमग्निम् ॥१६१॥
जय[5]श्रियः कार्मणमन्यवीरैर्दुरानमं कार्मुकमस्य पाणौ ।
निवेशितं पार्श्वचरैः शर[6]श्च सहावदीनस्य तदा निदेशात्[7] ॥१६२॥
अनादरारोपितशिञ्जिनीके संयोजिते तत्र शरेण चापे ।
वन्दी बभाषे बहलीकृतेन स्वरेण शृण्वत्यधिपे धरण्याः ॥१६३॥
उच्चैर्महाराज यदा निदेशं वारत्रयं श्रोष्यति युष्मदीयम् ।
शरेण कुण्ठेन धनुर्धरोयं लक्ष्यं तदा भेत्स्यति वः समक्षम् ॥१६४॥
तथेति तस्य प्रहरेति वक्तुं व्यात्ताननस्य क्षतताल्लुमूलः ।
प्राणैः सहान्धङ्करणस्य शत्रोर्जवान्नियन्तुर्निरियाय बाणः ॥१६५॥

---

1. M. संसदि संसदि ।　　2. M. ति ।　　3. M. यं ।

4. M. श्रेभ ।　　5. M. या ।　　6. M. रैशत ।

7. M. आदर्शे इतः प्रभृति एकैकसंख्यावृद्धिर्दृश्यते । अयं भ्रमो वा स्याद् इतः पूर्वमेकः श्लोकः स्खलितो वा स्यात् ।

निर्यातयन् वैरमतीव तीव्रं यशो वितन्वन्विशदं जगत्याम् ।
फलेन हीनोऽपि महाफलोऽभूत् पृथ्वोपतेस्तस्य तदा पृषत्कः ॥१६६॥
भयविस्मयशोकसंकुलान्तःकरणैर्वीरगणैरलक्ष्यमाणः ।
अधिरोप्य वनायुजं स वन्दी क्षितिपालं **कुरुजाङ्गलं** निनाय ॥१६७॥
पुण्यक्षेत्रे तत्र स क्षत्रियाणां दत्तानन्दे शौर्यशौटीर्यभाजाम् ।
पृथ्वीलोकं पूरयित्वा यशोभिः पृथ्वीराजः प्राथतं प्राप लोकम् ॥१६८॥

इति सूरजनचरित्रे महाकाव्ये
दशमः सर्गः ॥१०॥

[एकादशः सर्गः]

तस्मिन् गतिं पुण्यकृतां प्रयाते **प्रह्लाद**नामा तनयस्तदीयः ।
प्रह्लादयन्मानसमानतानां समुद्रकाञ्चीं सुमनाः शशास ॥१॥
नितान्तभक्त्या भगवत्युपेन्द्रे सत्त्वप्रधानैश्च गुणैरगण्यैः ।
मनीषिणोऽमंसत मर्त्यमूर्तिं प्रह्लादमेव क्षितिपालमेनम् ॥२॥
गोविन्दराजं रजसोज्झितात्मा तनूजमात्मीयपदेऽभिषिच्य ।
यशोवदातैः सुकृतैरुपात्तैः[1] पौरन्दरे धाम्नि स निर्ववार ॥३॥
गोविन्दराजादजनि प्रवीरः स **वीरनारायण**नामधेयः ।
जनातिगैर्यं जनताः प्रतापैर्नारायणांशं नरभूपमाहुः ॥४॥
द्विषद्भटस्यारभटीकुठारस्तस्मादभूद् **वाग्भट** उद्भटश्रीः ।
प्रत्याहरद्यो यवनान्निगृह्य रणे रणस्तम्भपुरं प्रवीरः ॥५॥
जैत्रो रिपूणां समराङ्गनेषु तस्मात्सुतोऽजायत **जैत्रसिंहः** ।
सुरेन्द्रलोकादपि लोभनीयां चकार यः **सिंहपुरीं** नृसिंहः ॥६॥
सम्यग्विवेकादिव शुद्धबोधः सत्त्वप्रकर्षादिव हृत्प्रसादः ।
जगत्त्रयोद्गीतयशःप्रशस्ति**र्हंमीरदेवो**ऽजनि जैत्रसिंहात् ॥७॥
आयोधनेष्वेव धनञ्जयाद्या विश्राणनेष्वेव दधीचिमुख्याः ।
धर्मात्मजाद्याः खलु धर्ममात्रे सर्वत्र वीरः स तु भूरिसत्त्वः ॥८॥
चित्रैश्चरित्रैः प्रथितस्य यस्य संभावितस्यापि विशालशीलैः ।
गुणोच्चयं वर्णयतां कवीनां वाणी न सत्यव्रतमुज्झति स्म ॥९॥
आश्चर्यमस्यावनिनायकस्य ज्वलत्प्रतापज्वलनोऽनुवेलम् ।
विपक्षनारीनयनाम्बुपूरैः परीयमाणः परिवृद्धिमाप ॥१०॥
उच्चैस्तया संस्तुत एव दूराद्यशःपताकाभिरलंकृतश्च ।
स्थितिं दधानः क्षमयोपरुद्धामसौ स्ववंशध्वजवच्चकासे ॥११॥
फलन्ति चिन्तामणिकामधेनुकल्पद्रुमाः काममर्त्यलोके ।
मनुष्यलोके तु मनीषितानि हंमीर एकः फलति स्म नित्यम् ॥१२॥
उभौ प्रतापेन पतङ्गवह्नी जितौ विलोक्य स्फुटमस्य कीर्तिः ।
एकं विजित्य प्रतिपक्षमिन्दु[2]मन्वेषयन्ती भ्रमति द्वितीयम् ॥१३॥
हंमीरदेवस्य गुरुप्रतापज्वालाभिरायातु नतु[3]द्रवत्वम् ।
इतो[4]व हैमं जगदण्डमप्सु निवेशितं बुद्धिमता विधात्रा ॥१४॥

---

1. M. त्रै । 2. M. न्द्र । 3. M. रु । 4. M. ति ।

समुद्रनेमिं स विजित्य वीरः कृत्वाऽवनीशान् करदान् क्रमेण ।
उपाद्रवद्वाजिबलेन दृप्यद्रूथि[1]नीकांस्तरसा **तु[2]रुष्कान्** ॥१५॥
शकान्निराकृत्य वकानुकारान् स्वपौरुषेणैव स राजहंसः ।
पद्माकरं शीलितसाधुचक्रं सु[3]खेन **ढिल्ली**नगरं जगाहे ॥१६॥
सैन्यानि विद्राव्य स यावनानि दूरं तमांसीव समुद्धतानि ।
निजां रणस्तम्भपुरीं नृदेवो दिवं दिवानाथ इवारुरोह ॥१७॥
नानादिगन्ताहृतरत्नकूटैस्तेनापि शक्रप्रतिमेन भर्त्रा ।
विडम्बयामास कुबेरगुप्तां पुरीं ततोऽसाव[4]मरावतीं च ॥१८॥
नियोजितस्तेन सदाधिकारी सदाधिकारी वर्त्तते न कश्चित् ।
अनीतयस्तेन सुनीतिभाजा प्रजाः प्रकामं प्रभुणा बभूवुः ॥१९॥
करावलम्बं वितरन् प्रजानां करग्रहं नाम करोतु सम्यक् ।
इदं त्वयोग्यं जगतीपतिर्यद् बबन्ध मित्रं रिपुवद् गुणेन ॥२०॥
समाप्तकृत्यः प्रशमादरीणां नृपः स्वपुर्यामनयन्नयज्ञः ।
कालं कियन्तं किल यन्त्रितोऽसौ समु[5]त्सुकानां प्रणयात्प्रियाणाम् ॥२१॥
पुरोहितेन स्वपुरो हितेन पुरस्कृतैर्भूमिसुरैः परीतः ।
नृपः प्रतस्थे सह पट्टराज्ञ्या स **पट्टना**ख्यं पुटभेदनं तत् ॥२२॥
ययुश्च तस्यानुपदं सदस्याः सदीशितुश्चित्तविदो वयस्याः ।
मन्त्रप्रधानाः सचिवास्तथाऽन्ये नियोजिताः कोषगृहाधिकारे ॥२३॥
निरामया नीरधिनीरजाताः समीरिता वल्लभपालमुख्यैः ।
जग्मुर्युवानः शतशो विनीता जवेन वाहा जितवैनतेयाः ॥२४॥
उत्तुङ्गतातर्जितशैलशृङ्गं मातङ्गसैन्यं शनकैः प्रतस्थे ।
कलिङ्गराजेन कलिप्रशान्त्यै बलीयसोऽमुष्य वलीकृतं यत् ॥२५॥
अथापतत्पत्त्रिजवैः स वाहैस्तीरं **तिलद्रोणि**तरङ्गवत्याः ।
तरङ्गसङ्गरवरगन्धवाहस्निग्धीकृतच्छायतमालमालम् ॥२६॥
नदीं **जलद्रोणि***मदीनसत्त्वः स तां जगाहे गहनप्रवाहाम् ।
यस्याः स्पृशन् पावनमम्बुबिन्दुं पापोऽपि तापत्रितयं जहाति ॥२७॥

---

1. M. पि । 2. M. वु । 3. M. यु ।
4. M. म । 5. M. म ।

*. तिलद्रोणिजलद्रोणीति नामद्वयमुपलभ्यते, परमनयोरैक्यमेवोचितं पश्यामः ।

स्फुरन्महानीलमणीमनोज्ञं कदम्बमालाकलितोपकण्ठम् ।
सुपर्णसम्पादितसौम्यपादच्छायं मयूरच्छदचित्रमौलिम् ॥२८॥
उपात्तरत्नैः कटकैरशून्यं पीताम्बरोत्तुङ्गकलेवराढ्यम् ।
मुखानिलापूरितवेणुरन्ध्रनिनादसंमोहितवन्यरामम् ॥२९॥
श्रियं दधानां भृगुपादजातां हिरण्यगर्भं दधतं तथाऽन्तः ।
विलोकयामास स **पारियात्रं** गिरिं मुरारातिमिवावनीशः ॥३०॥
सात्राजितीसौहृदभङ्गभीरोः प्राक् पारिजातं हरतो मुरारेः ।
पुलोमजावर्धितमत्सरेण वृत्रद्विषा यत्र रणः प्रवृत्तः ॥३१॥
तार्क्ष्यस्य पत्त्रातिरयात् पति[1]ष्णोः सुरेन्द्रनागस्य शरीरभारात् ।
अवाप्तभङ्गानि यदस्य शृङ्गाण्यतोऽरुणन्नारुणवर्त्म शैलः ॥३२॥
हृत्वा यशोभिः सह वृत्रशत्रोः सुरद्रुमालीं सुरभिं सभार्यः ।
यस्मिन् विशश्राम भवश्रमार्तविश्रामभूमिर्भगवान्मुकुन्दः ॥३३॥
स भूभृतं भूमिभृतां वरीयान्निषेवितं नाकसदां निकायैः ।
बभ्राम बिभ्राणमनल्पतीव्रतपोयुषां पावनपर्णशालाः ॥३४॥
तस्यान्तरे शान्तरजाः स राजा सुदुर्लभालोकनमन्यलोकैः ।
व्यलोकयद्बिल्व[2]पलाशिमूले **बिल्वेश्वरं** वल्लभमीश्वरायाः ॥३५॥
विडौजसं वीर्यवता विजित्य महं महेन्द्रस्य[3] महामहिम्नः[4] ।
विधित्समानेन सनातनेन यः स्थापितः पावितविश्वलोकः ॥३६॥
विधाय भक्त्या विधिवत्सपर्यां प्रजेश्वरः पञ्चमुखस्य तस्य ।
वितीर्य तीर्थोचितभूरिदानमानन्दयद् ब्राह्मणवर्गमग्र्यम् ॥३७॥
ततः पुरं **षधुर**[5]नामधेयमध्यास्त विध्वस्ततमोविकारः ।
यदाश्रयाद्बुद्धिभृतां नराणां षड्वैरिणो न स्वपुरं विशन्ति ॥३८॥
स पट्टनाख्यं नगरं पटीयः फलप्रकर्षे विहितक्रियाणाम् ।
अलञ्चकाराशु हृतान्तरायः सुनीतिवर्त्मेव मनःप्रसादः ॥३९॥
सुराङ्गनावर्जितपारिजातप्रसूनपर्याप्ततरङ्गशोभा ।
चर्मण्वती शर्ममयप्रवेणी प्रवीणयामास यशांसि यस्य ॥४०॥
चर्मण्वतीवारिणि धर्मपत्न्या समं समाप्याभिषवं स वीरः ।
तं जम्बुमार्गं विमलोपचा[6]रैरानर्च मृत्युञ्जयमञ्जुमूर्तिः ॥४१॥

---

1. M. भि । 2. M. त्व । 3. M. द्रास्य ।
4. M. म्नः । 5. षट्पुर इति स्यात् । 6. M. भा ।

भासामथो भर्तरि सोपरागे विश्राणनेषु प्रथितानुरागः ।
अन्यैरतुल्योऽपि तुलामुदारः सधर्मदारः सुखमारुरोह ॥४२॥
स्वच्छत्वसाद्गुण्यसुवृत्ततामिर्मुक्तामणीनां गुरुवंशजानाम् ।
साम्यं समीचीनमनेन तावत् परन्तु नासौ नृपतिः सरन्ध्रः ॥४३॥
कामं महाब्धेरपि गौरवाढ्यै[1]र्वज्रैः समग्रा तुलना न राज्ञः ।
स केवलं वैरिणि वज्रतुल्यो मित्रेऽतिमात्रं मृदुलस्वभावः ॥४४॥
आ[2]रोप्यमाणानि तुलां धनानि यथा यथा वृद्धिमवापुरस्य ।
तथा तथा चेतसि वैदिकानां मनोरथा नैव ममुर्द्विजानाम् ॥४५॥
विश्वम्भरोऽस्मिन्निवसन्नजस्रं देहेऽपि तावद्गुरुतां निधत्ताम् ।
भूयिष्ठमित्थं मिलिताः सभायामाशासते स्म क्षितिदेवमुख्याः ॥४६॥
स स्थूललक्षः[3] सुमनास्तदानीं स्थूलं वपुः स्वं बहु मन्यते स्म ।
व्यायामलीलाविभवान्निकामं कुक्षिं कृशं केवलमन्वशोचत्[4] ॥४७॥
उच्चैस्तरोऽभून्नृपतिस्तदानीं भरातिनम्रात्[5] किल रत्नराशेः ।
तत्तादृगुच्चैःशिरसां जना[6]नामुच्चैःपदारोहणमेव युक्तम् ॥४८॥
नीता नितम्बस्तनभारभाजा मुदद्भृशेनापि[7] शरीरकेण[8] ।
आरोपितास्तत्र तुलां सुरत्नैरन्या महिष्योऽपि महीश्वरेण ॥४९॥
रत्नानि [9]यत्नेन तुलाधृतानि कुलागतेभ्यः प्रथमं द्विजेभ्यः ।
विभज्य सम्प्राप्तवतो दिगन्तात् सम्भावयामास यथार्हमन्यान् ॥५०॥
उ[10]भौ वसूनामधिपा[11] तदानीं तुलाधिरूढौ तरणिर्नृपश्च ।
सङ्कोचयामास करं तमोऽन्धः पूर्वस्तयोर्मुक्तकरः परोऽभूत् ॥५१॥
हंमीरदेवेन वितीर्यमाणाः पयः सुरभ्यः करिणो मदाम्भः ।
यत्त[12]त्यजुस्तेन सरित्समूहः शरत्कृतं कार्श्यमपोहति स्म ॥५२॥
उपप्लवोऽभूत् स कृतोपकारः कुर्वञ्छरीरावरणं खरांशोः ।
तुरङ्गदानावसरे न यस्मात् सस्मार देवोऽयममुष्य रथ्यान् ॥५३॥
गजाधिपाः केऽपि हयाधिपत्यमन्ये गता भूपतयः परे च ।
किमन्यदस्मिन्वितरत्यभीक्ष्णं वित्तेशतां विप्रगणाः प्रपन्नाः[13] ॥५४॥

---

1. व्यै । 2. M. श्र । 3. वक्षा इति स्यात् ।
4. M. चेत् । 5. M. म्रा । 6. M. न ।
7. मुदं कृशेनापि इति स्यात् । 8. M. न । 9. M. थ ।
10. M. तु । 11. M. थौ । 12. M. तृ । 13. M. न्ना ।

मुक्ताकलापे पतिता द्विजानां प्रसूनदामभ्रमतो द्विरेफाः ।
विलेपनामोदविलीनचित्ता नोत्पेतुरुच्चैरपि वार्यमाणाः ॥५५॥
कस्यापि कुत्रापि कदाचिदेव याऽल्पं प्रसूते स्म वसु प्रसन्ना ।
वनीयकानामव[1]निस्तदानीं सा रत्नसूः सर्वत एव जाता ॥५६॥
अशेषदानानि स दीनबन्धुरशेषयित्वा स्वयमेव विज्ञः ।
न्यवेदयद्वेदविदोऽवदातानुपक्रमायाद्भुतसप्ततन्तोः ॥५७॥
कुण्डा[2]न्यखण्डानि समेखलानि समानि सम्यग्विरचय्य विप्राः ।
आरेभिरे कोटिमखं कृतज्ञा मुहूर्तमासाद्य मनोनुकूलम् ॥५८॥
विशुद्धवर्णोज्ज्वलसामिधेनीसंस्कारमासाद्य समेधमानः ।
समिद्भिराज्यैरपि हूयमानः स सप्तजिह्वोऽपि सहस्रजिह्वः ॥५९॥
विशुद्धमन्त्रेरितहव्यगन्धं घ्राणोपयुक्तं हरितां दधानः ।
वितानवैश्वानरगन्धवाहः सुधाभुजां संसदमाचकर्ष ॥६०॥
तस्मिन्मखे मेध्यतमोऽन्तरिक्षे समन्ततो यः समियाय धूमः ।
तमङ्कपालीकृतमिन्दुनांऽकनाम्ना प्रसिद्धिं जनता निनाय ॥६१॥
ते वीतविघ्नं विरचय्य[3] वह्नेर्वषट्कृतैः प्रीणनमाप्तविप्राः ।
समापितं संसदि सप्ततन्तुं सदक्षिणीचक्रुरपेततंशः[4] ॥६२॥
एवं स दाने विविधेऽध्वरे च निविष्टचेता विरतान्यकृत्यः ।
गतान्यनेकान्यपि वासराणि विशालकीर्तिर्न विदांचकार ॥६३॥
ज्ञात्वा रणस्तंभपुरं तदानीं विप्रोषितस्वामिकमिद्धवैरः ।
सहाश्ववारैरतिदुर्निवारै**रल्लावदीन**स्त्वरितं प्रतस्थे ॥६४॥
पञ्चाशद्भिः सैन्धवानां सहस्रैरग्रस्कन्धे गन्धवाहस्यदानाम् ।
उल्लूखानः प्राणतुल्यो नृपस्य भ्राता भीमः शात्रवाणां[5] चचाल[6] ॥६५॥
हमीरदेवनृपतेरपि मन्त्रिमुख्या **विद्याभट**प्रभृतयः सुचिरं विचार्य ।
मायन्मतङ्गजतुरङ्गमसंकुलानि निन्युः सपत्नपृतनाभिमुखं बलानि ॥६६॥
दिशि दिशि विनिवेशिताश्ववारः स्वयमपि सर्वत एव जागरूकः ।
यवनपतिसहोदरस्तदानीं **जगरपुरे** शिविरं चकार चारु ॥६७॥
सैन्ययोर्मिलितयोः परस्परं सङ्गरः प्रववृते निरन्तरः ।
मार्गणैरुभयतो विनिर्गतैः पीयमानहरिदम्बरान्तरः ॥६८॥

---

1. M. वा । 2. M. ज । 3. M, चज्य ।
4. तन्द्राः इति स्यात् । 5. M. नां । 6. M. लः ।

सेनापतिः पृथुयशाः किल जैत्रसूनोर्बभ्राम संगरभुवं **रणरङ्गमल्लः** ।
दानांधगन्धगजगर्जिततर्जितेन विद्रावयन् यवननाथवरूथिनीशान् ॥६९॥

उल्लूखाने प्राप्तभङ्गायमाने संग्रामान्तं वीरवर्गप्रधाने ।
उत्तस्थेऽसौ सार्वभौमः **शकानां** सैन्येनान्तर्मन्युनाहन्यमानः ॥७०॥

द्रुततरमतिरौद्रः **पारशीकस्य** भर्तुः प्रबलबलसमूहः सूचयन्भाव्यनर्थम् ।
परिधिरिव गरीयान्मण्डलं चण्डभानोर्नगर[वर]मरौत्सीचाहुवाणान्वयस्य ॥७१॥

अवनिः खयमीयुषी प्रकम्पं निजभर्तुर्व्यय[1]सनागमं समीक्ष्य ।
जनतायवनेशसैन्यभीरे[2] भृशमारोपयति स्म दूषणानि ॥७२॥

निर्घातोग्रस्वानमिश्रः समन्तादुल्कादण्डः प्रादुरासीत्प्रचण्डः ।
आग्नेयास्त्रं गोलकारावमिश्रं दुर्गान्तस्थैर्द्वेषिणां मन्यते स्म ॥७३॥

जैत्रात्मजोऽपि जितभीतिरनन्यचेता निर्वर्त्य कृत्यमखिलं विधिनोपनीतम् ।
श्रुत्वापि दुर्गमुपरुद्धममित्रसैन्यैर्नातित्वरो निववृते निजपत्तनाय ॥७४॥

इति श्रीसूर्जनचरिते महाकाव्ये
एकादशः सर्गः ॥११॥

---

1. M. व्या । 2. भारे इति स्यात् ।

[द्वादशः सर्गः]

अथ वीक्ष्य पुरं परोपरुद्धं कुलभूपालपरम्परोपनीतम् ।
न जहौ निजमाननप्रसादं विमनाः सन्नपि मानवाधिनाथः ॥१॥
अनुगृह्य वचोमृतेन पौरान् भृशमार्तानपि मर्त्यलोकभर्ता ।
स चिरात्सचिवैरुपास्यमानः समये संसदमाससाद शस्ते ॥२॥
उपविष्टममुं निवेद्य तत्र प्रतिहारैरुपलम्भितप्रवेशः ।
अवदद्गिरमेत्य गाढगर्वामथ संदेशहरः शकाधिपस्य ॥३॥
प्रथितः पृथुविक्रमः पृथिव्यां यवनानामधिभूरलावदीनः ।
प्रहितोऽत्र हितोपदेशकारी भवतोऽहं भुवनस्य तेन भर्त्रा ॥४॥
उदयं चरमाद्रिमन्तराऽस्यां वसुमत्यां[1] निवसन्ति येऽवनीशाः ।
वितरन्ति कृषीवला इवास्य प्रसभास्कन्दनभीरवः करं ते ॥५॥
इह कश्चन योऽभिमानशाली नहि दित्सेत नराधिपस्य दण्डम् ।
भवति स्वयमेव तस्य मूर्ध्नि प्रबलो दण्डधरो धराधिनाथः ॥६॥
अविमर्शवशेन गर्वतो वा किमु भाविव्यसनस्य शासनाद्वा ।
मतिमानपि मूढधीरि[2]व त्वं नृप जानासि हिताहिते न किञ्चित् ॥७॥
अखिलामपि शासतो धरित्रीं समतीताः शरदोऽस्य सप्तसंख्याः ।
न करैर्न च सेवयापि तावद्भवता तस्य कृता मनोऽनुवृत्तिः ॥८॥
कृपयाऽप्यवधीरणेन वाऽसौ हृदि नाधत्त नृपस्तवापराधम् ।
भवतोऽजनि दुर्मदो महीयानथ तेनाऽऽत्मविनाशहेतुरेषः ॥९॥
बहुशः कृतविक्रियान् महोशे **महिमासाहि**मुखांस्तुरुष्कमुख्यान् ।
दधता निजसैनिकाधिपत्ये भवताऽयं विहितोऽपरोऽपराधः ॥१०॥
बहुभिर्बत संशितैः किमन्यै**र्जगराख्यं** पुरमेव यद्बभाङ्क्षीः ।
यवनेश्वरसोदरेण यस्मिन्निजसामन्तनिवेशनं वितेने ॥११॥
चतुरम्बुधि[3]मेखलांतरे यः सहते न स्वनिदेशलेशभङ्गम् ।
पुरभङ्गमभङ्गुरप्रतापः स कथं हंत सहेत सोदरस्य ॥१२॥
बलवत्यपि बालबुद्धितोऽयं गमितो वैरतरुस्त्वयाऽतिवृद्धिम् ।
उपनेष्यति निश्चयेन राजन्नचिरेणैव पचेलिमं फलं ते ॥१३॥

---

1. M. वत्यां ।   2. M. धारि ।   3. M. वि ।

सहजेतरकर्मणि प्रवृत्ताश्चपलत्वाल्लघवः प्रयांति[1] नाशम् ।
गगनोत्पतने धृतप्रयत्ना विलसंस्था इव कीटकाः सपक्षाः ॥१४॥
अधुनापि म[मा]श्रवो यदि स्याः क्षणमन्धंकरणं मदं निगृह्य ।
नियतं त्वयि धास्यति प्रसादं करुणाद्रा[2] हि महान्ममावनीशः ॥१५॥
घनशृंखलया निबध्य कण्ठं पशुमालभ्यमिवाशु पञ्जरस्थम् ।
प्रथमं सह तैस्तुरुष्कमुख्यैर्महिमासाहिमुपायनीकुरुष्व ॥१६॥
उपदीकृतमानतैः पुरा यत्तव वंश्यैः शकभूभृतेऽनुवर्षम् ।
समुपाहर सप्तसंख्यया तद् गुणितं सद्गुणशालिने नृपाय ॥१७॥
तव सन्ति च दन्तिनो मदोग्रा गिरिकल्पा गिरिसम्भवाः कियन्तः ।
प्रतिपादय तानपेतमोहः शिवमिच्छन्महते महीश्वराय ॥१८॥
सकलासु कलासु लब्धपारा नवतारुण्यविशेषिताङ्गभङ्गीः ।
शतमर्पय नर्तकीः स्वकीया विहितागःपरिमार्जनाय राजन् ॥१९॥
भवदिष्टमिदं मयोपदिष्टं सममेतैरनुमन्त्र्य मन्त्रिमुख्यैः ।
कुरु सन्धिमनेन राज्यमृद्धं परिरक्ष श्रियमात्मर्जीवितम् ॥२०॥
अथ चेदभिमानतः प्रमाणीकुरुषे नैव सुभाषितं मदीयम् ।
अचिराद्भवितासि तत्र पान्थः स पथा येन गतो **गयासदीनः** ॥२१॥
गिर[3]मित्थमुदीर्य मुद्रितास्ये रिपुसन्देशहरे नरेन्द्रवर्यः ।
वदति स्म नवांबुदोपमानस्वरसम्भेदसमुद्धुरां स वाणीम् ॥२२॥
बहुशोऽद्भुतपौरुषप्रपञ्चं भवता वर्णयता निजस्य भर्तुः ।
प्रतिपादित एव दूतयोग्यः प्रभुभक्तिप्रगुणीकृतो गुणौघः ॥२३॥
असतोऽपि समर्थयन्ति केचित् परदोषात्मगुणानतिप्रगल्भाः ।
प्रकटानपि तान् प्रवक्तुमन्ये विनयाधीनधियो न शक्नुवन्ति ॥२४॥
बहवो यवनेषु सार्वभौमाः श्रुतपूर्वाः प्रततीकृतप्रतापाः ।
विजिताः कतिचित्कृतोपकारा मिलिताः केचन पूर्वजैर्मदीयैः ॥२५॥
रिपुमण्डलमर्कमण्डलं वा तरसोच्चैःपदलब्धये भिनत्ति ।
तनुते प्रणते करावलम्बं करदानं नहि चाहुआणवंशः ॥२६॥
मम पूर्वभवः पुरा प्रवीणान् **हरिराजः** परिभूय पारशीकान् ।
उप**थोधपुरं** दुरन्तदुर्गं [र]चयामास चिराय चारुकीर्तिः ॥२७॥

1. M. थांति । 2. M. करुणार्द्रो वा करुणात्मा वा स्यात् । 3. M. रि ।

अपरः परवीरचक्रहन्ता भुवि **चामुण्ड**समाख्यया प्रतीतः ।
समरे शकचक्रवर्तिनं तं विनियम्य स्वपुरं समानिनाय ।।२८।।
पुरुहूतदिशं **गयासदीने** चलिते दूरमनान्तरैर्निरुद्धम् (?) ।
पुरमस्य च **योगिनी**पुराख्यं निजशौर्येण ररक्ष **जैत्रसिंहः** ।।२९।।
मम सैनिक[1]पूरणं कियद्वा महिमासाहिमुखा[ः]शका विदध्युः ।
तव भूमिपतेर्भयात् प्रपन्नाः शरणं मामिति रक्षिताः स्वदेशे ।।३०।।
निजजीवनमप्युपेक्षमाणैः शरणार्थी न विमुच्यते महद्भिः ।
शिविरेव दिवि प्रतिष्ठमानः प्रथमोदाहरणं बभूव तत्र[2] ।।३१।।[3]
जगराख्यपुरस्य यद्विमर्दोऽजनि तत्राप्यपरस्य कोऽस्ति दोषः ।
यदिहाल्पतरेऽपि सम्पराये **त्वदुलूखान**प[4]लायनं निदानम् ।।३२।।
समराङ्गणसीम्नि दत्तभङ्गे स्वयमेवाधिपतौ पताकिनीनाम् ।
शिविरं द्रविणाढ्यमप्रवीरं किमु लुण्टाकगणः क्षमेत मोक्तुम् ।।३३।।
निहतः समरे गयासदीनो यदि दीनो न भवेत्स वीरगोष्ठ्याम् ।
सुभटा हि निजक्षताङ्गजास्रैरभिसिञ्चन्ति यशोमयं शरीरम् ।।३४।।
इयता कियती विकत्थना वा यदि रुद्धं पुरमङ्ग मत्परोक्षम् ।
सदनं यदि शून्यतामुपेतं प्रविशेत्तद्यवनोऽपि जम्बुकोऽपि ।।३५।।
उपरुध्य पुरं ममासमक्षं स्वयमुद्गीर्णमनोमलस्तवेशः ।
मयि संदिशति स्म सन्धिवार्तां विपरीतं चतुरत्वमेतदीयम् ।।३६।।
शरवत्समरान्तरे प्रवीरा मुखमाविष्कृतनादमापतन्ति ।
भुजगा इ[व] सञ्चरन्ति चौराः पररन्ध्रं परितो गवेषयन्तः ।।३७।।
अकरोन्मम पामरः परोक्षं पुररोधं यदि पौरुषं कियद्वा ।
प्रकटीकुरुतां पुरः स्वशक्तिं स पुनः सम्प्रति सम्परायसीम्नि ।।३८।।
इति वादिनि वादिवर्गजैत्रे तनये जैत्रमहीपतेः स दूतः ।
विरहय्य निजासनं यियासुः प्रखरो वाग्वि[5]षमुज्जगार घोरम् ।।३९।।
निजकालनिदेशभाजि मृत्यौ भृशमास्कन्दितमूर्ध्नि मानवानाम् ।
सुहृदोऽपि गिरो विशन्ति नान्तः किमुताराातिवचोहरोपनीताः ।।४०।।
सह सर्वबलेन तीर्णसिन्धुः प्रथितस्ते स विभीषणो विपक्षः ।
उपलम्भयिता भवन्तमिद्धं नचिरेणैव दशां दशाननस्य ।।४१।।

---

1. M. रिक । 2. M. तलाशुढि । 3. M. ३३, एवं क्रमेण परत्रापि संख्यांकाः । 4. M. म । 5. M. श्वि ।

घनसैनिकजालके[न] तावद् विनिरुद्धोऽसि न निर्गमावकाशः ।
अलमुत्फलनेन मोक्ष्यसे त्वं नियतं मीनवदाशु जीवनेन ॥४२॥
अथ दुर्वचसं निरस्य दूतं नरनाथः परवाहिनीनिवेशम् ।
अभिवीक्षितुमाप्तमन्त्रिमुख्यैः सह दुर्गोच्चशिरः समारुरोह ॥४३॥
इदमाह च पश्यताश्वभर्तुर्विनिवेशं विपुलं वरूथिनीनाम् ।
अविभावितपारमम्बुराशेः प्रलयप्रेरितवारिपूरतुल्यम् ॥४४॥
अनुवेलमियं सपत्नसेना मम सेनाभिरुपेयुषी विवृद्धिम् ।
गिरिनिर्झरिणीभिरुम्भिताया हरते हन्त रुचिं महाह्रदिन्याः ॥४५॥
धनलालसया नवीनभृत्या यवनापातभयेन चाभिजाताः ।
चिरकालनिरोधयन्त्रितत्वादिह निर्विण्णहृदः परे निरीयुः ॥४६॥
दिवसैरपरैः कियद्भिरेवं परिशून्या नियता पुरी भवित्री ।
समरश्रममन्तरेण मा भूत् करलभ्यं यवनस्य दुर्गमेतत् ॥४७॥
न मुहूर्तविवेचनावकाशः पतितः संमुखमुल्वणः[1] प्रतीपः ।
सदने सहसैव दह्यमाने जलशुद्धेर्नहि युज्यते विचारः ॥४८॥
समरे शमयंति वैरिवर्गानथवा जीवनमेव यापयन्ति[2] ।
इह काचन चाहुआणवंशे विदिता नैव हि पद्धतिस्तृतीया ॥४९॥
समयस्य नृशंसतां समीक्ष्य स्फुटचारित्र्यविभूषणा भवत्यः ।
यशसः सरणीषु वीरपत्नीकृतां चर्यासु[3] भवन्तु सावधानाः ॥५०॥
अवरोधगणानधोमुखः सन्निति सन्दिश्य सदोगतः स राजा ।
विससर्ज पुरोहितं प्रणम्य प्रणयामन्त्रण[4]यन्त्रितान्तरङ्गम् ॥५१॥
वितरन् स विमुच्य[5]मानविप्रप्रवरेभ्यः प्रचुराणि काञ्चनानि ।
प्रसभस्नुतमश्रुपूरमेव स्वकरस्थं कुरुतेऽस्य दानतोयम् ॥५२॥
समरोत्सुकवैरिसिंहनादैरथ निर्भिन्नमनाः सनादमुच्चैः ।
नवनीरदगर्जितेन नुन्नः प्रतिगर्जन्निव केसरी चचाल ॥५३॥
यवनाः सवनायुजास्तदानीं महिमासाहिकमीरगनूभ्यम् (?) ।
नृपतिं प्रथमं प्रतिष्ठमानं परितस्तं परिवव्रुरब्रुवन्तम् ॥५४॥
अवतीर्णममुष्य दुर्गमध्यादवधार्य प्रयतान्तरा महिष्यः ।
हुतहव्यसमेधिते हुताशे जुहवामासुरवारिता वपूंषि ॥५५॥

---

1. M. नः । 2. 'यातयन्ति' इति वा 'पातयन्ति' इति वा भवेत् ।
3. व्रतचर्यासु इति भवेत् । 4. M. मन्त्रस्म । 5. M. मुप ।

× × × × × × ।
× × × द्रागुत्तुङ्गानुत्तरङ्गांस्तुरङ्गान् ॥५६॥
धारासारैरुद्धुराणां शराणां धूलिव्रातैर्बद्धभीमान्धकारे ।
विद्युत्प्रायैर्मुक्तकोषैः कृपाणैस्तत्राकाले विभ्रमः प्रावृषोऽभूत् ॥५७॥
रेणुव्रातैर्ग्रस्तभास्वद्गभस्तौ सान्द्रीभूतध्वान्तसन्दोहभाजि ।
दिव्यस्त्रीणां व्योम्नि वैमानिकीनां तारा[कारा]रेजिरे रत्नहाराः ॥५८॥
आलोक्यास्य च्छत्रमिन्दुप्रकाशं दूरादेव व्यद्रवच्छत्रुसैन्यम् ।
गन्धेभानां दानगन्धाद्यथास्य भ्रष्टारोहा वैरिणां वारणेन्द्राः ॥५९॥
मूर्ध्नः[1] कम्पैरङ्कुशग्राहकाणां[2] शश्वत्तीव्रं बन्ध्ययन्तः प्रयत्नम् ।
मातङ्गास्ते विद्रवन्तः पराञ्चः स्वीयान्येव द्रागमृद्नन् बलानि ॥६०॥
सत्रासांस्तान्[3] संनिवर्त्य स्वसैन्यान्**नू**[4]**लूखाने**नानुजेनानुयातः ।
अव्यग्रात्मा सम्पराये समागाद्वर्षन् भल्लांस्तूर्ण**मल्लावदीनः** ॥६१॥
शस्त्राशस्त्रिव्यापृतानां भटानां साहङ्कारं सङ्गतानां रणान्तः ।
द्रागुद्भूता रक्तधाराः क्षतोत्था नादुः खेदं स्वेदवत्संस्रवन्त्यः ॥६२॥
उत्क्षिप्योच्चैः[5] प्रेरितस्तीक्ष्णखड्गो नालं भेत्तुं वैरिणो वा[6]रवाणम् ।
तत्संघट्टादुत्थितवारवाणं कञ्चुकं शानु[7]र्निन्ये मूर्छां[8]लम्बकूर्चावलम्बी ॥६३॥
क्रोधान्मुक्ता धन्विभिस्तीव्रवेगै[9]रग्रे लूनं वैरिणां वक्त्रपद्मम् ।
संबिभ्राणा व्योमकासारमध्ये बाणास्तिर्यङ्नाललक्ष्मीमवापुः ॥६४॥
संग्रामान्ते पातितानां भटानां भूषारत्नज्योतिषाऽत्युज्ज्वलाभैः ।
अस्त्रापूरैर्लम्भिताः पावकाभैर्धूमच्छायामुच्छ्रिता दन्तिदेहाः ॥६५॥
उत्तानस्थं स्रस्तमुत्कृत्तहस्तादध्यारूढाः खेटकं वद्धयवेण्यः[10] ।
तत्राजस्रप्रस्नु तास्र[11] स्रवन्तीः फेत्कारिण्यः फेरुकान्ताः प्रते[रुः] ॥६६॥
वीक्ष्य स्वीयं सैनिकं[12]शीर्यमाणं मत्वा शत्रोः शौर्यमानंत्यभाजम्[13] ।
अध्यारूढः कुञ्जरेन्द्रं नरेन्द्रः प्रायाद्यस्मिन् पारशीकक्षितीशः ॥६७।

---

1. M. र्ध्ना । 2. M. नां । 3. M. र ।
4. M. नु । 5. M. त्वैः । 6. M. व ।
7. तत्संघट्टादुत्थितस्तं कृशानुरिति भवेत् । मध्ये वारवाणं कञ्चुकमिति वारवाण-पदस्य व्याख्या केनचित् कृता लेखकप्रमादात् श्लोकान्तर्निविष्टा ।
8. M. च्र्छां । 9. M. द । 10. M. वेल्यः ।
11. M. स्र । 12. M. क । 13. भाजीति साधु ।

तं तेजोभिः प्रज्व[1]लन्तं दुरन्तैरावव्रुस्ते यौ[2]गपद्येन योधाः ।
कल्पापाये क्रूररूपं यथोच्चैर्बिम्बं पूष्णः पुष्करावर्तकाद्याः ॥६८॥
तान् दुर्वारान् वारयन् वाणवर्षैर्म्लेच्छ[3]व्रातानब्रवीत्तीव्रकर्मा ।
क्षुद्राः क्षुद्रासंनिभाः केऽत्र यूयं जाग्रत्युग्रे चाहुआनप्रतापे ॥६९॥
उल्लूखानोलूकमूकोऽत्र भूयाः प्रागेव त्वं ज्ञातसारः परोक्षम् ।
क्षुद्रैरेव द्रावितः सङ्गरान्ताच्छौरं तेजः सोढुमेवाक्षमोऽसि ॥७०॥
शंसन्नित्थं संनिपत्य प्रवीरान् सर्वारम्भैर्बाधमानानरातीन् ।
अह्नायासौ प्रत्यगृह्णान्नरेन्द्रो नागानन्यान् यूथनाथो यथैकः ॥७१॥
सर्वेष्वेव प्रेषितास्तुल्यकालं चापात्तस्य प्रापतन्तः पृषत्काः ।
स्थूलां मूर्तिं बुद्धिमप्याशु सूक्ष्मां भित्त्वा मोहं द्विप्रकारं वितेनुः ॥७२॥
नालक्ष्यन्त क्षिप्रकर्तुः पृषत्काश्छि[4]न्दन्तस्ते वातवेगादरातीन्[5] ।
उन्नीयन्ते पात्यमानैः स्म देहैः स्फारां धारां रोहिणीमुद्वमद्भिः ॥७३॥
म्लेच्छाधीशोऽप्यस्य मूर्छत्प्रतापः पत्तिव्रातैरातुदत्कुञ्जरेन्द्रम् ।
तैरत्यर्थं मर्मविद्धोऽपि युद्धे तस्थौ यत्नै रोद्धुराधोरणस्य ॥७४॥
विश्राम्यन्ती तत्र शुभ्रातपत्रच्छायासीना स्वैरमेवोभयत्र ।
भूयो भूयो भूभृतोः संचरन्ती पार्श्वं प्रापन्नैव खेदं जयश्रीः ॥७५॥
नागात्तस्मात् पातिताद् यावदन्यन्नागाद्वेगाद्वाहनं चाहुआनः ।
तावद्भिन्दन् भिन्दिपालेन वक्षश्चिक्षेपैनं वीरतल्पे विपक्षः ॥७६॥
सुचिरमथ विपक्षक्षोणिपाली[6]विनीतां[7] क्षतजमयनदीभिः क्षोणिमाप्लाव्य कृत्स्नाम् ।
तनुमनुपमरूपां स्थेयसीं कीर्तिरूपामविशदसमतेजा वीरहम्मीरदेवः ॥७७॥

इति श्रीराज-सूरजनचरिते महाकाव्ये

द्वादशः सर्गः ॥१२॥

---

1. M. क्रू ।
2. M. यो ।
3. M. वाणवम्लपैच्छ ।
4. M. छि ।
5. M. व ।
6. M. नी ।
7. M. नां ।

[त्रयोदशः सर्गः]

पूर्वो हंमीरदेवस्य सप्तमः शत्रुमर्दनः ।
सहावदीनमन्धोऽपि कुण्ठबाणेन योऽवधीत् ॥१॥
पृथ्वीराजस्य तस्यैव समो भ्राता जघन्यजः[1] ।
माणिक्यरायो मतिमानंशेन बुभुजे महीम् ॥२॥
सदाऽरुणदरातीनां स दारुणधियां पुरम् ।
तमाहितधियः साधुतमा हितकरं विदुः ॥३॥
नित्यमाश्रित्य नृत्यन्ती सद्वंशालम्बिनो गुणान् ।
खेलति स्म निरालम्बे रङ्गे यत्कीर्तिनर्तकी ॥४॥
चक्रे न पात्रमालिन्यं पतङ्गे मित्रतामधात् ।
अतः प्रतापदीपोऽस्य जगदुत्तरतां गतः ॥५॥
चण्डराजस्तनूजोऽस्य चण्डभानुसमप्रभः ।
चण्ड-राजक-पद्मानामचण्डकिरणोऽभवत् ॥६॥
स पुत्रं भीमविक्रान्तं **भीमराज**मजीजनत् ।
भीमसेनसमः स्थाम्ना भीमसेवासमृद्धिमान् ॥७॥
असौ **विजयराजा**ख्यं राजा विजयशालिनाम् ।
तनयं जनयामास जनरञ्जनचेष्टितम् ॥८॥
रयणस्तनयस्तस्य रयनर्तितविक्रमः ।
स्मयमानोद्धतानेकः स्मयमानोऽजयत् परान् ॥९॥
तस्मान्महार्घनिःसीमगुणरत्नमहोदधेः ।
कोह्लनः कुलकल्हारकलानिधिरजायत ॥१०॥
विनीतो नीतिशास्त्रेषु विनीतोल्वणदूषणः ।
स्वनये सोऽभवत् ख्यातः स्वनयेऽस्य यथा रिपुः ॥११॥
वङ्गो नामाभवत्तस्माद्भुवं गोपायति स्म यः ।
भ्रूभ[2]ङ्गोद्धतदृक्पातै[ः] क्लृप्तभङ्गो विरोधिनाम् ॥१२॥
देवो नाम सुतोऽस्याभूद्देवोपमपराक्रमः ।
नरदेवो नृणामिन्दुः शरदेवोपरञ्जितः ॥१३॥

---

1. M. जयव्यजः । 2. M. ध्रूत ।

तस्मात्**समरसिंहो**ऽभूद्यथार्थामभिधां दधत् ।
कीर्तिहंसीमुखे यस्य वियच्छैवालमञ्जरी ॥१४॥
नरपालमयं नाम्ना पुत्रं प्राप प्रतिष्ठितम् ।
नापोहति स्म यं लक्ष्मीर्नरपालक्रमागता ॥१५॥
हंमीरस्तनयस्तस्य समीरणसखप्रभः ।
अजनिष्ट प्रतापेन जनितानिष्टकृज्ज्वरः ॥१६॥
वरसिंहः सुतस्तस्य वरसिंहपराक्रमः ।
भावैरोषाश्चकारारीन्[1] वैरोपहितवैशसैः ॥१७॥
भारमल्लोऽभवत्तस्माद्भारमग्र्यं दधद्भुवः ।
सभारोचितदिग्वीरसभारोहणविश्रुतः ॥१८॥
तस्मान्**नर्मद**नामाभून्नृपधर्मधुरन्धरः ।
मर्मस्पृक् समरेऽरीणां शरैर्वर्मभृतामपि ॥१९॥
तीक्ष्णकौक्षेयकस्तस्य वैरिवामदृ[2]शां दृशाम् ।
धारामश्रुमयीं[3] दत्त्वा कज्जलश्रियमाददे ॥२०॥
धर्मपत्नी बभूवास्य **धारा**नाम्नी धरापतेः ।
अनतिक्रान्तमर्यादा यथा धारा महोदधेः ॥२१॥
नर्मदस्य महीभर्तुर्महिषी तनुमध्यमा ।
उचितं नर्मदा सापि महावंशभवा यतः ॥२२॥
सुत**मर्जुन**नामानं नृपस्तस्यामजीजनत् ।
शुद्धं स्वा[4]तीभवो बिन्दुः शुक्तौ मुक्ताफलं यथा ॥२३॥
कर्णमूर्जितसत्त्वेन जितवन्तममुं जनाः ।
विजयाभिख्यया दीप्तमर्जुनं साधु मेनिरे ॥२४॥
सञ्चरन् समराग्रेषु भीमसेनानुगोऽर्जुनः ।
पश्चाच्चकार नकुलं वाजिशिक्षाविशारदम् ॥२५॥
क्रमेणाऽऽक्रान्तभुवना द्विजेशोपरि तस्थुषी ।
मूर्तिर्मुरहरस्येव यत्कीर्तिर्विभुतामगात् ॥२६॥
विभावसुसमे तस्मिन् विभावसुनिभप्रभे ।
वसुधाराः प्रयच्छन्ती वसुधाराधिताऽभवत् ॥२७॥

---

1. M. त्तीन् । 2. M. दशां । 3. M. मयी । 4. M. श्वा ।

असौ **दशरथा**ख्यस्य दुहितुर्दहनान्तिके ।
वैजयन्त्याः स्ववंशस्य **जयन्त्याः** पाणिमग्रहीत् ॥२८॥
जयन्ती शीलसत्त्वाभ्यां प्रथिताः पतिदेवताः ।
नताङ्गी नियतं तेन जयन्तीत्यभिधां दधे ॥२९॥
आननेनाथ निन्दन्ती शारदीननिशाकरम् ।
अलकान्तेन कान्तेन क्लेशयन्त्यलिसन्ततिम् ॥३०॥
नेत्रश्रीतर्जितानेकद्राघीयःकेतकीदला ।
रदनच्छदरागेण रञ्जयन्ती रदान् सितान् ॥३१॥
अनीचस्तनसत्कान्त्या हसन्ती करिणां कटान् ।
नयन्ती कदलीकाण्डं जघनेन जघन्यताम् ॥३२॥
सरागचरणन्यासहसितस्थलसारसा ।
जैत्री शक्तिरनङ्गस्य स चकाशे शरीरिणी ॥३३॥
कुलकं निरोष्ठ्यचतुष्टयम् ॥
स तस्यां वंशधौरेयं सुतमिच्छन् सतां प्रियम् ।
प्राप पुण्यं सरः शौरेः पदाम्बुजमुपासितुम् ॥३४॥
संसारसारसरसों स ससार ससारसाम् ।
सरसः सुरसासार-रसारासि-सुसारसाम् ॥३५॥ द्व्यक्षरः ॥
अपोढकपटावेशैस्तपोभिः पृथिवीभुजा ।
नित्यमाराधयाञ्चक्रे पादपद्मं परात्मनः ॥३६॥
परापरपरेऽपारे पापपूररिपौ पुरः ।
पुपूरेऽपि रमारामे परा प्रेमपरम्परा ॥३७॥ [1]त्र्यक्षरः ॥
अयंतः सर्वसिद्धीनामाश्रयंतं श्रियः पतिम् ।
सुतरामाप्नुवन्त्येव सुतरामादिसंपदः ॥३८॥
कालेन कियता तस्य पुरः प्रणिहितात्मनः ।
स्वप्नान्ते परमेशानः प्रपन्नापन्नवत्सलः ॥३९॥
पपातापाततः पूतपतितः पापतापतुत्[2] ।
पतत्पतिपतिः पाता तप्तापि तपतां पिता ॥४०॥ द्व्यक्षरः[3] ॥
अवदच्च स्ववंशस्य वतंसं यशसोर्जितम् ।
धर्मेणाप्रतिमेनैकधुरीणं धर्मसूनुना ॥४१॥

---

1. M. अ ।　　2. M. नुत् ।　　3. M. तः ।

जयन्त्यां जयजीवातुं धनञ्जयमिवापरम् ।
अचिरेणैव लब्धासि तनयं नयकोविदम् ॥४२॥
प्रबुद्धोऽथ विशुद्धात्मा शुद्धान्तरहितः सुधीः ।
हर्षान्मेने हृषीकेशं समक्षमिव वीक्षितम् ॥४३॥
अन्तर्वत्नीं ददर्शाथ धर्मपत्नीं धरापतिः ।
मनोरथतरोः शाखामिव प्रथमपुष्पिताम् ॥४४॥
शकुन्तलेव भरतं धर्म्यं वंशधुरन्धरम् ।
जयन्तमिव पौलोमी जयन्ती सुषुवे सुतम् ॥४५॥
न परं निजवंशस्य सोऽभूदालम्बनं शिशुः ।
कलिना क्लिश्यमानस्य धर्मस्यापि महामनाः ॥४६॥
पुरा देवान् पुरोडाशैः पुरुभिः पूर[य]त्यसौ ।
इतीव मुदितो जातः प्रदक्षिणशिखः शिखी ॥४७॥
तस्य जन्मनि सम्भू[1]तैः शुभवादित्रनिस्व[2]नैः ।
पूरिता हरितो हर्षात् प्रसन्नमुखतां दधुः ॥४८॥
शूरः स्वकुलपद्मानां शूरोऽसौ रणधर्मयोः ।
इति **शूरजनं** नाम्ना तमाहुः सू[3]रयः शिशुम् ॥४९॥
शुद्धसंस्कारसम्भेदादथ सातिशयां दधौ ।
अर्जुनप्रभवः शोभां मुकुरो मार्जनादिव ॥५०॥
प्रतिपत्तिर्नृणां तुल्या प्रतिपत्तिथिमाश्रिते ।
सुधामहसि तस्मिंश्च सुधाम-हसितस्मरे ॥५१॥
विद्याः कुलोचितास्तेन गुरुणा गुरुणाऽर्पिताः ।
प्रज्ञाबलेन बालेन सहस्रशिखरीकृताः ॥५२॥
एकेनैव कराग्रेण विस्फुरत्तरवारिणा ।
स्थूलतालतरुश्रेणीं तरुणिम्नाऽप्यनाश्रितः ॥५३॥
बाललीलाविलोलोऽलं[4] विलुलाव बली बलात् ।
लवं लवं लु[5]लोलांव [व]ल्लिं वा वेल्लिवल्ललिम् ॥५४॥
लीलयापि विनिर्मुक्तास्तेन नव्यधनुर्भृता ।
अपि शैलशिखाग्राणि पातयामासुराशुगाः ॥५५॥

---

1. M. संरू । 2. M. निश्व । 3. M. शू । 4. M. त्यं । 5. M. ल ।

विदग्धवनिताकूतकलाहस्तावलम्बनम् ।
उपास्यं पुष्पबाणेन विलासानां रसायनम् ॥५६॥
भागधेयं विभूषाणां रतेः[1] प्रथममङ्गलम् ।
लावण्यामृतपाथोधेः[2] पूर्णशीतांशुमण्डलम् ॥५७॥
कोषागारं कृशाङ्गीनां मनोरथमहामणेः ।
वयो मध्यममस्याथ क्रमादाशिश्रियद्वपुः ॥५८॥ कुलकम् ।
अन्यदा तुलयन्त्यस्य वदनं विधुना सह ।
पर्याप्तरुचि तारुण्ये तत् केन तुलनामियात ॥५९॥
शैशवे कर्षता नूनमनेन करिणां करान् ।
आदाय दीर्घपीनत्वं तेभ्यः स्वभुजयोर्दधे ॥६०॥
पृथुलं पृथिवीभारं वहन्नेष न खिद्यताम् ।
कन्धरायाः परीणाहमिति तस्यातनोद्वयः ॥६१॥
स्वच्छन्दं रमतामत्र रमया सहितो हरिः ।
विशालमिति वक्षोऽस्य [निः]पक्षो विदधे विधिः ॥६२॥
प्रायो मदनिदानं स्यादन्येषां मध्यमं वयः ।
तेनैव नीतमेतस्य विनयप्रह्वतां वपुः ॥६३॥
धर्म एवाभवत्तस्य प्रणयः सर्वतोमुखः ।
अतस्तदनुवृत्त्यैनमन्ववर्तत मन्मथः ॥६४॥
शौर्यसाहससत्त्वानि तस्य नैसर्गिकाण्यपि ।
पर्याप्तिं प्रापयामास शैशवाच्चरमं वयः ॥६५॥
तत्र तत्र तता रीतिररातिरतितुत्तरा ।
तारितार्ता तुरातीत-तरुता-रतिराततः ॥ ६६॥ द्यक्षरः ।
उचिते समये शूरः संश्रित्योदयभूभृतम् ।
प्रथीयसा प्रतापेन प्राप सर्वोज्ज्वलां श्रियम् ॥६७॥
संचिकाय समर्थोऽपि पुमर्थोत्पादने स्वयम् ।
वन्तयिनीपरीवारं व्यवहाराय[3] वीरहा ॥६८॥
भवन्ति शक्तयस्तिस्रः क्ष्माभृतां जयहेतवः ।
चतुर्थी शक्तिरेतस्य विष्णुभक्तिरजायत ॥६९॥

---

1. M. ते । 　2. M. थौधैः । 　3. M. रय ।

दूनानन्दनिदानेन नन्द[नन्द]ननादिना ।
दीननादनुदाऽनेन ददे दानं दिने दिने ॥७०॥ द्व्यक्षरः ।

न केवलं कुलायातामयं वृन्दावतीं पुरीम् ।
सुदुर्गाण्यपि दुर्गाणि चकार करसात् कृती ॥७१॥

सर्वाशाः परिपूरयन् वसुचयैः पद्माकरालम्बनैः
सूरः शूरजनश्च तुल्यमुदयं जातः प्रतापोन्नतौ ।
सूरः पर्वणि सङ्गतः परमवत्येकं द्विजाधीश्वरं
नित्यं शूरजनो धिनोति शतशस्ताद्दग्द्विजाधीश्वरान् ॥७२॥

यत्राऽऽशाजैत्रयात्राकुतुकिनि सहसा त्रा[1]सितारातिचक्रे
शक्रेभश्रोत्ररन्ध्रं दलयति बलवत्कार्मुकक्रेङ्कृतेन ।
प्रोद्दामभ्राम्यदद्रिप्रतिभटकरटिव्राततीव्रां[घ्रि]पात-
व्यग्रां दर्वीकरेन्द्रः कलितफणभरक्लेशमुर्वीं बिभर्ति ॥७३॥ [2]

यस्य प्रस्थानवेलाविलसदविरलक्रूरढक्कानिनाद-
त्रासादाशागजेषु स्खलनपर-वशा-भुग्नजङ्घां गतेषु ।
वल्गत्सामन्तवर्गप्रबलपदभरव्यग्रभोगीन्द्रकम्पा-
दासीदाशीविषाणां सदनमपि समाक्रान्तमन्तर्जरेण ॥७४॥

पाण्डित्यं गाण्डिवस्याप्यपहरति हरित्कुक्षिनिक्षिप्तनादे
कोदण्डे यस्य चण्डे समरभुवि समारम्भसम्भारभाजि ।
दूरोत्क्षि[3]प्तैः समन्तान्नभसि रयवशात् खण्डितैर्वैरिमुण्डै-
र्भानुः स्वर्भानुशङ्काशकलितहृदयः सम्भ्रमी बंभ्रमीति ॥७५॥

कोटाख्यं कूटयन्त्रप्रकटनपटुभिः कारुभिर्दारुणं तद्
दुर्गं भर्गाचलेन्द्रप्रतिभटमटवीदुर्गमक्रूरमार्गम् ।
विद्राव्य द्राग्विदूरे हरिरिव नरकं **मालवानामधीशं**
विक्रान्त्या स्फीतकान्त्या गुणगरिमभृतामग्रणीरग्रहीद्यः ॥७६॥

विस्रस्तैः केशहस्तैर्नवसलिलमुचां विभ्रमं दर्शयन्त्यः
शम्पाः सम्पादयन्त्यो दिशि दिशि कनकस्निग्धगौरैः प्रतीकैः ।
धाराभिर्बाष्पवारां धरणिधरधुनीधोरणीः पूरयन्त्यः
क्रान्ताः कान्तारसीमन्यहितयुवतयः प्रावृषन्ति स्म यस्य ॥७७॥

---

1. M. त्रा । 2. M. ७४. एवमासर्गसमाप्ति एकैकांकाधिका संख्या वर्तते ।
3. M. दूतोक्षि ।

नाला व्यालाधिनाथः स्फुरदमलदलान्यम्बुदाः शारदीना-
स्तारानाथो वराटः किरणसमुदयस्तस्य किञ्जल्कपुञ्जः ।
स्फारास्ताराः परागावलिरलिपटलं व्योम यस्यानिशं तद्-
व्याकोषं ब्रह्मपेशीसरसि विजयते यद्यशःपुण्डरीकम् ॥७८॥

तेलङ्गीरङ्गचोरः प्रसभमपहरन् **केरली**केलिवार्ता-
मान्ध्रीनीरन्ध्रपीनस्तनघुसृणघनालेपलद्दर्मी विलुम्पन् ।
कार्णाकीकर्णपूरप्रणयमपनयन्नाविरासी[द्य]दीयो
लाटीताटङ्कचक्रच्युति-च[प]ल-चमत्कारकारी प्रतापः ॥७९॥

पारावारान्तरालामवनिमुपगताः केऽपि वीतप्रचाराः
कारागारान्धकारान्तरमपि रिपवः केचिदुद्भ्रान्तदाराः ।
आरान्नाराचधारा[1]निपतनचकिताः केचिदाक्रष्टसाराः
स्फारामाराध्य धारां मधुन इव कृपां यस्य सम्प्राप्तपाराः ॥८०॥

इति सूरजनराजचरिते महाकाव्ये
त्रयोदशः सर्गः ॥१३॥

---

1. M. धर ।

[चतुर्दशः सर्गः]

जगदुज्ज्वलेन **जगमाल**-भूभृता वितरिष्यताऽथ **कनकावतीं** सुताम् ।
प्रहितो हितोचितमतिः पुरोहितः परिणेतुरर्जुनसुतस्य सन्निधौ ॥१॥
श्रुतवान् पुरापि कनकावतीगुणान् स्वजनानुरञ्जनकृती नराधिपः ।
सुचिरं विचार्य सचिवैः सबान्धवैर्जननीनिदेशमकरोत्सुमङ्गलम् ॥२॥
अथ सौम्यमूर्तिरतिधीरदुन्दुभिध्वनिनोपहूतपृतनाभिरन्वितः ।
अचलद् वलाहकवरूथिनीवृतः समयस्तपात्यय इवातिशर्मदः ॥३॥
अधिकत्वरोऽपि मनसा स धीरधीर्जगमालपत्तनविलोकनं प्रति ।
गमयाञ्चकार कतिचिन्निशीथिनीर्नृपतिर्नृपोचितगतेन वर्त्मनि ॥४॥
उपशल्यसङ्गतममुञ्च शुश्रुवान् प्रमदेन **वंशवहला**जनाधिपः ।
उपगम्य साधु विहितैः सभाजनैः पुरमानिनाय सहितं पुरोधसा ॥५॥
अवधार्य शुद्धमुभयत्र तद्विदो महितं मुहूर्तमथ मेदिनीपतिः ।
उपचक्रमे रचयितुं क्रमागता दुहितुर्विवाहसमयोचिताः क्रियाः ॥६॥
रुचिरोत्सवोचितपिशङ्गवाससः पटवासपाटलतरावगुण्ठनाः ।
इतरेतरार्पितकरावलम्बनाः खदिरोपनीतमधुराधरश्रियः ॥७॥
प्रमदान्मदादपि दृगम्बुजाञ्जलौ परिहासपेशलतया परस्परम् ।
अवलोकयन्त्य उदितस्मिताः कलं प्रतिसद्म पद्मदललोचना जगुः ॥८॥
रघु[1]नाथविक्रमकथोपबृंहितं जनकात्मजापरिणयोचितं क्वचित् ।
क्वचिदिन्दुशेखरविनोदमञ्जुलं गिरिजाविवाहविधिवर्धितस्पृहम् ॥९॥
मुरवैरिकौशलविशेषितं क्वचिद्विलसद्विदर्भतनयास्वयम्बरम् ।
जगुरङ्गनाः प्रतिगृहं सुमङ्गलं ननृतुश्च वारवनिताः प्रमोदतः ॥१०॥
कलधौतकुम्भविलसत्पयोधरा कदलीप्रकाण्डरुचिरोरुरञ्जिता ।
निचिता विचित्रतरया पताकया नगरी व्यराजत यथैकनागरी ॥११॥
अथ शङ्खमङ्गलमृदङ्गडिण्डिमध्वनिभिर्विशेषितनिरन्तरत्वराः ।
शुभगन्धतैलमनिशं हरिद्रया निदधुर्वधूवपुषि सत्पुरन्ध्रयः ॥१२॥
अवदातशीतलसुगन्धिपावनैः सलिलैः सुवर्णकलशोद्धृतैरिमाम् ।
विविधौषधीभिरुपनीतमङ्गलाः स्नपयाम्बभूवुरपि ताः समाहिताः ॥१३॥

---

1. M. अतः परं ते इत्यधिकम् ।

परिधाप्य धौतममलं दुकूलयोर्युगलं मरालमिथुनोपलक्षितम् ।
अनयन्नितान्तनिपुणा नताननां प्रतिकर्मसप्तनि[1] वधूं पुरन्ध्रयः ॥१४॥
अदसीयकुन्तलकदम्बकादधो निहिताऽगुरुप्रभवधूपधोरणी ।
अतिकालिमानमपि चारु सौरभं किमतो ग्रहीतुमकरोदुपासनम् ॥१५॥
चिकुरेण चामरविशेषचारुणा सितमालया च सुतनुः पताकया ।
मनसि स्वभर्तुरगमन्मनोभुवः प्रथमाधिकारधृतकेतुयष्टि[2]ताम् ॥१६॥
स्वत एव हेमशतपत्रसोदरे तदलीकवर्तदलिके[3] परिष्कृतम् ।
हरितालसम्बलितरोचनाञ्चितं न विशेषकं रुचिरतां व्यशेषयत् ॥१७॥
प्रकृतिस्थयोरपि तदीयनेत्रयोर्युगलेन येन विजयी जगत्त्रये ।
यदधायि तत्र पुनराभिरञ्जनं तदमन्यत स्वमयशो मनोभवः ॥१८॥
निजविभ्रमाभरणयोस्तु तद्भ्रुवोः प्रतिकर्म नान्यदवशिष्यते ध्रुवम् ।
कुटिलीभवत्यहह[4] यत्र कौतुकात् कुटिलीकरोति न शरासनं स्मरः ॥१९॥
कलितैकचक्रमतिवक्र[5]धीर्ध्रुवं जनकं जनार्दनमुदीक्ष्य मन्मथः ।
कनकावतीश्रुतिवतंसचक्रयोर्युगलं दधे तदधिकत्वलब्धये ॥२०॥
विनतभ्रुवः श्रवणभूषणाच्छलान्मुकुरद्वयं निजमधान्मनोभवः ।
यदुदीक्षणेन नितरां मुनेरपि द्विगुणो भवेदहह मन्मथभ्रमः ॥२१॥
अधिनासिकं निहितमच्छमौक्तिकं नितरामशोभत मृगीदृशस्तदा ।
रदराजिनिर्मलरुचां जिघृक्षया रदनच्छदान्तिकमिवागमत् स्वयम् ॥२२॥
अधरे कुतूहलवशात् प्रसाधिका बहुधा न्यधत्त नव-यावकद्रवम् ।
सुतनोस्तथापि सहजोस्य शोणिमा न मनागपि स्म भजते विशिष्टताम् ॥२३॥
कुचकुम्भसीम्नि मृगनाभिनिर्मिता नितरां रराज मकरी मृगीदृशः ।
हृदयस्थितस्य मदनस्य केतनं प्रियमभ्युपैतुमिव संभृतोद्यमा ॥२४॥
स्तनयोर्मनोरमतनोः सुवृत्तयोरुचितं तथाविधगुणेन सङ्गतम् ।
असमञ्जसं परममेतदञ्जसा तरलोऽपि यत् कृतपदस्तदन्तरे ॥२५॥
रशनागुणेन सुतनोः सखीजनः किमयोजयज्जघनमण्डलं पुनः ।
वसता हि तत्र सततं मनोभुवा स्वधनुर्गुणेन सगुणीकृतं यतः ॥२६॥
नवपल्लपाटलमलक्तकद्रवैर्विरराज राजदुहितुः पदद्वयम् ।
युगलं सुजातसरसीरुहोर्यथा किरणैर्नवोदितमयूखमालिनः ॥२७॥

---

1. सद्मनि इति स्यात् । 2. M. यदि ।
3. वर्णफलके इति स्यात् । 4. 'भवती'त्यत्र पुस्त्वं चिन्त्यम् । 5. M. चक्र ।

इति सज्जिता जितमनोजकामिनीतनुकान्तिरन्तिकनिवेशितं पुरः ।
निभृतं निरीक्ष्य मुकुरं चकार सा घटिकानिवेदकनिनादगं मनः ॥२८॥
स तदाऽर्जुनस्य तनयोऽपि नीतिमानुपपादिताखिलयथोचितक्रियः ।
अभिमन्त्रितं तदुपयोगि ऋग्विदा जगृहे सुगन्धिकुसुमाक्षतादिकम् ॥२९॥
विविधाङ्गरागरुचिरः स निर्बभौ विशदत्विषा कुसुममालयाऽञ्चितः ।
कटकावकाशलसदभ्रगङ्गया बहुधातुचित्रिततनुर्यथाऽचलः ॥३०॥
समये च तत्र मिलने समुत्सुकावभिवीक्ष्य वासरमणिर्वधूवरौ ।
अनुपालयन्निव तयोर्मनोरथं चरमक्षमाधरसमीपमीयिवान् ॥३१॥
गगनद्रुमस्य चरमाशया क्षणं तलशाखया स्थगितमर्कमण्डलम् ।
परिणामपाटलमधोमुखं पुरः पतनोन्मुखं फलमिव व्यभाव्यत ॥३२॥
उररीकृताखिलवसुव्ययोऽपि सन्ततिरागतो बत निषेव्य वारुणीम् ।
विवशः पतन् दिनमणिर्महीतले परिमोक्तु[1] मम्बरमपि प्रचक्रमे ॥३३॥
वशगो बभूव विसिनीसुहृत्तथा वरुणस्य हंत हरितोऽङ्कमाश्रितः ।
इतरासु दिक्षु भगवानयं यथा न करप्रसारणविधावपि क्षमः ॥३४॥
जगतीषु योऽतिमहितो महःपतिर्महसां भरेण दुरवापदर्शनः ।
अवलोकते स्म सुखदृश्यमप्यमुं विधिना व्यपेतविभवं न कश्चन ॥३५॥
अथ वारुणीभजनजातकल्मषं परिमार्ष्टुमुद्यत इव त्विषाम्पतिः ।
भृगुपातसाहसरसे दधन्मनः शिखरं जगाम चरमक्षमाभृतः ॥३६॥
खरकालखड्गदलितस्य निर्दयं प्रशमं दिनस्य सहसा गमिष्यतः ।
रुधिरारुणं शिर इवार्कमण्डलं न्यपतत् पयःसु चरमस्य नीरधेः ॥३७॥
उचितं तदेव यदतीव-मत्सरा स्थितिमाससाद न चिरं पितृप्रसूः ।
स्फुटमन्तरायितमकारणं यया बत यामिनी-दिवसयोः समागमे ॥३८॥
विकलं वियोज्य मिथुनं रथाङ्गयोस्तमसेऽवकाशमविदाद्[2] वितन्वती ।
अवमत्य संभृतपुटाञ्जलीन् द्विजांश्चपला पलायत जवात् पितृप्रसूः ॥३९॥
उदयं प्रयाति नियतं तमोहरो हरिवाहनस्य हरितोऽङ्कमाश्रितः ।
इति रोषतः किमु तमः समुन्नमन्मलिनीचकार पुर एव तन्मुखम् ॥४०॥
व्यसनेन वासरमणेर्विमूर्छितां नलिनीं निमीलितसरोजलोचनाम् ।
विधुराऽलिधोरणिरधीरपक्षतिव्यजनैरवीजयदथोच्चनिस्वना ॥४१॥

---

1. M. क्षु ।   2. मचिराद् इति भवेत् ।

कुशलः स्वकीयसुखकृत्य एव यः स मुदा जगाम मधुपः कुमुद्वतीम् ।
अपरः पुनः परवशोऽतिसौहृदात् कमलोदरेषु सहते स्म बन्धनम् ॥४२॥
इतरेतरं घटितकन्धरं दधावधिचञ्चु चञ्चुमनिमेषलोचनम् ।
तदपि व्ययुज्यत युगं रथाङ्गयोर्नियतिं निवर्तयति नैव पौरुषम् ॥४३॥
निरगुर्गभीरगिरिगह्वरोदरात् तरसा तमांसि सहितानि कौशिकैः ।
दुरितं दृशोः श्रवणयोश्च देहिनां समकालमेव फलितं तदाऽभवत् ॥४४॥
अवशिष्टसांध्यकिरणात्त्रसन्निव द्विषतोऽस्तगस्य करपातशङ्कया ।
इतरा निरुध्य हरितः समन्ततश्चरमं रुरोध चरमां तमश्चयः ॥४५॥
विरलं तमः प्रथममुद्गतं क्वचिज्जनयत्तदाकृतिषु तत्तया भ्रमम् ।
निविडीभवत्तु निखिलं विधाय तन्नयनातिगं भ्रमकथां न्यवर्तयन् ॥४६॥
किमशीतरोचिषि परोक्षतां गते हरितोऽपि तस्य सरणीमशिश्रियन् ।
विरहादमुष्य कथमन्यथाऽभवन्न स पूर्वपश्चिमविवेचनोदयः ॥४७॥
अतिदूरवर्तिनि समीपगेऽथवा त्रसरेणुषु त्रिदशभूधरेऽपि वा ।
विनिमीलने भृशविकासनेऽपि वा न विशेषलेशमपि चक्षुरन्वभूत् ॥४८॥
किमगाधपाथसि निमग्नमम्बुधेः किमु कालकूटपटलान्तरस्थितम् ।
किमुत प्रगाढतम-मोहमध्यगं तमसा जगत् किमुदरे निवेशितम् ॥४९॥
नयति स्म यन्नयनमप्यनामयं भृशं[1]मन्धतां तिमिरजालमुल्वणम् ।
अभिसृत्वरीनयनयोर्बभूव तन्ननु सिद्धमञ्जनमनङ्गवैभवात् ॥५०॥
नवनीलचोलरचितावगुण्ठना मृगनाभिपङ्किलतरास्यपङ्कजाः ।
चकितास्तमोमणिमहःकणादपि त्वरिताः स्वकान्तमभिसस्रुरङ्गनाः ॥५१॥
अवलम्ब्य दण्डमुपयास्यता पुरो विधृतं स्मरेण विधुतान्यभीतिना ।
ययुरेव दूरमपि यावदीप्सितं मुषितेक्षणेऽपि तिमिरेऽभिसारिकाः ॥५२॥
निविडाधिनिर्दलितहृद्विनिःसृतैरिव कोकयोर्वि[2]रहवर्हिषः कणैः ।
तिमिरोच्चयस्य तनुकण्टकैरिव स्फुरितं तमोमणिभिरम्बरान्तरे ॥५३॥
निलये निलीय मुखनेत्रमुद्रणामवलम्ब्य कालविभुतां विभावयन् ।
शुककोकिलप्रभृतिरन्धमूकवच्छ्रुतवाननुलूककुलदीर्घडम्बरम् ॥५४॥
अधिमूलमिन्द्रककुभोऽथ लोचनैरविभावितस्फुटविशेषमुन्मुखैः ।
तिमिराम्बुराशिपुलिनोपमं पुरः किमपीक्ष्यते स्म शवलोज्ज्वलाकृति ॥५५॥

---

1. M. भृशा ।　　2. M. वि ।

अभिरेजुरुज्ज्वलितशक्रदिङ्मुखा हिमरोचि[1]षः कतिपये मरीचयः ।
चकितं चकोरनयनाभिरीक्षिता जयवैजयन्त्य इव पुष्पधन्वनः ॥५६॥
दयितस्य तूर्णतरभाविसङ्गमं कथयन्त्यतिस्फुटमुखं प्रसादतः ।
प्रियदूतिकेव पुरुहूतदिक् पुरः शिथिलीचकार[2] तम उल्वणं निशः ॥५७॥
परिचु[3]म्ब्य पार्श्वमिलितां पुरोदिशं कृतकानुरागकलितः कलानिधिः ।
अदिशद्दिवोऽङ्कमनु कुङ्कुमारुणान् क्रमशः करानभिमुखं प्रसारितान् ॥५८॥
प्रथमानुरागविगमेन पूर्वदिक्परिरम्भमुज्झितवता हिमत्विषा ।
शमितप्रदोषतमसा प्रसेदुषा सुरवर्त्मनि स्थितिरकारि निर्मले ॥५९॥
उदितः समग्रकलया कलानिधिस्तपनस्य पादहतिभिः प्रपीडिताम् ।
चिरकालमुद्रितमुखीं कुमुद्वतीं व्यतनोत्प्रबोधयितुमायतां रुचिम् ॥६०॥
अमृतद्रवेण जगती कृतार्थिता द्रवतां च येन दृशदोऽपि लम्भिताः[4] ।
उदये स्वभर्तुरपि तस्य जज्वलुः किमहो महौषधिगणाः प्रतिक्षपम् ॥६१॥
विहितौ तुषारकिरणस्य धामभिर्मकरध्वजावतितरङ्गितावुभौ ।
स्थितिमेक एव न जहौ यथोचितामपरः परस्थितिमपि व्यलोपयत् ॥६२॥
यदि चन्द्रिकापि मिथुनं रथाङ्गयोरदहन्न तत्र शशिनोऽनुयोज्यता ।
विरहाग्निदग्धमनसां हि कामिनामपि जीवितं व्रजति वज्रकीलताम् ॥६३॥
उदितः कलानिधिरहासि कैरवैः ककुभः प्रसेदुरुदजृम्भि सागरैः ।
बिसिनी तु बन्धुविरहेण मूर्छिता जगदेव वेद तमसा तिरोहितम् ॥६४॥
उदिते कलाभृति कुतूहलान्वितैः कृतमङ्गलः प्रथममग्रजन्मभिः ।
परिवारितः परिजनैरथार्जुनिः स जगाम धाम जगमालभूभृतः ॥६५॥
वरसङ्गिमङ्गलमृदङ्गनिस्वनः क्रमशः समीपतरवर्तितां व्रजन् ।
पुलकैश्चकार नितरां वधूवपुः सहसा प्रगाढपरिरम्भिकञ्चुकम् ॥६६॥
दधिचन्दनार्द्रकलशोपशोभितं विलसद्विचित्रतरचारुतोरणम् ।
पवमाननर्तितपताकमुच्चकैरविशद्वितानविततं स मण्डपम् ॥६७॥
धृतचारुमङ्गलपटावगुण्ठनां कनकासने विनिहितां कुमारिकाम् ।
परिणेतुरानतमुखीमुपानयन्नहमग्रिकाभि[5]रुचिताप्तबान्धवाः ॥६८॥
चिरकालमुत्सुकतया भृतात्मनोरनयोः परस्परविलोकनं प्रति ।

1. M. धि । 2. M. ढ । 3. M. त्वं ।
4. M. तः । 5. M. मि ।

अभवद्विशालतरशैलसन्निभः क्षणमन्तरालवितितीकृतः पटः ॥६९॥
अपसारिते जवनिकाप्र[1]चारणे मिलितं कुमारमिथुनं परस्परम् ।
मनसोरिवात्तगुणयोः सुवासयोः कुसुमस्रजोर्विनिमयं विनिर्ममे ॥७०॥
हुतहव्यवाहपुरतः पुरोधसा समयोजि पाणियुगलं तयोर्मिथः ।
हृदयं तु पुष्पधनुषो निदेशतः प्रणयेन तत् प्रथममेव योजितम् ॥७१॥
यदसुस्रु[2]वन् करसरोजयोस्तयोरनिवारिताः सपदि घर्मबिन्दवः ।
समरोपयन् सपदि तत्र दूषणं हुतजातवेदसि जनाः सभासदः ॥७२॥
शिखिनः प्रदक्षिणविधेरनन्तरं गुरुणाऽर्पिता हवनलाजमुष्टयः ।
अनवाप्य कम्प्रकरसम्पुटं तयोर्व्यवधिं विनैव पतिता हुताशने ॥७३॥
अवलोकितुं पतिमुखेन्दुमादराद्वदता[3] मुहुर्गुरुजनेन यन्त्रिता ।
दर[4]मुन्नमय्य[5] भृशमानतं शिरः क्षणमक्षिपद्ममुदमुद्रयद्वधूः ॥७४॥
अधिरोपिता नववधूः शिलातलं हृदयं निजञ्च परिणायकेन सा ।
प्रथमं कठोरतरमस्पृशत् पदा चरमे ममज्ज करुणामृदीयसि ॥७५॥
प्रणिपत्य विप्रसमुदायमादरात् क्रमशो गुरूनपि तथैव दम्पती ।
विनयानतौ जगृहतुः शुभाशिषः पतिदेवताभिरुपपादितास्ततः ॥७६॥
जगमालभूपतिरिति प्रमोदवान् सह बान्धवैरुचितपात्रलाभतः ।
निरवाहयद्वहलसम्पदोज्ज्वला दुहितुर्विवाहसमवायिनीः क्रियाः ॥७७॥
अथ नूतनोद्वहनवर्धितश्रियो विहितानुवृत्तिरिव सादरं ह्रियः ।
कतिचिद्दिनानि शिथिलोद्यमो बहिर्मदनोऽन्तरेव विजहार सुभ्रुवः ॥७८॥
प्रहिता प्रयत्ननिपुणैः सखीजनैः[6] कुतुकेन केलिगृहदेहलीगतैः ।
अनुतल्पमर्पयति न स्म सम्भ्रमाच्चरणं निरुद्धगतिरायतेक्षणा ॥७९॥
अधिरोप्य सप्रणयमङ्कमुत्सुके चिबुकं परिस्पृशति पाणिना प्रिये ।
परिवर्ति वक्त्रमपिधातुमञ्चलं विचकर्ष ति[7]र्यगधिकत्वरा वधूः ॥८०॥
परिरम्भिणि प्रियतमे बलादसौ शिथिलीचकार भुजवल्लिमाकुला ।
पुलकावली तु कुचयोरवर्णयद्बहिरुद्गतं मदनविक्रमाङ्कुरम् ॥८१॥
प्रतिवाचमीरयतु वा नवा बधूर्दयितस्तु सन्ततमभूत् कथापरः ।
अदसी[8]यलोचनयुगं विलोकयन् वचनश्रुतौ सुचिरमुत्तरङ्गितम् ॥८२॥

---

1. M. प । 　2. M. स्रु । 　3. M. त । 　4. M. व ।
5. M. थ । 　6. M. ननैः । 　7. M. भि । 　8. M. शी ।

निभृतं निरुध्य वसनाञ्चलं प्रिये गमनाय शंसति मुहुः सुमध्यमा ।
गलितोत्तरीयमतिसत्वरोत्थिता स्ववपुर्निरीक्ष्य निषसाद सत्रपा ॥८३॥
शनकैर्विधूय करपल्लवं मुहुः सुतनोर्विधून[1]यति कौतुकात् प्रिये ।
निजकङ्कणक्कणितभेजितत्रपा चकितं दधे प्रतिगवाक्षमक्षिणी ॥८४॥
उपचीयमानविभवेन सन्ततं निविडानुरागरुचिरेण सुभ्रुवः ।
अतिशायितां शिथिलयन्नथ त्रपां[2] मदनेन सन्धिविधिमैहत स्वयम् ॥८५॥
परिचुम्बनेच्छु[3]रलमावृणोन्मुखं परिरिप्सुरङ्गमधिकं जुगूह सा ।
नियतं च ने[4]ति पदमीरितं तया सुचिरं रह[ः]सु विधिवाचकं प्रिये ॥८६॥
उपगूहनानि चकिता नखक्षतादपि चुम्बनानि रदनार्पित[5]व्रणात् ।
स्फुरितस्पृहापि दयितस्य सङ्गमे न तदाऽन्वमोदत नवोढकामिनी ॥८७॥
नवसौहृदं मृदुनयेन पालयन्मदनोपदेशमपि नातिलङ्घयन् ।
कियतीभिरेव रजनीभिरार्जुनिः सुतनोः स विश्वसितपात्रतां ययौ ॥८८॥
उपनाभि चञ्चलकरे नरेश्वरे प्रतिषेधवाचकमसर्वमीरितम् ।
मदनस्य मङ्गलऋचस्तदाभवत् प्रणवो नवोढहरिणीदृशो वचः ॥८९॥
न चकार चुम्बनविधौ विरोधितां न जुगूह देहमुपगूहनेष्वपि ।
उपनीवि सञ्चरणचञ्चलं वधूः करपल्लवं रतिगुरोरवारयत् ॥९०॥
चिरनिर्गतास्वपि सखीषु मन्दिरान्मदिरेक्षणा क्षणमवाङ्मुखी स्थिता ।
भृशमाचकाङ्क्ष शयनाधिरोहणे दयितेन पाणितलकर्षणं बलात् ॥९१॥
नवसौहृदस्य परिपालनोत्सुका च[कि]ता पुरः प्रणयभङ्गवैशसात् ।
उंररीचकार निजखेदमप्यसौ हृदयेश्वरस्य हृदयानुवृत्तये ॥९२॥
इति निर्विशन् विषयसंभवं सुखं प्रमनाः समं वसुमतीशकन्यया ।
दिवसानि वंशवहलानिवासिनां कतिचित्ततान सुकृती स कौतुकम् ॥९३॥
जिगमिषुः स्वपुरं स पुरस्कृतः सुकृतिना नृपतिः सह भार्यया ।
अनुमतिं मति[6] मान् सु[7]खमग्रहीद्विनयतो जगमालमहीपतेः ॥९४॥
प्रतिष्ठासुः प्रातर्निजनगरमागामिनि दिने समेतः सम्बन्धव्यतिकरितमैत्रीमधुरितैः ।
कथानामाभोगैः प्रणयविनयोद्रेकपिशुनैरनैषीदासीनः क्षणमिव निशां तां नरपतिः ॥९५॥

इति सूर्जन-चरिते महाकाव्ये
चतुर्दशः सर्गः ॥१४॥

---

1. M. भूत । 2. M. पा । 3. M. दु । 4. M. नो । 5. M. र्पितं । 6. M. भि । 7. M. मु ।

[पञ्चदशः सर्गः]

नाथः कलानामथ कालयन्त्रितां विभावरीं यानमुखीं विभावयन् ।
छायाव्यपायाद्वहति स्म धूसरं वियोगिनारीवदनोपमं वपुः ॥१॥
यो वर्धयत्यम्बुनिधीन् दिवौकसां बिभर्ति कुक्षिं वपुषो व्ययेन यः ।
जीवातुराद्योऽस्य जगत्त्रयस्य यः स दुर्दशाया दशनान्तरं गतः ॥२॥
पीताऽरुणेनाक्षिगतेन[1] कौमुदी जगाम लक्ष्मीर्मुदिताऽब्जकाननम् ।
कुत्रापि याता प्रशमं[2] निशीथिनी कलङ्कशेषः पतितः कलाधिपः ॥३॥
दोषाः परं वृद्धिमयन्ति सन्ततं गुणास्तु मुञ्चन्ति विपत्सु पूरुषम् ।
कान्त्या विहीनस्य विधोः पतिष्यतः कलङ्क एवोद्भटतां जगाम यत् ॥४॥
उद्यन्नन्[3] रुर्मुखरञ्जनं पुरो दिशो विधाय क्षणमङ्गरागजाम् ।
लक्ष्मीं समग्रां निदधे निरत्ययामुदञ्चिताङ्गीषु सरोजराजिषु ॥५॥
कामं कलाभिः परिपूर्णमण्डलो धुनोतु धाम्ना तिमिराणि चन्द्रमाः ।
धाम्नां निधेरग्रसरेऽपि[4] यद्बलं तमोनिरासे न भवेत्तदन्यतः ॥६॥
शोणैः करैः संक्रमयन्मनोगतं × × गकान्तेष्वनलं रथाङ्गयोः ।
सौभाग्यलक्ष्मीं गलहस्तयन्[5] पुरः कुमुद्वतीनामुदगान्मरीचिमान् ॥७॥
वातायनेभ्यः पतिता नभोमणेर्मरीचयो गैरिकरागरोचिषः ।
मर्माण्यभिन्दन्नितरां भुजान्तरं विमोचयन्तो दयितान्नतभ्रुवम् ॥८॥
पद्माकराणां विरलाः शनैः शनैस्तरङ्गलेखा गणयन्निवोदिताः ।
सौरभ्यसारं सरसीरुहां हरन् समीरणः सञ्चरति स्म मन्थरम् ॥९॥
बाष्पोदबिन्दुप्रतिमान्मृणालिनीमुखे विलग्नान् हिमवारिशीकरान् ।
प्रोञ्छन् करेण द्युमणिम्र[6]दीयसा प्रसादलक्ष्मीमनयच्छनैः शनैः ॥१०॥
क्षिप्ता नभोनीरनिधौ सुधानिधेर्लसन्मयूखावलिदुग्धधोरणीः ।
आकृष्य हंसः समकालमग्रसद्विसारितारालि-विसाङ्कुरानपि ॥११॥
रागेण यावन्म्रदिमानमीयिवान्नभोमणिस्तावदगादनुष्णताम् ।
अस्मिन् कठोरत्वमुपेयुषि क्षणात् पतङ्गकान्त[:] प्रतिपाल[7]मज्वलत्[8] ॥१२॥

---

1. नाभिगतेनेति स्यात् ।
2. M. थनं ।
3. M. भू ।
4. धाम्नां निधेरग्रसरे इत्यरुणे इत्यर्थः ।
5. M. स्तगलहलक्ष्मीयन् ।
6. M. मैं ।
7. पात्रमिति स्यात् ।
8. M. न् ।

निस्तीर्य पूर्वाद्रिविलङ्घनक्लमं व्रजन्नथ व्योममणिः प्रचण्डताम् ।
नोद्वेजयामास मरीचिभिर्द्वयीं रथाङ्गकान्तामपि पद्मिनीमपि ॥१३॥

नवोढवध्वा नमदाननश्रियो नवीनमापीनकुचप्रसाधनम् ।
अन्योन्यमक्षिभ्रुवविभ्रमेङ्गितैर्नखक्षतं निर्दिदि[1]शुर्मृगीदृशः ॥१४॥

इत्थं प्रवृत्ते दिवसस्य × × × समाप्य कृत्यं कृतिनां पुरःसरः ।
देवान् द्विजातीन्मिलितान् गुरूनपि प्रतिष्ठते स्म प्रयतः प्रणम्य सः ॥१५॥

भूयिष्ठभूषामपि नव्यभूषणैः प्रसाध्य भूयः कनकावतीं सुताम् ।
यानोन्मुखीं यौवतनीतियन्त्रितं जगाद माताऽश्रुभराकुलं वचः ॥१६॥

जानामि जन्मावधि शीलशालिनीं कुलस्य शोभां भवतीमकल्मिमाम् ।
विज्ञातधर्मासि कुलीनयोषितां त्वमात्ममत्यैव हि सत्पथीनया ॥१७॥

वत्से तथापि प्रतिबोधयाम्यहं प्रगाढवात्सल्यवशात् पुनः पुनः ।
दुःखेन रक्ष्यं कुलपालिकाव्रतं प्रमादनिर्धूतधियां हि योषिताम् ॥१८॥

मन्दाक्षदाक्षिण्यदयाक्षमादयः स्वभावसिद्धाः कुलकामिनीगुणाः ।
तेषां प्रकर्षाय कुरुष्व[2] कौशलं ततो ह्यसाधारणता नतभ्रुवाम् ॥१९॥

गृह्णातु पाणिं पृथिवीपुरन्दरो जनुर्मनुष्येश्वरतो[3]ऽस्तु दैवतः ।
सामान्यसम्भावनया नितम्बिनी न पट्टराज्ञीपदपात्रतामियात् ॥२०॥

देवद्विजन्मातिथिदुर्गतान् मुहुः प्रयत्नतः प्रीणय तत्तदर्हणैः ।
मुक्त्वा मुखम्लानिमनीचमानसा वनीयकेभ्यो वितरोचितं वसु ॥२१॥

शुश्रूषमाणा गुरुवर्गमुद्धतश्रमा यदि स्याः सुकुमारभावतः ।
निर्वेदखेदं खलु तत्र मा कृथाः कृतार्थतामेव ततोऽवधारय ॥२२॥

आम्रेडनं चेत् कुरुते गुरुः स्वयं प्रसन्नचेताः सुकुमारभाषितैः ।
[भूया]स्तदायासभिदो हृदीशितुः सभाजनार्थं शुभवेशपेशला ॥२३॥*

---

1. M. दृ। 2. M. थ। 3. M. स्वरजो।

* मन्ये द्वाविंश-त्रयोविंशश्लोकयोरुत्तरार्धपरिवृत्तिर्जाता। तेन द्वाविंशश्लोक इत्थं भवेत्—

शुश्रूषमाणा गुरुवर्गमुद्धतश्रमा यदि स्याः सुकुमारभावतः ।
[भूया]स्तदायासभिदो हृदीशितुः सभाजनार्थं शुभवेशपेशला ॥२२॥

त्रयोविंशश्लोकश्चेत्थं—

आम्रेडनं चेत् कुरुते गुरुः स्वयं प्रसन्नचेताः सुकुमारभाषितैः ।
निर्वेदखेदं खलु तत्र मा कृथाः कृतार्थतामेव ततोऽवधारय ॥२३॥

चेष्टाभिरिष्टाभिरुदारभाषितैरकृत्रिमप्रेमपवित्रया धिया ।
सर्वास्ववस्थास्वपि सर्वतोमुखी विवर्धनीया दयितेऽनुकूलता ॥२४॥
पत्यौ प्रतीपेऽपि तिरोहितव्यथा हिताय तस्याऽऽहितमानसा भव ।
विरुद्धभाषिण्यपि तत्र सत्रपा कृपानिदानं वद दैन्यवद्वचः ॥२५॥
ईर्ष्यातिरेकोत्थवितर्कविभ्रमान्न चानुसन्धेयममुष्य दूषणम् ।
मा श्रद्दधीथाः श्रुतमप्युपेक्षया प्रतीतमप्यात्महृदो विदूरय ॥२६॥
निर्याति नो चेन्मनसस्तदुद्धटं[1] प्रकाशनीयं न च दूषणाश्रये ।
लोल्यात् प्रमादादथ चेत् प्रकाशितं निवेशनीयं परिहासभाषिते ॥२७॥
बुद्ध्यां विनिर्धार्य च भर्तुराशयं[2] बिभर्ति येनायमवारितां मुदम् ।
तेन प्रबन्धेन मनोऽस्य सन्ततं स्वतन्त्रमाराधय वीतमत्सरा ॥२८॥
द्रागुद्वहन्तं वनितामथापरामसूयया खेदय माऽवनीपतिम् ।
भूयिष्ठभार्या हि भवन्ति भूभृतस्तथापि तावच्छ्रुतिगोचरं गताः ॥२९॥
भवन्ति भार्याः शतशो महीभृतां गुणैर्भवत्येकतमा प्रतिष्ठिता ।
ताराः कलत्राण्यखिलाः कलाभृतो न रोहिणीसाम्यमुपैति काचन ॥३०॥
मर्मस्पृशाऽप्यस्य गिरा निपीडिता न पीडयेस्तं प्रतिकूलचेष्टितैः ।
पत्यु[ः]प्रसादातिशयेऽपि पुत्रिके न लङ्घनीयो विनयोचितः क्रमः ॥३१॥
एवंविधैस्त्वं पतिदेवताव्रतैर्वितन्वती विश्वजनानुरञ्जनम् ।
सीमन्तिनीनामुपगम्य मौलितां स्वबान्धवानां मुखमुज्ज्वलीकुरु ॥३२॥
एवं ब्रुवाणा विनयानताननां दृगम्बुपूरैः स्नपयन्त्यशीतलैः ।
मूर्धन्युपाघ्राय भृशोपगूहितां मुमोच कृच्छ्रेण कृशोदरीं प्रसूः ॥३३॥
मान्यास्तथान्या मिलिताः कुटुम्बिनीः क्रमेण सम्भाव्य पदाभिवन्दनैः ।
ताभिः कृताशीर्भिरथानुमोदिता नरेन्द्रजाया[3] नरयानमागमत् ॥३४॥
यामातरं यान्तमनन्तरं नृपः समेतबन्धुर्गुणसिन्धुमन्वगात्[4] ।
प्राप्तः पुरं सूरजनोऽपि सम्भृतप्रभूतमङ्गल्यमनोज्ञमण्डनम् ॥३५॥
ऋद्धां समा[सा]द्य पुरीं प्रथीयसा प्रतापजालेन तिरोहिताहितः ।
कालं कियन्तं कनकावतीसखो विहारभूमिं भ्रमति स्म भूपतिः ॥३६॥
पुंस्कोकिलालापपरिष्कृतिव्रतैः स वीज्यमानो मलयाद्रि[5]मारुतैः ।
तल्पे नवीनाम्रदलोपकल्पिते निनाय रम्या मधुयामिनीरसौ ॥३७॥

---

1. M. ट ।   2. M. श्रयं ।   3. M. द्रं याया ।
4. M. मत्वगान् ।   5. M. द्रि ।

सौभाग्यलक्ष्मीमथ शीतरोचिषः[1] प्रतापऋद्धिं[2] च रुचामधीशितुः ।
प्रोद्दीपयन् पङ्किलपल्वलोदकः समागमद् घर्मऋतुः समन्ततः ॥३८॥
आसाद्य रौद्रीं हरितं हरित्पतिर्भृशं प्रजज्वाल दहन्निव प्रजाः ।
तत्पालकाग्निप्रभवाशुशुक्षणेर्विसारिभिर्ज्वालभरैरिवावृतः ॥३९॥
निष्पीय निःशेषरसं रसान्तरादनाप्नुवंस्तृप्तिमिव त्विषाम्पतिः ।
अस्यन्दयत् सन्तततापनोद्गताच्छिलोच्चयेभ्योऽपि रसान् हिमस्रुतः ॥४०॥
पीत्वाऽतितप्तास्तरसा तरङ्गिणीस्तीव्रेण तापेन पिपासुरंशुमान् ।
प्रालेयशैलाङ्कगतां दिशं गतो हिमं शिलीभूतमकल्पयत् पयः ॥४१॥
भर्तुः प्रभावातिशयेन भूयसीं समश्नुते वृद्धिमसंशयं जनः ।
तेजोऽधिकं बिभ्रति वासराधिपे महत्त्वमुच्चैर्यदवाप वासरः ॥४२॥
स्पर्शं खरोष्णं किल सोढुमक्षमा करैः कठोरैः क्वथितं विवस्वतः ।
आमूलमुत्सर्पिमृणालविग्रहा मुमोच नालेन[3] पयः सरोजिनी ॥४३॥
जग्मुर्युवानो न तथाऽतिनिर्वृतिं सगन्धसारैर्घनसारशीकरैः ।
स्नानोत्थितप्राणसमास्तनान्तरप्रसक्तशीतैर्जलबिन्दुभिर्यथा ॥४४॥
अश्रान्तनिष्यन्दिजलार्द्रकञ्चुकप्रसन्नपीनस्तनकुम्भविभ्रमम् ।
धारागृहे रागभृतो मृगीदृशां विलोकयन्तो दिवसानयापयन् ॥४५॥
पीताः पुरश्चण्डरुचो मरीचिभिर्निसर्गरूक्षैश्च समीरणैस्ततः ।
निःशे[4]षितापः सततं विगाहना[5]ज्जलाशयाः कर्दमशेषतां ययुः ॥४६॥
आरूढहर्म्याणि हिमाम्बुनिःसृतिप्रकामरम्ये मिथुनानि रात्रिषु ।
शीतांशुकान्तोपलकुट्टिमोदरे शिरीषपुष्पास्तरणे स्म शेरते ॥४७॥
पान्थो युवा पाटलिपुष्पमुद्गतं मनोभुवो गन्धवहाममन्यत ।
तन्निर्गता गन्धवहाः सुगन्धयोऽप्यमूर्छयन्मानसमस्य यन्मुहुः ॥४८॥
झङ्कारिणः क्वापि गता मधुव्रता बत[6] प्रसङ्गोऽपि पिकस्य न क्वचित् ।
धिग्दैवमाम्रस्य फले पचेलिमे शुकस्य काकस्य च तुल्यभागिता ॥४९॥
भ्राम्यन् पिपासुः पथि मारवे मुहुर्मरीचिकावीचिनिरुद्धनिर्गमे ।
अम्भोविहीने गहने तमोरयैः पपात सिन्धाविव विक्लवोऽध्वगः ॥५०॥
भ्रांत्वाऽतिदूरं तरुगुल्मसंवृतं मृगः समासाद्य मितं पयः क्वचित् ।
आवृत्य तस्थौ तृषितोऽपि कातरां शनैश्चलन्तीं प्रतिपालयन्मृगीम् ॥५१॥

---

1. M. धिषं ।　2. M. रिद्धिं ।　3. M. ल्पेन ।
4. M. निःसे ।　5. M. हनं ।　6. M. वभ ।

एकस्य पाथोजदलस्य पार्श्वतो निलीय नेतुं तपतीव्रमातपम् ।
छायामदीर्घामपि सेवितुं समं रथाङ्गयुग्मं यतते स्म मौग्ध्यतः ॥५२॥

कुञ्जोदरे वा तरुकोटरे वा निलीय कुत्रापि विनीय वासरम् ।
अस्तङ्गते घर्मघृणौ शनैः शनैर्विनिर्ययौ काशिकवत् पृथग्जनः ॥५३॥

सूक्ष्मान्तरीये जघने घनस्तनी सहा न वोढुं रशनाकलापकम् ।
उत् फुल्लमल्लीकुसुमस्रजः परं नितम्बशोभां नितरामुपानयन् ॥५४॥

स्वेदोदबिन्दुस्तिमितं मृगीदृशो वपुर्व[1]हन्त्यास्तपतापनिःसहम् ।
गाढं ललाग स्फुटरागि कञ्चुकं स्वल्पाजनलस्तमिव स्तनद्वये ॥५५॥

ग्रीष्मानुरोधादनुभूय भूपतिः स वारिधारा जलयन्त्रनिर्गताः ।
वारां विहारैश्चक्रमे निषेवणं विलासिनीनां करयन्त्रधारया[2] ॥५६॥

हंसान् हसन्त्यो गमनैरथालसैः सखीकरालम्बनलब्धसाहसाः ।
पेतुः पतङ्गांशुनिपातकातरास्तरङ्गिणीं त्रस्तकुरङ्गलोचनाः ॥५७॥

आकर्ण्य तारं कलनूपुरध्वनिं पुराङ्गनानां पतगाः सितच्छदाः[3] ।
आपेतुरुत्तानितदीर्घकन्धराः स्वयूथ्यनादभ्रमतः ससम्भ्रमाः ॥५८॥

सीमन्तिनीनां कलमेखलारवैर्जितस्वरा[ः] सारसपङ्क्तयः ।
द्रागेव जग्मुः सलिलाशयान्तरं पराभवोद्भूतह्रियेव ताडिताः ॥५९॥

दूरादहंपूर्विकया समागतास्तटावधि प्रौढकुतूहलेरिताः ।
तोयावगाहे क्षणजातसंभ्रमा नतभ्रुवस्तद्विपरीततां दधुः ॥६०॥

कामं समर्थापि पुरो नितम्बिनी नितम्बदघ्नेऽम्भसि साध्वसादिव ।
हस्तावलम्बे दयितस्य सस्पृहा निवर्तितुं संववृते पराङ्मुखी ॥६१॥

कान्तेन सिक्तं प्रथमं पृथुस्तनी विपक्षमालोक्य विवृद्धवेपथुः ।
शीतातिरेकं प्रतिपाद्य कोपना जवादुदस्थाज्जलवेणिमध्यतः ॥६२॥

कान्ताभिषेकाय पुरः समुद्यता भुजद्वयान्दोलननर्तितस्तनी ।
दोर्मूललोलेक्षणमेनमुन्मुखी विलोक्य भूयिष्ठमसिञ्चदक्षिणी ॥६३॥

लग्नं कुचे केसरमम्बुजन्मनो विदूरयामीति नखक्षतस्पृशम् ।
सीत्काररुद्धस्मितमाक्षिपत् प्रियं सरोरुहाक्षी कटुसाचिवीक्षणैः ॥६४॥

गत्वा कियद्दूरमुदीक्ष्य कौतुकाद् ग्रहीतुकामा कमलानि कामिनी ।
आलम्बितुं नालमुदग्रनालकं विदूनपाणिः परिगाढकण्टकैः ॥६५॥

---

1. M. र्न । 2. M. रय । 3. M. ढदाः ।

बिम्बाधराकान्तिवितीर्णवेदनैर्निरुध्यमाना परितो मधुव्रतैः ।
त्रासादिव स्रस्तदुकूलमाकुला प्रियं सपत्नीपुरतोऽपि सस्वजे ॥६६॥
कस्याश्चिदम्भःस्नपितं नतभ्रुवः क्षणादसंलक्षितसूक्ष्मकञ्चुकम् ।
वक्षोजयुग्मं द्रुतहेमपूर्णयोरुवाह कान्तिं किल काचकुम्भयोः । ६७॥
दष्टाधरा मुग्धवधू[1]र्मधुव्रतैः प्रियेण साकूतसहासमीक्षिता ।
तत्कालयोग्यप्रतिपत्तिकातरा [कृतापरा]धेव नतानना स्थिता ॥६८॥
धारातिपाताच्चकिता कृशोदरी करेण यावत् पिहिताननेक्षणा ।
तावत् प्रियः पार्श्वगतां तथाऽपरामसिञ्चदाशु स्मितपूर्वमम्बुभिः ॥६९॥
दन्तच्छदं दन्तपदैरयावकं गतानुलेपौ[2] नखरक्षतैः स्तनौ ।
रागेण वीताञ्जनमीक्षणद्वयं व्यरोचयद्वारिचयो वरस्त्रियाम् ॥७०॥
क्षिप्तं पयः प्राणसमेन सागसा विधुन्वती पाणियुगं मनस्विनी ।
शीतेतरैर्लोचनवारिनिर्झरैरवापयत् सन्ततधारतां मुहुः ॥७१॥
सीमन्तिनीनामनुलेपनद्रवप्रभूतसौरभ्यभरेण मोहिताः ।
निःशेषनिःकाशितपद्मसञ्चयामपि त्यजन्ति स्म नदीं न षट्पदाः ॥७२॥
विस्रस्त[3]माल्यान् परिमृष्य कुन्तलानपाहरत् प्रावरणं वरो रसः ।
नीरागतां चाधरबिम्बमानयत्तथाऽङ्गरागं स्तनयोर्विलुप्तवान् ॥७३॥
नाभीह्रदोल्लासितवीचिहस्तको विघट्टितः[4] श्रोणिभिरानतभ्रुवाम् ।
सम्यग्विदग्धोचितकेलिपात्रतां जलाशयोऽपि प्रतिपद्यते स्म सः ॥७४॥
पत्रालिलीना मकरी मृगीदृशां स्तनाचलेभ्यः पतिता ह्रदाम्भसि ।
रागोऽपि तावज्जडसङ्गिनोऽङ्गतः प्रसन्नमन्तर्विशति स्म तत्क्षणम्[5] ॥७५॥
प्रेम्णा प्रियेणाम्बुजमम्बुजेक्षणाकराम्बुजे यत् प्रथमं निवेशितम् ।
शङ्के तदेवाऽऽस निवासभूः श्रियस्तदाश्रये श्रीरधिका यतो भवेत् ॥७६॥
कीर्णं[6] क्वचिन्मर्दितपुष्पदामभिः क्वचिच्च किञ्जल्कभरै[ः] सरोरुहाम् ।
पर्याविलं क्वापि हृतैर्विलेपनैरभूत्तदम्भः सुदृशां विगाहनात् ॥७७॥
प्रतिप्रतीकं विनिभालयन्ती[7] द्राग् द्राघयन्ती क्वचिदम्बरान्तम् ।
लग्नार्द्रवस्त्रप्रकटोच्चनीचे निलीयमानेव निजे शरीरे ॥७८॥

---

1. M. भू ।
2. M. लपौ
3. M. भ्रस्त ।
4. M. हितः ।
5. M. तत्क्षणाम् ।
6. M. र्णां ।
7. M. ति ।

भुजायुगस्वस्तिकया नितान्तं निपीडितोत्तुङ्गतरस्तनान्ता ।
काचिद् व्रजन्ती सरितस्तटान्तं[1] कामेऽपि तन्वी तनुते स्म कामम् ॥७९॥[युग्मकम्]

इति रचितविहारः पार्थिवः प्रेयसीभिः
पयसि ललितलीलापेशलाभिः परीतः ।
करधृतविशदस्रग्गन्धसाराम्बराभिः
परिजनवनिताभिः सेवितं तीरमागात् ॥८०॥

इति सूरजनचरिते महाकाव्ये
पञ्चदशः सर्गः ॥१५॥

1. M. रांतं ।

[षोडशः सर्गः]

कालेऽथ शुद्धिमति शूरजनः समृद्धान् पत्नीषु तासु तनयाञ्जनयाञ्चकार ।
तेषामभूदधिगुणः किल **भोजदेवः** प्रासूत पट्टमहिषी कनकावती यम् ॥१॥
आरुह्य वाजिवरमूर्जितमाजिभूमौ नाराचराजिभिरुपार्जितजैत्रवीर्यैः ।
जाग्रत्प्रगल्भभुजमण्डनमण्डलाग्रव्यग्रीकृतोग्रतरवैरिनृपालवर्गः ॥२॥
संख्येषु यः प्रतिभटक्षितिपालवक्षोविक्षोभजातरुधिरोद्धुरकर्दमाक्तम् ।
कौक्षेयकं खलु विपक्षमृगेक्षणानामक्षालयत् सततमक्षिपयःप्रवाहैः ॥३॥
मानोन्नतेन मनसा विनयातिभूम्ना स्थाम्ना यशोभिरमलैर्महितेन धाम्ना ।
दानेन दैन्यदमनैकधुरन्धरेण प्रज्ञानिधिः प्रतिनिधिर्जनकस्य योऽभूत् ॥४॥
विक्रान्तिनीतिचतुरश्चतुरब्धिकाञ्चीसाम्राज्यसंभृतिसमुज्ज्वलितप्रतापः ।
यश्चक्रिवा**नकवरः** कवरीविमुक्तान् दारानुदारचरितः परभूपतीनाम् ॥५॥
अध्यास्य **ढिल्लि**नगरं नगदुर्गसंस्थान् सानूपगाननुपमप्रथितोज्ज्वलश्रीः ।
भ्रूभङ्गभङ्गुरितवैरिमनोरथो यः स्वेच्छाबलेन बलवानकरोत् करस्थान् ॥६॥
कृत्वा वशे वसुमतीं मतिमान् समग्रां सोऽथ प्रतापविभवैर्विरतान्यकृत्यः ।
दुर्गं तदेव विवशं चकमे ग्रहीतुं यत्रास्ति शूरजनभूपतिराजधानी ॥७॥
आज्ञार्पिताः कतिपये यवनप्रवीराः संग्रामसीम्नि शतशः प्रतिपन्नसाराः ।
ये सन्ततं ततबृहत्तरवारिधाराः स्फारां दधत्यधिपतेरधिराज्यलक्ष्मीम् ॥८॥
निर्याय ते कतिपयैः सममश्ववारैर्दर्पोद्धतैरकवरस्य वरूथिनीशाः ।
दुर्गं द्विपैरनुपमैरुपरुन्धते स्म शैलं यथोल्वण-पुरःपवनाः पयोदैः ॥९॥
आयोधनेष्वकृपणोऽथ कृपाणपाणिर्निर्जित्य सोऽर्जितयशास्तरसा **तुरुष्कान्** ।
आनन्दतूर्यनिनदैर्मुखरीकृताशमागान्निजं नगरमुज्ज्वलितप्रतापः ॥१०॥
एवं जिगाय जगदेकधुरन्धरोऽसौ धुन्वन् धनुः समरसीमनि **पारशीकान्** ।
वारांस्त्रयोदश ततः स्फुटरोषभूमा हूमात्मजः स्वयमुपाक्रमत प्रयातुम् ॥११॥
श्रुत्वा तमागतमुपेतमुदग्रवीर्यैः सैन्यैर्मतङ्गजतुरङ्गरथाधिरूढैः ।
दुर्गं च रुद्धमथ योद्धुमनाश्चचाल राजा स **पट्टन**पुरात् पृतनापरीतः ॥१२॥
प्रास्थानिकध्वनिरथोद्धतदुन्दुभीनां भिन्दन्निव प्रतिरवैर्जगदण्डभाण्डम् ।
आपूरितत्रिदशभूधररन्ध्रमुच्चैर्दिक्चक्रमाक्रमत तत्क्षणमक्रमेण ॥१३॥

व्यग्रात्मनां निजनिजोचितसंविधानैस्तत्तत्क्रियासु विनियोजयतां जनौघान् ।
उच्चैःस्वरं त्वरयतां च पुनः पुनस्तान् कोलाहलः पुनरभूदपरो नराणाम् ॥१४॥
जेतुं पतङ्गतुरगानिव पादयुग्ममुच्चैः क्षिपन्तमसकृद्विधृतं प्रयत्नात् ।
उच्चैर्जवेन विजितं विनतातनूजं हेषारवैरिव हसन्तमुदीर्णदन्तम् ॥१५॥
पर्याणपीडनपुरस्कृतपीठदेशं कण्ठक्वणत्कनककिङ्किणिकाकलापम् ।
वल्गागुणग्रहिलपाणिरुपानिनाय तूर्णं तुरङ्गमधिकारिजनः पुरस्तात् ॥१६॥ [युग्मकम्]
राकानिशाकरकरोत्करकोमलेन कीर्णेन चामरचयेन विरोचमानम् ।
स्वर्गापगारुचिरवीचिवितानकेन चित्रं प्रवाहमिव भानुमतः सुतायाः ॥१७॥
घण्टाभिराहितरुचं दधतीभिरुच्चैर्नादान् द्विषत्क्षितिभृतामभिचारमन्त्रान् ।
माणिक्यमुद्रितसुवर्णमयं किरीटं बिभ्राणमद्रिमुदयं महसामिवेशम् ॥१८॥
अव्याहतस्रुतमदद्रवगन्धलोलैर्झङ्कारिभिर्मधुकरैः श्रवणान्तिकस्थैः ।
उद्गीयमानमिव दानयशः स्वकीयं शृण्वन्तमर्धमु[1]कुलीकृतलोचनान्तम् ॥१९॥
सिन्दूरबिन्दुचयचित्रितपूर्वभागं नागं महीधरमिवोदितधातुरागम् ।
आस्तीर्णकम्बलकुथं धृतकेतुमालमाधोरणः प्रमुखमीशितुरा[2]निनाय ॥२०॥ कु[3]
आधोरणप्रहितपाणिमनुग्रहेण स्पृष्ट्वाऽतिकौशलवशादनमन्तमेव ।
तं बृंहितेन मधुरेण कृता[त्म]मोदं दन्तावलेन्द्रमवनीपतिरारुरोह ॥२१॥
आदर्शबिम्बमदसीयविशालकीर्तेः क्रीडातिभूमिभवनं किल राजलक्ष्म्याः ।
तस्योपरि स्थिरमराजत दुग्धसिन्धोरावर्तवद्विततवर्तुलमातपत्रम् ॥२२॥
तत्कर्मणि प्रणिहिताः प्रभुणा नियुक्तास्तत्कार्मुकं क्रमविदः करमस्य निन्युः ।
यत् सङ्गरेषु ददृशुर्गतजीवनाशाः कीनाशकासरविषाणसमं द्विषन्तः ॥२३॥
यत्रार्जवेन न भवेद् गुणवत्त्वलाभस्तत्र क्वचित् कुटिलतां कतिचिद्भजन्ते ।
बाणासनं यदवनीशकरे तदानीं संवर्तते स्म कुटिलं गुण[4]योगहेतोः ॥२४॥
पाणौ पुरैव शुभदेऽहनि या गृहीता कोशान्तरे विनिहिता हितकारिणी या ।
स्नेहं विना न खलु गच्छति या प्रसादं साऽस्य प्रियाऽसिलतिका सविधे सदैव ॥२५॥
आक्रीडनं वयसि याऽसिलताऽतिपूर्वे या यौवने पुरुषकारविकाशहेतुः ।
या वार्धके खलु भवत्यवलम्बनाय स्वप्नेऽपि तां न खलु मुञ्चति चाहुआणः ॥२६॥
तं वारणस्थितमवारितसन्निधानाः सेवावकाशकलनेष्वथ सावधानाः ।
जग्मुः प्रणन्तुमनसो युगपत्[5] क्षितीशा वाहैः परस्परविमर्दनयन्त्रिताङ्गैः ॥२७॥

---

1. M. स्तु । 2. M. मा । 3. M. कुलकमित्यर्थः ।
4. M. लउण । 5. M. पव्य ।

प्रत्येकनामपरिकीर्तनपूर्वमुच्चै रावेदितोऽन्तिकचरेण नरेन्द्रसिंहः ।
नम्रोत्तमाङ्गमुचितप्रतिपत्तिभिस्त राज्ञां समूहमनुरञ्जयति स्म विज्ञः ।।२८।।
माद्यन्मतङ्गजतुरङ्गपदातिकानां दर्पाद्धतद्रुतगतेर्ध्वनयद्धरित्रीम् ।
निर्मथ्यमानमकरालयभीमघोषं भूपालपालितबलं युगपच्चचाल ।।२९।।
तत्सैन्यनिर्भरभराद् भुजगाधिनाथे त्रासान्मुमुक्षति महीमुदितप्रकम्पे ।
कूर्मः कटाहकुहरान्मुखमुन्नमय्य ब्रह्माण्डभङ्गचकितः परितो ददर्श ।।३०।।
मन्दोल्लस[1]त्पवनसङ्गतरङ्गितान्ता[2] व्योमस्पृशो रुरुचिरे रुचिराः पताकाः ।
तद्वैरिणां कवलनाय कृतोद्यमस्य कालस्य लोलरसना इव दिक्षु कीर्णाः ।।३१।।
मुक्ताः कुतूहलवशात् क्षणमश्ववारैर्वाहाः स्म भान्ति विशिखा इव सञ्चरन्तः ।
येषां यतां रयवशाद् घनवर्त्मनी[3]व स्पर्शो भुवः खुरपदैरनुमीयते स्म ।।३२।।
शिक्षाविशेषवशतस्तुरगाधिरूढैरापादिताः सपदि मण्डलिकां तुरङ्गाः ।
जाम्बूनदाभरणकर्बुरितास्तदानीमालातचक्रधिषणां दधिरे न कस्य ।।३३।।
यानक्रमादतिनिरन्तरतामुपेतौ द्वौ सादिनौ प्रणयसङ्कथनेन यान्तौ ।
घ्रात्वा परस्परमुखं क्षणतो हयाभ्यां साक्षेपनादमथ दूरमनायिषाताम् ।।३४।।
दैवादुपेत्य वडवाधिरुहं तुरङ्गी कश्चित्पथि प्रतिहतप्रसरावकाशे ।
यत्नं विनापि तमनुव्रजतो निजस्य वाहस्य नोदनविधौ न जगाम खेदम् ।।३५।।
अग्रे तुरङ्गमरयाद्गत एक एव च्छायातरोः क्वचिदधः क्षपितश्रमार्तिः ।
आयास्यतो निजगणस्य मुहुर्मुहूर्तं पन्थानमुत्सुकमनाः समुदीक्षते स्म ।।३६।।
केचित् सलीलमुपवीतितसज्यचापाः पादावसक्तधृतशक्तिसरागदण्डाः ।
स्कन्धावसक्तरवारिलतावरत्ना जग्मुस्तरङ्गिततुरङ्गममश्ववाराः ।।३७।।
आधोरणैरधिगुणैस्त्वरयद्भिरुच्चैर्नुन्ना अपि प्रतिपदं मदवारणेन्द्राः ।
लीलाविशेषविनिवेशितपादमेव संचेरुरध्वनि निकुञ्चितलोचनान्ताः ।।३८।।
श्यामद्युतः पिदधतो हरितां मुखानि विष्वग्विसारिमदवारिझरं क्षरन्तः ।
वातेरिता इव नवीनघनाः सनादमीयुर्महीधरनिभा महिता महेभाः ।।३९।।
उत्तंसितोज्ज्वलविचित्रपतत्रिपत्रा गाढोपगूहितधटीधृतकिङ्किणीकाः ।
आस्फालितप्रहरणाः प्रथितस्वदर्पा जग्मुः समुद्धतगतेन पदातिमु[4]ख्याः ।।४०।।
वल्गान्तविस्फुरितशोणितसङ्गिफेनैरश्वैः श्वसद्भिरुपकूलमथापगायाः ।
भालेषु रेणुभरकर्दमितां वहन्तः स्वेदोदबिन्दुलहरीं ययु[5]रश्ववाराः ।।४१।।

---

1. M. से । 2. M. तां । 3. M मत्मेती ।
4. M. पु । 5. M. सु ।

उच्चैस्तया गतमिवान्तिकमुष्णरश्मेः पादैर्नितान्तपरुषैः[1] परितापिताङ्गम् ।
नैसर्गिकीं गतिमपास्य मृदुं जवेन रोधो रुरोध करियूथमथापगाया[ः] ॥४२॥
पारं प्रयातुमनसं सवरूथिनीकमालोक्य तत्र सरितो मनुजाधिनाथम् ।
आनायिभिर्द्रुतमनायिषत प्रकामं स्फारास्ततस्तरणयः स्थिरकर्णधाराः ॥४३॥
नीतोऽपि पारगमनाय गुरुप्रयत्नात्तीरस्थ एव परिपीतपयाः प्रमत्तः ।
नाशु व्यगाहत करी गहनं ह्रदान्तस्तप्तोऽपि तप्तकिरणस्य करैः कठोरैः ॥४४॥
आधोरणान् मदवशादवधीरयन्तः स्तब्धाः क्षणं तटमधि द्विरदा मदान्धाः ।
उत्तेरुरुत्तरलिताः परतीरगर्जद्दृप्ता[2]परद्विरददुःसहदानगन्धैः ॥४५॥
ऊर्ध्वप्रसारितविशालतराग्रशुण्डादण्डावधारितनितान्त[3]निमग्नदेहाः ।
विस्तारि वारि समतारिषुराशु केचिन्नागा निषादिनियमाननुकूलयन्तः ॥४६॥
सर्वैरुपायरचनैरनलम्भविष्णुर्व्यालद्विपं वशयितुं कुशलो निषादी ।
अग्रेऽवता[4]र्य करिणीं तदनु प्रयाणे बद्धत्वरं द्रुतमतारयदातुरन्तम् ॥४७॥
अर्धं गतोऽपि सरितः परतीरलिप्सुः श्रुत्वा प्रतिद्विरददुर्मद[5]बृंहितानि ।
न्यस्तं विहस्ततर-हस्तिपकेन हस्ती द्रागङ्कुशं विफलयन् विनिवर्तते स्म ॥४८॥
तोयोपरि भ्रमदलिव्रजवीज्यमाना दानोदबिन्दुचयचन्द्रकितप्रवाहा ।
तीर्त्वा चिरं गतवतोऽपि मतङ्गजेन्द्रान् मध्येतरङ्गिणि परं सरणिः शशंस ॥४९॥
पादैः परं पटु[6]तरैः सलिलं स्पृशन्तं कश्चिन्मरालतरलप्लवनं तुरङ्गम् ।
आरुह्य गाधमिव तावदपेत[7]बाधं दक्षः क्षणादु[द]तरत्तरलप्रवाहम् ॥५०॥
साङ्केतिकैरथ पदैरनुवेलमारात् पारावतारिपुरुषैरुपहूयमानाः ।
प्रोथोच्छल[8]त्पृथुल-शब्दमलोलकर्णास्तेरुस्तरङ्गतरलां तटिनीं तुरङ्गाः ॥५१॥
संसारवेणिमिव शुद्धगु[9]रूपदिष्ट-विद्याभिरुद्यमविशेषभृतो विविक्ताः ।
उत्तेरुरातरमतित्वरयाऽतिरिक्तं केचिद्द्वितीर्य तरिभिः सरितं सुखेन ॥५२॥
आवेष्ट्य मौलिवसनेन धनुः सतूणं सव्येतरेण च करेण शिरोऽवलम्ब्य ।
एकेन कश्चन करालतरङ्गमालां दोष्णा[10]नुदन्नतिबलस्तरति स्म दूरम् ॥५३॥

---

1. M. नुपैः । 2. M. द्दत्ता ।
3. M. नितान्तनितान्त । 4. M. भा ।
5. M. द्रुर्मद । 6. M. पद्दु । 7. M. पेत्र ।
8. M. लछे । 9. M. नु । 10. M. दोस्ना

निर्माय कश्चिदुडुपं[1] दृढबन्धनाढ्यमारोप्य तत्र दयितां दरकम्पिताङ्गीम् ।
व्यावृत्य कातरमुखं मुहुरेतदीयं पश्यन् गुणार्पितकरः शनकैस्ततार ॥५४॥

तीर्त्वेत्थं तटिनीं तरङ्गनिवहैरभ्रंलिहैराकुला-
मावीतो मनुजाधिपः पृतनया प्रीतिप्रफुल्लाननः ।
उद्दण्डाहितचण्डडिण्डिमरवैरुज्जृम्भमाणत्वरः
सम्प्राप्तः पृथुपौरुषः पुरमसौ पौरान् समुल्लासयन् ॥५५॥

इति सुरजन-चरिते महाकाव्ये

षोडशः सर्गः ॥१६॥

1. M. द्रुपं

[सप्तदशः सर्गः]

अथापरेद्युः परदर्पहन्ता सन्नह्य सैन्यैरविषण्णचेताः ।
युद्धाय बद्धातिशयप्रयत्नः सपत्नसेनाभिमुखं प्रतस्थे ॥१॥
तस्य प्रयातुः पटहप्रणादाश्चमूचरोद्धूनितधूलयश्च[1] ।
समं पुरोऽवस्थितशात्रवाणां श्रोत्राणि नेत्राणि च रुन्धते स्म ॥२॥
दिशो मिमानं किमु किं नु तासां पर्यन्तमव्याहतमश्नुवानम् ।
विलङ्घ्य किं ताः स्थितमस्तपारं विलोकयामास बलं स शत्रोः ॥३॥
कुलाद्रिकल्पैः करियूथनाथैरभ्रङ्कषैरभ्रसमानभाभिः ।
तमोनुदां दीप्तिभिरप्यभेद्यैर्जगत्त्रयीं रुन्धदिवान्धकारैः ॥४॥
तुरङ्गमैश्चित्रपदं चलद्भिस्तरङ्गभङ्गीमभितो दधानैः ।
विकासिफेनस्तवकैरसीमैर्विडम्बयद् वारिनिधिप्रवाहम् ॥५॥
प्रालेयपाण्डप्रतिमप्रकाशैः परिस्फुरद्भिर्विततातपत्रैः ।
कुर्वाणमर्वाग्ग्रहिकामयूखसमूहसम्भिन्नमिवान्तरिक्षम् ॥६॥
रजःप्रताने जलदोपमाने क्षणद्युतीनां द्युतिमादधानाः ।
समीरणासङ्गतरङ्गिताङ्गीर्दधद् विचित्रोज्ज्वलवैजयन्तीः ॥७॥
घण्टानिनादैरुपबृंहितेन दिग्वारणश्रोत्रविदारणेन ।
आधोरणास्फालनदीपितानां मदद्विपानां धनबृंहितेन ॥८॥
घोणारवैर्घुर्घुरिकानिनादैस्तुरङ्गमाणां गुरुहेषितेन ।
बाहू समास्फोटयतां भटानामत्युद्भटैरारभटीनिनादैः ॥९॥
आग्नेययन्त्रैः पततामजस्रमुदर्चिषामायसगोलकानाम् ।
निर्घातपातप्रतिमैश्च घोषैर्नादैकरूपं जगदादधानम् ॥१०॥ कुलकम् ॥
ततः शरौघाः परवीरचक्रान्निश्चक्रमुः सस्वनमक्रमेण ।
धारा इवाम्भोधरविप्रकीर्णा वातेन तिर्यग्गतिमश्नुवानाः ॥११॥
चमूरमुष्यातिसमृद्धशक्तेः समं समाक्रान्तवती विपक्षान् ।
अजिह्मगैर्जिह्मगतुल्यरूपैस्तेषां पृषत्कालिमपार्थयद्भिः ॥१२॥
स्वसंमुखं सञ्चरतोस्तदानीमनीकयोः सङ्गररङ्गभाजोः ।
तयोः क्षणादैक्यमभूद्यथाम्भःप्रवाहयोः प्रावृषि तीव्रवेगात् ॥१३॥

1, M. सश्च ।

नभःस्थितं तावदरुन्ध[1]युद्धे रजोन्धकारोऽरुणमग्रतो यः ।
भूमिस्थितस्तं भटशोणितोत्थः परो न्यरौत्सीदरुणः प्रवाहः ॥१४॥
रजस्तमोरुद्धतरावकाशे जगत्यनासाद्य पदं कुतश्चित् ।
विवेश सत्वं सुतरां भटानां स्वतन्त्वमन्तःकरणं तदानीम् ॥१५॥
आकृष्य दूरं गुणमाशु मुक्ते वि[2]निर्गतेऽङ्गानि विभिद्य वाणे ।
अपारिता वाचयितुं परेण वृथा बभूवुर्भटनामवर्णाः ॥१६॥
पुरः परेण क्षिपता शिरस्त्वमाकङ्कपत्नं निटिले निखातः ।
पुंसः परावृत्तिपराङ्मुखस्य शरः किरीटस्य चकार कान्तिम् ॥१७॥
मर्मातिगेना[3]हितमार्गणेन विभिन्नवर्मा न चचाल कश्चित् ।
संवर्मयामास वपुर्विशङ्कः स्वाभाविकेनैव हि साहसेन ॥१८॥
निरुन्धति व्योमनि मार्गमद्दणो[4]र्निरङ्कुशे रेणुकृतान्धकारे ।
आनन्दसान्द्रस्मितचन्द्रिकाभिर्व्यक्तं प्रवीरस्य मुखं व्यलोकि ॥१६॥
संयोज्यमाने विशिखेन चापे विलूनशीर्षोऽपि शरेण सद्यः ।
कवन्धभावेऽपि तथैव कश्चिद् विदूरमाकृष्य मुमोच वाणम् ॥२०॥
प्रणोदितानां सरयं शराणामन्योन्यसङ्घट्टभवो हुताशः ।
लग्नः पताकासु ततान दूरादुल्काविकासभ्रममभ्रसीम्नि ॥२१॥
नीतं नभः शत्रुशरैर्विलूनं शिरः प्रवीरस्य विरोचते स्म ।
गतं किमु व्योमसदां वधूनां[5] विधूपमानान[न]चुम्बनाय ॥२२॥
नितान्तनिस्थाद्या(?)तया पिशाचा रक्तस्रवन्तीरविगाहमानाः ।
अस्रं पपुः[6] पाणितलोपगूढकृत्तेभशुण्डाविवरैर्विदूरात् ॥२३॥
आसन्नगाधेऽस्रसरित्प्रवाहे कृत्तद्विपाः कुत्रचिदन्तरीपाः ।
ददर्श येषु स्थितिमेत्य कालः क्रव्याशिनां वारिविहारलीलाः ॥२४॥
रक्तासवास्वादविशेषमाद्यत्क्रव्याद्वधूगीतसमानकालम् ।
वेतालकान्ताकरतालभङ्गीकृतानुबन्धानटतः कबन्धान् ॥२५॥ युग्मम् ।
मांसाशया शोणितपङ्करुद्धं मौलिस्थमाणिक्यदलं निगीर्य ।
लग्नं गले गाढमथोज्जिगीर्षुर्व्यग्रा शिवा तीव्रतरं ववाशे ॥२६॥

---

1. M. द्ध ।
2. M. मुक्तैर्वि ।
3. M. न ।
4. M. ह्णो ।
5. M. भूनां ।
6 M. अस्लं पयुः ।

ततः परं वीक्ष्य विपक्षसैन्यैः पताकिनीं विक्लवितां ख[1]कीयाम् ।
अवात[2]रद्वातरयं तुरङ्गमारूढवान् सूरजनो रणाय ॥२७॥
मौर्वीरवेण व्रणयन्नरातिश्रोत्राणि स त्राणकरो नतानाम् ।
अगाहतागाधबलं बलीयान् यथाम्बुराशिं प्रथमो वराहः ॥२८॥
निबन्ध[3]सङ्गत्वरमेकमन्यं करं धनुस्थं श्रवणस्थमन्यम् ।
मौर्वीषुयोगे परमेकदैनं पश्यंश्चतुर्बाहुममंस्त लोकः ॥२९॥
अपीडयन् म्लेच्छभटानभीक्ष्णं तीक्ष्णाः पृषत्काः प्रभुणा विमुक्ताः ।
जन्तूनिव प्रान्तरसीमसंस्थान् वर्षोपलास्तोयधरेण नुन्नाः ॥३०॥
व्ययोजयन् कांश्चन जीवनेन बाणास्तदीया यवनप्रवीणान् ।
कल्पावसानोदितचण्डभानोः स्फुरन्मयूखा इव जीवलोकान् ॥३१॥
आयामवच्छ्मश्रुशिरस्त्रभाञ्जि शिरांसि तेषां रुधिरापगासु ।
स्वच्छन्दमास्कन्द्य निषेदिवांसः सुखेन खेलां दधति स्म गृध्राः ॥३२॥
अजिह्मगानामपि नाम तेषां तत्कर्तृकं मोचनमेव युक्तम् ।
गुणाश्रयं दर्शितपक्षपाता[ः] कुर्वन्ति येऽमी परभेदहेतोः ॥३३॥
अजिह्मगाः सन्त्वथ जिह्मगा वा कर्णेजपा दूरतरे विधेयाः ।
योऽन्तः प्रविश्य प्रथमं परेषां प्राणाननाकृष्य बहिर्न यान्ति ॥३४॥
तद्बाणवह्नेरनलं विसोढुं[4] ज्वालां करालामथ पारशीकाः ।
विदुद्रुवुर्दावशिखिप्रतप्ता जीवा इवारण्यचराः पराञ्चः ॥३५॥
ते त्रासजान्धंतमसाऽवसन्ना विस्रस्तशस्त्राः परितो द्र[5]वन्तः ।
नालक्षयन् सूक्षिण(?)मन्तिकस्थं प्रभुं नृपाणामपि शासितारम् ॥३६॥
तथाविधांस्तानपि वीक्ष्यमाणः सर्वंसहामण्डलसार्व[6]भौमः ।
सहासमाह स्म महाम्बुवाहधीरस्वनः सैनिकनाथमुख्यान् ॥३७॥
तरङ्गिणीशांस्तरसा स्वदोर्भ्यां शश्वत्समुत्तीर्णवतां सहेलम् ।
कुतो भवेन्मोहतमोऽवकाशस्तडागकासारविगाहनेषु ॥३८॥
विलङ्घिता यैरलघुप्रतापैः कुतूहलेनैव कुलाचलेन्द्राः ।
किं गण्डशैलाक्रमणेऽपि तेषां सम्भावितो विप्रतिपत्तिलेशः ॥३९॥

---

1. M. त्व ।　2. M. वता ।　3. M. वंग ।
4. M. षोढुं ।　5. M. द्रु ।　6. M. मण्डलसार्य ।

विरोधिभूपालवरूथिनीशैर्निर[1]न्तरापि प्रसभं सुखेन ।
मया समासादि समुद्रसीमा समुद्रनेमिर्भवतां बलेन[2] ॥४०॥
अनानमन्नेव ममैष चापः क्ष्मापालमुख्यान् नमयाञ्चकार ।
निदानमस्मिन् नितरामुदग्रा भवादृशामेव पराक्रमर्द्धिः ॥४१॥
यशांसि युष्माकमहो जिहीर्षुर्जगत्प्रकाशान्यपि जाङ्गलोऽयम् ।
मध्येमृधं धामभृतां नृपाणां यान्यर्जितान्यूर्जितविक्रमेण ॥४२॥
अतः परं किं नु विडम्बनं स्यादपत्रपायाः परमावधिर्वा ।
पृष्ठं परे[3]यत् समितौ भटानां पश्यन्ति वक्षोऽपि कुलाङ्गनानाम् ॥४३॥
कार्यं समीचीनमथेतरद्वा निर्वाहकाले कुरुते नरो यत् ।
तत् प्राक्प्रणीतं विपरीतकृत्यं प्रमार्ष्टि भूयस्तरमप्यवश्यम् ॥४४॥
पराजितेऽस्मिन्नपरं शरण्यं भवद्विधानां न महीतलेऽस्मिन् ।
वेलाविलासावधि वारिराशेर्वशीकृतं तत् खलु विश्वमेव ॥४५॥
इतीरितास्ते प्रभुणा प्रवीरा ह्रिया च भीत्या च निवर्तिताश्वाः ।
शूरं प्रजह्नुः समकालमेव निजैर्निजैर्निर्दयमुद्धतास्त्रैः ॥४६॥
चिरं परिश्रान्तिपरीतदेहः श्वसन् सफेनप्लुतशोणितास्यः ।
अथास्य वाहः परवाहि[4]नीशैः शिलीमुखैस्तीक्ष्णमुखैरघानि ॥४७॥
यावत्तुरङ्गं पतनो[5]न्मुखं तं विहाय वाहान्तरमभ्युपैति ।
तावद्विपक्षाः किल चापमौर्वीमुर्वीपतेस्तस्य विलूनवन्तः ॥४८॥
बाणाशनं तद्विनिकीर्य विद्वाञ्जवेन जग्राह स मण्डलाग्रम् ।
तं भीममूर्तिर्भ्रमयन् बभासे[6] यथा दिनेशः परिवेशसङ्गात् ॥४९॥
कौक्षेयकाक्षेपपरिक्षतानां क्षितिक्षितां ख्यातविपक्षगानाम् ।
अक्षीणदाक्ष्यः क्षतजैरभीक्ष्णमक्षालयत् क्षोणितलस्य कुक्षिम् ॥५०॥
विनिघ्नतस्तस्य समन्ततस्तानरीन् नरेन्द्रस्य तुरङ्गमेन्द्रः ।
भ्रमन् विभाति स्व यथा मरालः स्फुरन्महावर्तविवर्तमान[ः] ॥५१॥
अथापरे वैरिवरूथिनीशा विनिर्जितप्रोन्मदमेदिनीशाः ।
वर्माणि मर्माण्यपि भेदयन्तः शस्त्रैः प्रजापालममुं प्रजह्नुः ॥५२॥
अत्युत्कटैः कण्टकभेदिभिस्तैः प्रबाधमानाननुवेलमस्त्रैः ।
अव्यग्रचेताः सममुग्रवेगान् प्रत्यग्रहीत्तान् ग्रहराजतेजाः ॥५३॥

---

1. M. शैनिरां । 2. M. ना । 3. M. वरे ।
4. M. द्वि । 5. M. भो । 6. M. वे ।

सम्भावयामास तमुग्रसत्त्वं द्रूमात्मजः सन्ततसाधुवादैः ।
सा स्यादसाधारणता गुणानां प्रमोदयेद् या द्विषतोऽपि चेतः ॥५४॥

गुरुसमरसमुत्थरेणुपूरैर्मलिनितमात्मवपुस्त्विषामधीशः ।
विमलयितुमिवोदके मिमंक्षुश्चरमपयोनिधिसंनिधिं जगाम ॥५५॥

अकवरधर[1]णीशः संनिवर्त्य[2] स्वसैन्यं
शिविरमुखमयासीद्वासरस्यावसाने ।
बहल[3]रुधिरधाराधोरणीधौतदेह-
स्तदनु निववृते च क्षोणिपालः स्वदुर्गम् ॥५६॥

इति शूरजन-चरिते-महाकाव्ये
सप्तदशः सर्गः ॥१७॥

---

1. M. चर । 2. M. वृत्य । 3. M. व ।

[अष्टादशः सर्गः]

यावदुद्यमभृतोऽस्य रणाय स्वैरमुल्लसति दुन्दुभिनादः ।
तावदेव सचिवः शकभर्तुः प्रातरेत्य मिलितः प्रतिहारे ॥१॥
अर्हणाभिरुचितोपचिताभिस्तेन चारुचरि[1]तेन स नीतः ।
संसदं स ॥ऽ॥ दुद्धामाददे गुरुमतिर्गिरमेताम् ॥२॥
आगतः स्वयमहं निखिलोर्वीसार्वभौमवचनव्यपदेशात् ।
सौहृदातिशयतस्तव[2]बन्धोर्बोधनाय नयशालिवचोभिः ॥३॥
यश्चिकीर्षति महान् महसा ते प्रीतिमानकवरः सरलात्मा ।
तन्निशम्य समयं च विचार्य स्वीकुरुष्व कुशलस्य निदानम् ॥४॥
त्वादृशाः कति कति क्षितिपाला निर्जिता ननु चमूभिरमुष्य ।
ईदृशोऽवनितले कतमः स्याद् योऽस्य नेत्रपदवीमभियाति ॥५॥
शौर्यसाहसरसेन भवन्तं सैन्यसिन्धुमधि विक्रममाणम् ।
वीक्ष्य विस्मयविशेषिततोषः पारितोषिक[3]मसौ वितताार ॥६॥
नर्मदाश्रयविशेषपवित्रा ये भवन्ति विषया वसुपूर्णाः ।
जाह्नवीविमलवेणिविचित्रा पार्वतीपरिवृढस्य पुरी च ॥७॥
वासरेशसुतयाऽधिकशोभं मण्डलं च निखिलं **मथुरायाः** ।
गृह्यतां नियमतश्चिरकालं यद् यदिच्छसि परञ्च सुराज्यम् ॥८॥
एकमेव नृपते रणपूर्वस्तम्भदुर्गमिदमर्पय तस्मै ।
एवमेव हि[मही]शितुरस्य प्रीतिरायतिमती भवति स्यात् ॥९॥
कुर्वते समयतः खलु सन्धिं बिभ्रतोऽपि बहलोज्ज्वलतेजः ।
वीतिहोत्रहरितोऽङ्कमुपास्ते शीतकालमधि घर्म[4]मयूखः ॥१०॥
हीनशक्तिविभवेऽपि जयः[5] स्यात् कुत्रचिद्यदि घुणा[6]क्षरकल्पः ।
तं विलोक्य न तु नीतिविरुद्धं बुद्धिमान् व्यवसितं[7] विदधीत ॥११॥
आश्रयात् सततमन्यगुणानां सर्वथा भवति यत्र न सिद्धिः ।
तत्र साहसरसे धृतयत्नश्चापलाश्रयमुपैति न दोषम् ॥१२॥
ये स्वतोऽधिकबलेषु न कुर्युः सन्धिमन्धितधिया गुरुगर्वात् ।
स्रोतसीव पतिताः प्रतिकूले ते व्रजन्ति न कदाचन पारम् ॥१३॥

---

1. M. चरे। 2. M. सूव। 3. M. त। 4. M. चर्म।
5. M. जिय। 6. M. घुण। 7. M. तुं।

म्लानतामयति यत्र न कीर्तिर्भूयसी द्युतिरुदेति न यस्मात् ।
तं बलीयसि विरोधिनि सन्धिं कुर्वतः क इव तेऽत्र विमर्शः ॥१४॥
सर्वथाऽधिकबलैः प्रतिपक्षैर्विग्रहे ग्रहिलतां नहि गच्छेत् ।
कः प्रतीपतरचण्डसमीरं शर्मलिप्सुरभियाति रयेण ॥१५॥
दुर्गमेकमुपनीय नृपास्मै गृह्यते यदि पुरत्रयमस्मात् ।
ईदृशा विनिमयेन बभूव प्रत्युताधिकतरस्तव लाभः ॥१६॥
ग्रन्थिलत्वमपदे किमु कुर्वन् खेदयस्यधिबलं यवनेशम् ।
किन्तु कर्णपदवीं न गतस्ते जैत्रसिंहतनयस्य विपाकः ॥१७॥
वारि-कानन-महीधरदुर्गाण्यग्रहीत्तदधिपात् स निगृह्य ।
शिष्यते परमिदं भवदीयं तेन तत्र[1]यततेऽद्भुततेजाः ॥१८॥
रञ्जिता प्रबलवैरिनृपास्त्रैः सद्गुणैश्च भवता धरणी[2]यम् ।
पूरितं वितरणाम्बुनदीभिः कीर्तिभिश्च भुवनं विशदाभिः ॥१९॥
यत्त्वनन्तरमिहास्ति विधेयं श्लाघ्यमर्घ्य[3]तपसां नृपतीनाम् ।
पुण्यवानसि विनैव हि यत्नं सर्वमेव समपद्यत तत्ते ॥२०॥
नर्मदान्वयज शर्मदतोयां नर्मदां नियमवानवगाह्य[4] ।
वीतशङ्कमधुना मधुरास्ताः पश्य पावनभुवो मधुरायाः[5] ॥२१॥
ज्योतिरुज्ज्वलतरां यतयो यां शीलयन्ति सततं यतचित्ताः ।
अन्तरिक्षनगरीं गणभर्तुस्तां विलोक्य भवितासि कृतार्थः ॥२२॥
सोपपत्तिकमथाधिकपथ्यं भाषितं चिरममुष्य विचार्य ।
पुण्यतीर्थगमनाय मनीषी सोऽन्ववर्तत मनः शकभर्तुः ॥२३॥
तं[6]विसृज्य विषयं वशिवर्यस्त्वर्यमाण इव तीर्थविनोदैः ।
[अ]न्वितः पुरजनैरनुरागान्निर्जगाम नगरान्नरनाथः ॥२४॥
वासरैः कतिपयैः पतिरुर्व्याः सोऽथ वर्त्म विततं प्रविलङ्घ्य ।
नर्मदामृदुसमीरसनाथं सन्निवेशमकरोत् पृतनायाः ॥२५॥
नीत्वा स कत्यपि समा भुवि नर्मदायास्तद्वासिनो[7] जनपदान् वशगांश्च[8]कृत्वा ।
पुण्यामपूर्णसुकृतैर्मनुजैर्दुरापां प्राप प्रियां **मधुपुरीं** मधुसूदनस्य ॥२६॥

---

1. तत्र इति भवेत् । 2. M. धारणा । 3. M. शलाघ्यमर्य ।
4. M. गह्य । 5. अतः परं 'त्रुटिः' इति पदमधिकमादर्शे । 6. M. त ।
7. M. ना । 8. M. गातस्र ।

कालिन्दीपुलिनमथो विगाहमानं गोपालः स्वकुलपुरस्कृत[1] पुरोधाः ।
व्यासस्तं वशिनमुदाहरत् प्रमोदादुन्मीलन्मधुपुरमाधुरीनिमग्नम् ॥२७॥
रक्तोत्पलैरभिनवैरभितः स्फुरद्भिः स्फीतेन्द्रनीलमणिमेदुरमुग्धवेणिः ।
आभाति पातकततिक्षतजात्तधाराऽधर्मस्य खड्गलतिकेव कलिन्दकन्या ॥२८॥
स्वच्छात्मानः पावनीमेतदीयां वारां धारां स्वच्छशीतस्वभावाम् ।
अम्भोवाहाः साधवोऽपि प्रकामं पीत्वा सद्यः कृष्णभावं भजन्ते ॥२९॥
इयञ्च गीर्वाणतरङ्गिणी च कामं जगत्पावनतां दधाते ।
परं नु धौतं पदमेव तस्यामियं जगाहे हरिणा विहारे ॥३०॥
सेयं पुरी प्राणभृतां नमस्या को वेद सम्यङ्महिमानमस्याः ।
अजोऽपि यस्यां समजायतासौ जातो न भूयः समुपैति जन्म ॥३१॥
जन्मामुष्यां जन्मधारां धुनीते मौञ्जीबन्धो हन्ति बन्धानुबन्धम् ।
मृत्युर्भिन्ते[2]दारुणां मृत्युभीतिं दाहस्तीव्रान्नाशयेत् सर्वदाहान् ॥३२॥
उत्तानपादतनयः प्रयतः सदाऽस्याः प्रासादशेखरपरिक्रमणं करोति ।
युक्तं यद[3]त्र यदुवीरपदारविन्दमाराध्य स ध्रुवपदं पृथुकः प्रपेदे ॥३३॥
चिराय विप्रोषितभर्तृका कथं ध्रियेत वैकुण्ठपुराधिदेवता[4] ।
अजस्रमस्याः श्रितपीतवाससो न तां पताकापवनो यदि स्पृशेत् ॥३४॥
अमुना यमुनापथेन बालं हरिमङ्के विनिधाय धीरचेताः ।
अगमत्तमसि प्रकामभीमे वसुदेवः सदनाय गोपभर्तुः ॥३५॥
नामानि यस्य गृणतामिह जन्मभाजां संसारसिन्धुरपि गोष्पदतां प्रयाति ।
आश्चर्यमत्र किमिहाऽऽनकदुन्दुभेस्तत्[5] सङ्गेन भानु[6]तनयाऽजनि जानुदघ्नी ॥३६॥
संसारजाङ्गलपथश्रमखेदभाजां विश्रामदो मधुरिपुः स्वयमश्रमोऽपि ।
आकृष्य कंसमकृशद्रविणं जवेन विश्राम्यति स्म पुलिनेऽत्र कलिन्दजायाः ॥३७॥
कंसस्य काराभवनं तदे[त]न्नारायणोऽजायत यत्र देवः ।
यद्दर्शनात् प्राणभृतो न भूयः संसारकाराभवनं विशन्ति ॥३८॥
दाम्ना मणीनां खचित[ः]सहेम्ना शोणः क्वचिच्छोणितकर्दमेण ।
करे हरेः कंसगजस्य दन्तः कौमोदकीकान्तिमिहाऽऽससाद ॥३९॥
प्रतिमन्दिर[7]मिन्दिरासहायो वसतीह स्वयमेव वासुदेवः ।
अलिखन्निह कारवः समन्तात् परमेनं निजशिल्पकौशलाय ॥४०॥

---

1. स्कृतः इति स्यात् । 2. M, भिंते । 3. M. पद । 4. M. ताः ।
5. M. भेत्सत । 6. M. माप्नु । 7. M. मच्चि ।

गृहे गृहे माथुरकामिनीनां मुखाम्बु[1]जेभ्यश्च[रि]तं मुरारेः ।
आकर्ण[2]यन् कंसवधादिवृत्तमस्यां जनो ह्यस्तनमेव वेद ॥४१॥
अश्रुतीर्थं(?)स कृती जगाम यत्र स्थितो दानपतिः प्रतीतः ।
अज्ञानजाड्यं[3] विजहौ जलान्तर्मग्नोऽपि दामोदरवैभवेन ॥४२॥
वसन्तमुख्यैः समयैः स्वभावविरोधमुद्रास्य[4] परस्परेण ।
निषेव्यमाणं युगप[5]न्नृपोऽसौ **वृन्दावनं** पावनमन्वविन्दत् ॥४३॥
स्मरस्य सेवावसरप्रदेन विशेषितश्रीर्वयसा नवेन ।
यत्कुञ्जभूमीर्भगवान् मुकुन्दः कृतार्थयामास पदार्पणेन ॥४४॥
अनारतं यत्र सनाथयन्तः शिखण्डिनामुन्मदताण्डवानि ।
स्पर्धाभिरूर्ध्वी[6]कृतकण्ठनादा जगुर्मरालाश्च वनप्रियाश्च ॥[४५॥]
मनोजमौर्वीरवमेदुरेण क्वचि[द्]द्विरेफावलिहुं[कृ]तेन ।
क्वचिच्च षड्ज[7]स्वरपारगाणां केकाभिराकारितमन्मथाभिः ॥[४६॥]
विलासिनीसंशितपेशलाभिः क्वचित् पिकालीमृदुकाकलीभिः[8] ।
अन्योन्यरागादनुबन्धिनीभिः क्वचित् कथाभिः शुकसारिकाणाम् ॥४७॥
रतप्रवृत्तोन्मदसारसाक्षीसाकूतकण्ठध्वनिकोमलेन ।
आकर्षता संयमिनोऽपि चेतः क्वचित् कपोतीघनघूत्कृतेन ॥४८॥
नृत्यन्नतभ्रूरशनानिनादहृद्यैः[9] क्वचित् सारसकण्ठघोषैः ।
नितम्बिनीनूपुरशिञ्जिताभैर्मरालयूनां निनदैः क्वचिच्च ॥४९॥
दात्यूहपारावततित्तिरीणां प्रत्यूहशून्यप्रतिपत्तिभाजाम् ।
कोलाहलेन क्वचिदादधानं मनो जनस्य श्रवणैकतानम् ॥५०॥ [कुलकम्]
विचित्रकल्पद्रुमवेदिभाजां नाना[10]मणीनां खचिता[11]मयूखैः ।
यत्रार्कपुत्री वलयिप्रवाहा बलद्विषश्चापरुचिं बभार ॥५१॥
मुरजिन्मुखवीजितस्य वेणोः कलगीतामृतनिम्नगानिमग्नाः ।
जगदुत्तरतां जगाहिरे ता हरितो हेलिसुतासमीपभाजः ॥५२॥
अवलम्ब्य कदम्बशाखिमूलं चिरमुल्लासितचारुचिल्लिवल्लिः ।
अहरत् कुतुकेन यत्र गोपीर्मुरलीकूजितकौशलेन कृष्णः ॥५३॥

---

1. M. पु । 2. M. कुर्ण । 3. M. ह्य' ।
4. M. द्रास्य । 5. M. म । 6. M. शूर्द्धी ।
7. M. ज्ज । 8. आदर्शेऽत्रैव ४६ श्लोकसंख्या ।
9. M. यैः । 10. M. नाभना । 11. M. षिता ।

यस्य स्मृतावपि सपत्नतिरस्कृताया निःसीममम्बरमभू[द्]द्रुपदात्मजायाः ।
यत्राम्बराणि स लसत्कलशस्तनीनामस्तेनयद्विकचनीपवनीविलासी ॥५४॥

रासोत्सवे मण्डलिकाविलासमुपेयुषि प्रेयसि वल्लवीनाम् ।
भानूद्भवाया भ्रमिभङ्गभाजो विलुप्तमद्यापि न यत्र चिह्नम् ॥५५॥

आकीर्य रम्यैः[1] कुसुमैर्मुरारेर्निकुञ्जकेलीशयनानि सायम् ।
गायन्ति यस्मिन्नवदानमस्य द्वन्द्वानि नित्यं वनदेवतानाम् ॥५६॥

ध्येयैः समाहितधियां शमिनां[2] समन्तादुल्लासितं मुररिपोर्ललितैः पदाङ्कैः ।
गोवर्धनं सुकृतकौतुकवर्धनं तं शैलं जगाम स यशोधनसार्वभौमः ॥५७॥

यत्रातपत्रपदमीयुषि तीव्रवृष्टिमूर्छत्सवत्ससुरभीकुलजीव[3]नाय ।
देवस्य गोपवपुषो बिभराम्बभूव बाहुर्महेन्द्रमणिनिर्मितदण्डलक्ष्मीम् ॥५८॥

तिरोहिते कौतुकतो मुकुन्दे तदङ्गसंसर्गविशेषहृद्यैः ।
यद्धातुरागैर्विहिताङ्गरागा दधुः स्वजीवं व्रजनीरजाक्ष्यः ॥५९॥

अथ घनजलधारारुद्धदिक्चक्रवालं तिमिरतिमिगभीरं मग्नसोमार्कबिम्बम् ।
हुतवहमनिवार्यं वार्भिरन्तर्दधानं समजनि घनवीथीमण्डलं सिन्धुकल्पम् ॥६०॥

सरसी भविष्यति मलीमसाशया नलिनी निमंक्ष्यति जलाशयेष्वपि ।
इति चिन्तयन्निव विदूनमानसः प्रियमानसः सपदि निर्ययौ खगः ॥६१॥

उद्रेकमाप दवथुः प्रथमं पृथिव्या नव्याम्बुदेन विरलं सलिलैर्विकीर्णैः ।
आर्द्रागसा प्रणयगर्वितमानसाया नार्या प्रियेण रचितैरिव सान्त्ववादैः ॥६२॥

मुकुलपुलकितां कदम्बशाखां क्षणमवलंब्य समीरणोऽवतीर्णः ।
नवघनपृषतप्रसाधिताङ्गीं कुसुममुखे सुमनोलतां चुचुम्ब ॥६३॥

सुमनाः सुकुमारतैकभूमिः सुदतीनां रुजति[4] स्म चेन्मनांसि ।
घनकण्टकमाविलं रजोभिः सुतरां भेत्स्यति केतकं न चित्तम् ॥६४॥

पवनेन पुरोभवेन भूयो मधुराभिर्नवनीरधोरणीभिः ।
तपतीव्ररविप्रतापदग्धा वनराजीरुदजीवयद् घनश्रीः ॥६५॥

चिरान्निवृत्तस्य घनागमस्य गाढोपगूढेन हरिद्वधूनाम् ।
हारा निपेतुश्छिदुरा विदूरात् पयोधरेभ्यः करकामिषेण ॥६६॥

सुहृदः समुपागतान् पयोदान् स्मृतनन्दात्मजदेहकान्तिपूराः ।
ददृशुः स्रवदस्रवः कथञ्चिद्धत वृन्दावनवासिनो मयूराः ॥६७॥

1. M. मैः । 2. M. वां । 3. M. नीव । 4. M. दति ।

बर्हेण येषां विदधेऽवतंसं[1] कंसस्य शत्रुः स्वयमुज्झितेन ।
कलापिनः प्रोज्झिततारडवास्ते विलोकयन्ति स्म घनं सबाष्पाः ॥६८॥
विनापि बाणैरवलम्ब्य तावदिन्द्रायुधं निर्गुणमप्यनङ्गः ।
अमोहयद्विश्वमनन्यतन्त्राः कांक्षन्ति सिद्धौ नतु हेतुमन्यम् ॥६९॥
कादम्बिनी कालभुजङ्गजाया प्राणान् पिपासुः पथिकप्रियाणाम् ।
ऊर्ध्वीकृताम्भोदफणा स[2]नादं व्यलोलयद्विद्युतमुग्रजिह्वाम् ॥७०॥
विलुप्तमर्यादमुदीरितैर्जलैर्भग्नास्तटस्था अपि मेदिनीरुहाः ।
किंवा न कुर्वन्त्यसमञ्जसं गता[:] परां विवृद्धिं तरला हि निम्नगाः ॥७१॥
पुर एव नीपपवनोऽतिदारुणोऽदलयद्वियोगिमिथुनानि मर्मणि ।
किमुत प्रफुल्लनवचारुमालतीपरिरम्भसंभृतविशेषसौरभः ॥७२॥
घनान्धकारेष्वपि वीतशङ्कं ययुः प्रियं कुङ्कुमगौरगात्र्यः ।
अनारतोद्दामवितायमानसौदामनीदामनिलीनदेहाः ॥७३॥
आस्वाद्य जम्बूरसमन्यपुष्टश्चु[3]कूज यद्गर्जति तोयवाहे ।
भेरीमुखे भांकृतिभाजि तन्त्रीनिक्वाणवत्तद्वितथं[4] बभूव ॥७४॥
निर्जीवं विरहिगणं करोतु कामं निर्जीवो नमुचिनिसूदनस्य चापः ।
आश्चर्यं यदमृतवृष्टिरब्दकीर्णा पान्थानां कवलयति स्म दीर्घमायुः ॥७५॥
नभसि सान्द्रतमःस्पृशि विश्वदृङ्मुषि नभोम[5]णयः स्फुरितत्विषः ।
घनघरट्टविकुट्टितचन्द्रमःप्रकटरेणुनिभाः परिबभ्रमुः ॥७६॥
द्युमणिकनकगोले तोयदाङ्गारगर्भे कुलिशकृतहुताशे प्रावृषा धम्यमाने ।
प्रबलपवनवेगात् सर्वतः सारितार्चिःप्रततिरचिररोचिर्व्याजतो जृम्भते स्म ॥७७॥
घनतमसि विलीने सोमसूर्यप्रसङ्गे जगति जलनिमग्ने कैरवे पङ्कजेऽपि ।
विरहमनुभवन्ती संगमं च स्वभर्त्रा रजनिदिवसभेदं चक्रवाकी विवेद[6] ॥७८॥

प्रावृड्वल्लीजलधरदलस्यांतरे द्यो[7]तिताशं
विद्यु[द्]व्याजात् कुसुमनिकरं यत् करालम्बभार ।
तस्योद्रिक्तं समजनि फलं हन्त तत्कालमेव
प्राणत्यागो रमणविरहव्याकुलानां बधूनाम् ॥७९॥

---

1. M. र्सा । 2. M. फणाश । 3. M. चु ।
4. M. तयं । 5. M. तमोमा । 6. श्लोकऽयं सुभाषितग्रन्थादावुपलभ्यते ।
7. M. यो ।

गुरुध्वानेनैव प्रतिनगरमध्वन्यसुदृशां
वितन्वानो मूर्च्छां [1]सपदि कृतकृत्योऽपि कुतुकात् ।
व्यपेतज्याबन्धं[2] रतिरमणबन्धुर्बलभिदो
धनुः शोभालोभाद्वपुषि बिभरामास मुदिरः ॥८०॥
अथ नरपतिवर्यः प्रावृषं यापयित्वा
यदुपतिपदलक्ष्म्याऽलङ्कृतासु स्थलीषु ।
नभसि मुदिररिक्ते मुक्तनिद्रे मुकुन्दे
प्रमथपतिनगर्याः सेवनाय प्रतस्थे ॥८१॥

इति शूरजनचरिते महाकाव्ये
अष्टादशः सर्गः ॥१८॥

1. M. न्वोनो मूर्छां । 2. M. बन्ध्वं ।

[ऊनविंशः सर्गः]

नीत्वा दिनानि कतिचित् पथि कौतुकेन तीर्थानि पावनतमानि निषेवमाणः ।
स्वर्वाहिनी-यमुनयोः प्रमना मनोज्ञं **सम्भेद**माप **मकरस्पृशि** चण्डभानौ ॥१॥
यस्मिन् बबन्ध सुषमामरविन्दबन्धोः पुत्री समेत्य सुरलोकतरङ्गवल्या ।
तिर्यग्विमुक्तविशदच्छविकञ्चुकार्धा पापावलीकवलने प्रसृतेव सर्पी ॥२॥
सत्यं सितासितरुची[1] सरितावभूतां मुक्तिश्रियोऽतिरुचिरे किल चामरे द्वे ।
तस्याः समीपतरतामनुपेयिवांसं न ह्येतयोः स्पृशति पावनगन्धवाहः ॥३॥
स्फारे फणाधरपतेः फणचक्रवाले पूर्णं पुराणपुरुषस्य यथा शरीरम् ।
पद्मान्तपूरितकलस्य शर [त्]सुधांशोर्बिम्बे यथा पृथुतरं प्रतिबिम्बमुर्व्याः ॥४॥
गीर्वाणनायकमतङ्गजराजगण्डे माध्वीभुजामविकलं च यथा कदम्बम् ।
आवर्तमध्यपतितः सुरनिम्नगाया रेजे पतङ्गदुहितुर्नितरां तरङ्गः ॥५॥
वारां भ्रमे कमलवल्लभकन्यकायाः पाथः क्वचिन्मिलितमम्बरशैवलिन्याः ।
आभासते स्म शतपत्रमिवावदातं नाभीह्रदान्तरगतं पतगेन्द्रकेतोः ॥६॥
निर्वर्त्य कृत्यमुचितं रुचितं च तत्र दानं स दानवरिपौ विनिवेशितात्मा ।
तप्त्वा तपांसि **तपसि** प्रसितो यशोभिर्विश्वेशदर्शनसमुत्कमनाः प्रतस्थे ॥७॥
नि[:]श्रेयसश्रिय उदारविहारभूमिः सौभाग्यसिद्धिरबलावनिमण्डलस्य ।
प्राप्ता प्रिया पुररिपोरथ पार्थिवेन **वाराणसी**सुकृतसारभृतामुपास्या ॥८॥
आनन्दसान्द्रपुलकावलितुन्दिलाङ्गमन्तःप्रसादविशदाननमीशमुर्व्याः ।
गोपाल इत्यभिधया प्रथितस्तदानीं व्यासोऽवदद्विदिततीर्थवरप्रभावः ॥९॥
संवर्तवर्तुलितमेघघटा[2]विमुक्तमर्यादसागरजलेऽपि न या निमज्जेत् ।
यां न[3] प्रतीपयति कल्पसमीरणोऽपि याऽपेक्षते[4]क्वचन नापि गुणाभियोगम् ॥१०॥
उत्तारयत्यखिलमातरमन्तरेण यत्नेश्वरः सपदि दक्षिणकर्णधारः ।
दुःपारसंसृतिमहार्णवलङ्घनाय कापीयमायतिमती तरणिर्नराणाम् ॥११॥
आरोहतः कुतुकतो रजनीष्वमुष्याः प्रासादशैलशिखरं शशिशेखरस्य ।
सद्यस्तिरोहितशिरःस्थितबालचन्द्रः पूर्णः कलानिधिरुपैति किरीटभावम् ॥१२॥
निर्मथ्य नीरनिधिमुद्धत[5]मादितेयाः पीत्वाऽमृतान्यपि भयं मुमुचुर्न मृत्योः ।
मृत्युः स्वयं प्रवितरत्यमृतं यदस्यां कीटोऽपि येन सुतरामकु[6]तोभयः स्यात् ॥१३॥

---

1. M. रुषी । 2. M. लिवमेघघरा । 3. M. यांनू । 4. M. पापेक्षाते । 5. M. द्धृत । 6. M. नु ।

आख्याय कर्णपदवीमनु जन्मभाजां मन्त्रं मृगाङ्कमुकुटः किल तारकाख्यम् ।
आश्चर्यमत्र भगवान् गुरुरप्यदम्भमात्मानमन्तसदि सादरमर्पयेद् यत् ॥१४॥
ज्योतिर्मयी जयति पञ्चमुखस्य पञ्चकोशात्मिका तनुरियं जगदुज्ज्वलश्रीः ।
पञ्चत्वमत्र भजतां नहि पञ्चभूतैर्भूयः परस्परमहो मिलनं कदापि ॥१५॥
भैक्ष्यव्रतैर्भ्रमणतो भुवनत्रयस्य वैकुण्ठलोकगमनेन न यन्निरस्तम् ।
तत्वं चमं[1]कमलजस्य कपालमस्याः स्पर्शात् कपालिकरतस्त्वरितं पपात ॥१६॥
ब्रह्माण्डलग्नवपुषो महसां समूहैरस्यास्तिरस्कृतविसृत्वररश्मिजालम् ।
मध्येनभो विहरमाणमशीतभानोर्बिम्बं दिवातनसुधाकरवद्व्यलोकि ॥१७॥
रुद्रान् दधद्भिरभितो वरिवस्यमानान् वित्ताधिपैर्विततशृङ्गविलङ्घिताशैः ।
अत्युज्ज्वलस्फटिकनिर्मितहर्म्यदम्भात् कैलासभूधरशतैरिव शोभतेऽसौ ॥१८॥
अस्यां शिरो नमयतो नितरां शिरांसि चत्वारि तावदितराणि समुद्भवन्ति ।
एनां निभालयति यः खलु शुद्धभावो भाले समुल्लसति तस्य च दृक् तृतीया ॥१९॥
एनामनङ्गदमनस्य तनुं द्वितीयां सामान्यभूमिमिव मोहभृतो विदन्ति ।
पश्यन्ति सन्ततमुपेतसमाधयस्तु ज्योतिर्विभिन्नजगदण्डकटाहकूटाम् ॥२०॥
कृत्वाप्यनेकदुरितानि दुरुत्तराणि त्यक्त्वा कथञ्चिदिह देहभृतः शरीरम् ।
नालोकयन्ति समनस्य कठोरमास्यमीशस्य मेदुरमदस्य यथा निरीहाः ॥२१॥
मूर्तिः पुरी च करुणा च शरीरिणीयं सिद्धिर्नवा च नवमी नवचन्द्रमौलेः ।
स्वप्नेऽपि नाल्पतपसो नयनावकाशमालम्बते किमुत सम्भृतपात[2]कस्य ॥२२॥
यत्र भ्रमव्युपरमो भ्रमतो जनस्य यत्र प्रबोधजननी किल दीर्घनिद्रा ।
अन्तोऽप्यनन्तविभवं वितनोति यत्र यत्रान्धकोऽपि भवति ध्रुवमन्धकारि[ः] ॥२३॥
कल्पान्तकन्दलिततापण्डवविभ्रमेण संहृत्य कृत्यनिपुणो निखिलप्रपञ्चम् ।
अस्यां गुणातिगतनौ सगुणं शरीरं देवी निलीनयति दिव्यधुनीवतंसः ॥२४॥
यस्मिन्नचिंत्यविभवे भुवनैकहेतौ ब्रह्माण्डगोलकशतानि परिप्लवन्ते ।
गङ्गेति बिभ्रदतिपावननामधेयं सोऽयं पुरः प्रवहते पयसां समूहः ।२५॥
दृप्यत्त्रिविक्रमपदाक्रमणेन भिन्नब्रह्माण्डभां[ड]विवरेण रयात् पतन्ती ।
विश्वस्य पावनकरी विभुमौलिरेनां स्रग्दामवत् सपदि शेखरयाञ्चकार ॥२६॥
तीव्रेण तेन तपसेह भगीरथस्य भाग्येन भूतलजुषामथवाऽवतीर्णा ।
सोढुं विभोर्विरहखेदमपारयन्ती सेयं पुरीं पुररिपोः परिरभ्य तस्थौ ॥२७॥

---

1. तत्र पञ्चमम् इति स्यात् । 2. M. थात ।

प्रागेव पुण्यसलिलाऽथ हरेः पदाब्जं
प्राप्ता ततोऽनु परिपृष्टहरोत्तमाङ्गा ।
धर्मद्रवी यदि पुनर्मिलितेह काश्यां
कोऽस्या महित्वमभिधातुमहो क्षमः स्यात् ॥२८॥

अम्भोमयी तनुरियं दनुजेन्द्रशत्रोः काशी पुरी पुररिपोः प्रकटैव मूर्तिः ।
अन्योन्यसङ्गमवशादुभयी पवित्रा कस्तारतम्यमनयोस्तनुतां मनीषी ॥२९॥

अस्यां विधाय वसतिं विधिवत् सपर्यां विश्वेशितुर्विशदभक्तिविशुद्धचेताः ।
कर्म क्रमोचितमनुज्झितवानकामः शेषं समापय वयः समयैर्मुनीनाम् ॥३०॥

इत्थं पुरोहितवचो नृपतिर्निशम्य सम्यक् समाहितमनाः स्वहितानुबन्धि ।
विश्राणनादिसुकृतान्यधिकाधिकानि सत्त्वोर्जितानि विदधे विधिवद्विधिज्ञः ॥३१॥

ये येऽत्र सन्ति बधिरान्धकदीनरुग्णा गृह्णन्तु ते द्रुतमुपेत्य समीहितानि ।
एवं वदद्भिरनुगैः प्रतिसन्ध्यमस्य नित्यं निदेशपटहः परिताड्यते स्म ॥३२॥

अन्नप्रवाहमनुवेलमनङ्गशत्रोः पुर्यां प्रवर्षति विशालकृपाकुलेऽस्मिन् ।
तद्वासिनां तनुभृतां भरणेषु चिन्तासन्तानमुज्झितवती चिरमन्नपूर्णा ॥३३॥

विश्राणयत्यनुदिनं ननु दीनबन्धौ तस्मिन्नसीमवसनान्यविशेषदृष्ट्या ।
आत्मस्वभावपरतन्त्रतया स्वतन्त्रोऽप्येकः परं पुरहरोऽजनि कृत्तिवासाः ॥३४॥

म्लानानि हन्त वदनानि वनीयकानामालोकितुं न सहते स्म स भूमिभर्ता ।
दैन्यं तु दानविभवेन परोक्षमेव तेषां दयार्द्रहृदयो दवयाञ्चकार ॥३५॥

वीक्ष्य द्विजातिगुणकर्मपरीक्षणेषु कालातिपातमयमायतमन्तरायम् ।
विश्राणनव्यसनवान् विससर्ज वित्तं यज्ञोपवीतमवगत्य स वीतमायः ॥३६॥

कैलासकौशलभृतो रचिता नृपेण देवालया रुरुचिरे दिवमुल्लिखन्तः ।
सिक्तस्य दानसलिलैः सततं तदीयैः शङ्के यशोमयतरोस्तरुणाः करीराः ॥३७॥

खाताश्च तेन परितो विपुलास्तडागाः पद्माटवीपटिमरञ्जितराजहंसाः ।
येषु प्रविश्य[1]विशदांशुमयूखमाला नक्तं मुहुर्मधुरिमादिगुणानधत्ते ॥३८॥

नो विद्महे नयविदाऽवनिपेन भूयः केनाशयेन विहिताः सलिलाशयास्ते ।
कामं तुषारसरसाः शतशः प्रणीतास्तस्य प्रदानपयसैव हि शैवलिन्यः[2] ॥३९॥

हैमं यदेव मणिभिर्भृतमुन्मयूखैर्विश्वेश्वराय झटिति[प्र]वरं किरीटम् ।
अहाय तद्विनिमयेन नवीनमिन्दुं देवोऽपि शेखरतया भृतवानमुष्मै ॥४०॥

---

1. M. तिश्य । 2. M. णिन्यः ।

किं पौरुषं यदधिकाशि दधीचितुल्यस्तेने तुलापुरुषमेष्यति मोक्षकाले ।
दानान्यदीनहृदयः कति वा न वारांस्तावन्ति हन्त निरवाहयदेत्य तीर्थम् ॥४१॥
यस्यानुवेलममितानि वनीयकेभ्यो जाम्बूनदानि ददतो ववृते न तृप्तिः ।
तेनार्प[1]णाय वसु यन्निहितं तुलायां तद्दानधर्मविहितस्थितिपालनाय ॥४२॥
कालेऽथ तस्य चरमे परमात्मरूपं रामाख्यतारकमनुं जपतः स्वबुद्ध्या ।
आगत्य कर्णकुह[2]रान्तिकमन्धकारिः प्रीत्या चकार पुनरुक्तयोपदेशम् ॥४३॥
भूरिप्रसादसुमुखोऽपि सदीश्वरोऽपि भृत्यं यथाविभवमेव पुरस्करोति ।
यद्वाहनं वृषभमम्बरमैभकृत्तिं तस्मै ददौ प्रमुदितोऽपि स कृत्तिवासाः ॥४४॥
कल्पद्रुमः स जगतां सुमनोगणाय दत्त्वा फलानि कुसुमानि च शर्मदानि ।
पत्राणि चञ्चलतराण्यवकीर्य काले स्थाणुत्वमुत्तमयशाः स्थिरमाससाद ॥४५॥

दिवोदासोऽप्यासीत् किल कतिपयानेव दिव[3]सान्
पुरा यस्याः काश्याः सुकृतनयविद्वानधिपतिः ।
अपूर्वं नैपुण्यं किमपि कृतवान् सूर्जननृपो
यदैश्वर्यं तस्याः स्थिरतरमुपादत्त स कृती ॥४६॥

मध्येकाशि मधुद्विषा विरचिते चक्रेण शक्रादिभि-
र्दु[4]ष्प्रापे मणिकर्णिकेति मुनिभिर्गीतेऽथ तीर्थाधिपे ।
राजा शूरजनो मनोजरिपुणा दत्तस्वहस्तः कृती[5]
त्यक्त्वा प्राकृतदेहमायतसुखे लीनः परे ब्रह्मणि ॥४७॥

तत्पत्न्यः कनकावतीप्रभृतयो मग्नाः समिद्धार्चिषि
प्राप्याऽऽशु प्रकटोज्ज्वलं कनकवद्रूपं गरिम्णाऽधिकम् ।
कल्पान्तावधिकल्पितेशवपुषा पत्या समं सङ्गताः
कायव्यूहभृतो नगेन्द्रदुहितुः सञ्जज्ञिरे मूर्तयः ॥४८॥

निरारम्भा रम्भाप्रभृतिसुररामा ववृतिरे
वृथा वीतातङ्कः समगत समग्रासनभुवा ।
विकीर्य स्वाराज्यं तृणमिव परब्रह्मणि नृपे
रण[6]स्तम्भोत्तंसे लयमयति शम्भोः करुणया ॥४९॥

---

1. M. तेन्मर्थं । 2. M. नुह 3 M. नेषदिष ।
4. M. द्र । 5. M. ता । 6. M. दण ।

किं चित्रं यदि नाम चित्रचरितं चारुस्वरैश्चारणा-
स्त[1]गायन्ति सगङ्गतानि[2]रनिशं मेरौ निषण्णाः सुखम् ।
ब्रह्मीभूतमुपास्यतामुपगतं विश्वेषु यं विश्रुतं
ब्रह्माण्डान्तरवासिनोऽपि वशिनो ध्यायन्ति निर्वासनाः ॥५०॥

इति श्रीशूरजन-चरिते महाकाव्ये
ऊनविंशतितमः सर्गः ॥१६॥

---

1. M. स्त्वं । 2. सुराङ्गनाभिरिति स्यात् ।

[विंशः सर्गः]

शान्तिं गते गूर्जनरायसूर्ये सद्योऽभिभूतास्तमसा घनेन ।
व्यापारहीनाः परितोऽतिदीना द्विजा निजावासमुपेत्य लीनाः ॥१॥
पात्रं निपीताम्बु यथाम्बुराशेरुत्खातरत्नं च धरान्तरालम् ।
त्यक्तं तथा तेन तथाविधेन तमोमयं विश्वमिदं बभूव ॥२॥
अर्थेन शून्यं सदनं बुधानां शब्देन शून्यं वदनं कवीनाम् ।
वदान्यशून्या ववृते धरित्री तस्यावसाने जगदुत्तरस्य ॥३॥
निर्वाहके सर्वमनोषितानां निर्वाणमासेदुषि तत्र नाथे ।
चिरान्निवृत्ता नयनाम्बुधारा दरिद्रदाराननमाललम्बे ॥४॥
आकारणं कारणमन्तरेण कालेऽप्यकालेऽपि कुतूहलेन ।
पुण्यैरशून्यान्यतिसूनृतानि स्मितोपगूढानि च भाषितानि ॥५॥
वयस्यताविष्कृतिपेशलानि राज्ञोऽपि सप्रश्रयचेष्टितानि ।
प्रेम्णोपनीतान्यपि भोज्यवस्तून्यल्पप्रमाणान्यपि मानदानि ॥६॥
दिने दिने दैन्यविदारणानि दानान्यनेकानि सभूषणानि ।
अनुक्षणं भावयतां द्विजानां सभासदां सीदति न स्म शोकः ॥७॥
अथाभिषेक्तुं नृपतेस्तनूजं **भोजं** भुजास्कन्दितवैरिवृन्दम् ।
सन्मन्त्रभाजः सचिवाः पुराणाः पुरोधसश्च त्वरिता बभूवुः ॥८॥
जित्वा जगद्गूर्जरराजभूमिं हूमात्मजस्य प्रसभं जिघृक्षोः ।
अग्रेसरीभूय रिपून् विनिघ्नं[1]स्ततान तोषं पृथुपौरुषो यः ॥९॥
दृगञ्जनं वैरिवधूजनस्य पपौ रिपूणामतनोत्तमांसि ।
स्नेहस्य पात्रं समपूरयच्च प्रतापदीपोऽद्भुत एव यस्य ॥१०॥
अभ्यर्णसंस्थाऽप्यनुरागपूर्णाऽप्यलं न सारोढुमभूत्तदङ्कम् ।
प्रतीक्षमाणाऽस्य महाभिषेकं कन्येव पाणिग्रहणं नृपश्रीः ॥११॥
श्रुत्वा कुमारस्य महाभिषेकतूर्यध्वनिं ताण्डवितं वितेनुः ।
जनाः प्रमोदेन यथा मयूरास्तपात्यये तोयदनादमत्ताः ॥१२॥
स्फुरद्द्विपश्रीरणितं मनोज्ञं तिरोदधे दुन्दुभिधीरघोषः ।
यथा रतान्तर्मणितं वधूनां मञ्जीरकाञ्चीजनितो निनादः ॥१३॥

---

1. M. वितघ्नं ।

नानादिगन्तादथ दन्तिमुख्यमुपायनीकृत्य पदार्थजातम् ।
सेवाविशेषं विशदीकरिष्यंस्तस्थौ चिरं द्वारि नरेन्द्रलोकः ॥१४॥
प्रीत्या नृपस्योपरतस्य केचिद्वयस्यतामस्य विभाव्य केऽपि ।
भयेन भूपा मिलितास्तथाऽन्ये परे त्वनौचित्यनिवारणाय ॥१५॥
सुपर्वसिन्धुप्रभृतीः स्रवन्तीः समुद्रमुख्यांश्च[1] नदानुपेत्य ।
सरांसि पुण्यानि च पुष्करादीन्यु[2]पानयन्नीरमथाऽऽप्तभृत्याः ॥१६॥
तत्रान्तरङ्गैर्गणकैर्गुणाढ्यैर्मु[3]हुर्मुहूर्तं महितं विचार्य ।
उपक्रमे मङ्गलकर्मणोऽस्य सच्छ्रोत्रियाः स्वस्त्ययनं वितेनुः ॥१७॥
व्यासात्मजश्चक्रधरो धुरीणो धराभृतः कृत्यविधौ समग्रे ।
तातं पुरस्कृत्य पुरोऽवतस्थे जगद्धिते कर्मणि जागरूकः ॥१८॥
तथेतरे तत्र रथन्तरज्ञा ब्राह्मं महः प्राज्यतमं दधानाः ।
तत्कालयोग्यानि जगुः समेताः सामानि सन्मङ्गलसाधनानि ॥१९॥
उपात्तमङ्गल्यमहौषधीकैस्तीर्थाम्बुपूर्णैः कलसैरशून्याम् ।
भोजोऽथ जाम्बूनदवद्धवेदिं जगाम विद्वानभिषेकभूमिम् ॥२०॥
धाराऽथ वारां विशदाऽस्य मूर्ध्नि व्यरोचत स्फाटिककुम्भमुक्ता ।
पीयूषधारा महिकामयूखबिम्बात् पतन्तीव नगेशशृङ्गे ॥२१॥
तस्याभिषेकप्रभवानि तानि तोयानि शीतानि तनौ धृतानि ।
व्यसर्जयन् सूर्जनविप्रयोगजन्मानमुग्रं परितापमुर्वीम् ॥२२॥
मनोऽनुकूले कुलवर्धनोऽसौ शुद्धे दुकूले विशदे वसानः ।
राजश्रियो लोचनलोभनीयमाशिश्रिये मण्डनमुच्छ्रितश्रीः ॥२३॥
यत्तर्जनीसङ्गविशेषिताऽसौ विशेषकश्रीर्नवनायकस्य ।
अतो बभूवास्य ललाटसंस्था विपक्षलक्ष्म्याः किल तर्जनी सा ॥२४॥
गोरोचनाकुङ्कुमपूर्णरागो भाले विशाले तिलकः कृतो यः ।
स एव मन्ये मनुजाधिपेऽस्मिञ्जनानुरागाङ्कुरतां जगाहे ॥२५॥
दधार दूर्वाङ्कुरचारुगुच्छं मङ्गल्यमेकं स निजोत्तमाङ्गे ।
दुर्वारदूर्वाङ्कुरदन्तुराणि हर्म्याणि हन्त द्विषतामभूवन् ॥२६॥
भद्रासनं भद्रकरः प्रजानां चित्राम्बरस्रस्तरमारुरोह ।
यथोदयाद्रिं भृतधातुरागं तमोपनोदाय मयूखमाली ॥२७॥

---

1. M. ख्यंश्च । 2. M. नु । 3. M. यैमु ।

सिंहासनं हेमकृतं कुमारः पदाऽम्बरस्स्तरमारुरोह ।
स्फुटं यथा मानसजं सरोजं परागसान्द्रच्छवि राजहंसः ॥२८॥
छायां धरित्र्याः स्वतनौ विलग्नां विहाय भीतः किमु शीतभानुः ।
आगः प्रमार्ष्टुं तदिवाऽऽतपत्रमिषाद्धरित्रीरमणं सिषेवे ॥२६॥
तत्पार्श्व[1]योरायतमाप्तभृत्यैर्विधूयमानं विधुकान्तिगौरम् ।
प्रकीर्णक-द्वंद्वमुवाह शोभां तरङ्गयुग्मं किमु कीर्तिनद्याः ॥३०॥
अपि प्रकृत्या विशदं सुवर्णैः संयोजितं तत्र विशेषविद्भिः ।
मुमोच तच्चामरयुग्ममस्य बालस्वभावान्न विलोलभावम् ॥३१॥
प्रणेमुरेनं नमितारिलोकमालोकशब्देन कृतावधानम् ।
सामन्तसार्थाः सह मन्त्रिमुख्यैस्तथाऽपरे भूपतयः प्रतीताः ॥३२॥
तं वन्दिनो नन्दितमित्रवर्गं नामान्वयज्ञा नमदाननेन्दुम् ।
गुणानगण्यानिशं गृणन्तः सन्तोषयामासुरसीमसत्वम् ॥३३॥
तस्मिन्महे सन्महसां द्विजानां समाजमभ्यर्च्य समाप्तकृत्यः ।
अव्याजमव्यग्रमनाः समग्रं वितत्य वित्तं विततार वेत्ता ॥३४॥
मान्यान्नरेन्द्राननुजीविनोऽथ मित्राणि बन्धून् गुणिनां गणांश्च ।
गजाश्वरत्नाम्बरभूषणाद्यैः सम्भावयामास यथोचितं सः ॥३५॥
तं भीमसेनं रिपवो वदन्ति कर्णस्य जेतारमथार्थिनो ये ।
धर्मप्रधाना धरणीभुजस्तु जानन्ति[2]राजानमजातशत्रुम् ॥३६॥
विनीतदम्भं विनयेन नम्रोऽप्युच्चैःशिरस्त्वं न जहौ निजं सः ।
स्मितेन सिक्तान्यपि तद्वचांसि वज्रोपमानि द्विषतां सदासन् ॥३७॥
असावधृष्यो[3]ऽपि नवाधिकाराज्जगन्मनोरञ्जनजागरूकः ।
प्रेमानुबन्धप्रवणैर्वचोभिः सम्भावयामास समग्रलोकम् ॥३८॥
अयं जनोद्वेगभयान्न राजा प्रचण्डभावं प्रकटीचकार ।
नवप्रभुत्वस्य पुनः स्वभा[वा]त् तमुग्ररूपं ददृशुः पुरस्थाः ॥३६॥
प्रभुः[4] प्रसादातिशयप्रमत्तैरकारि यैर्वाऽविनयोऽपि पूर्वम् ।
स तं वतंसो विशदाशयानां सस्मार न प्राक्तनसेवकानाम् ॥४०॥
विक्रान्तिराक्रामति न स्म नीतिं न ताञ्च नीतिः क्वचिदत्यशेत ।
विभज्य कालं द्वितयेऽपि विद्वान् साधारणीं प्रीतिमसौ दधार ॥४१॥

---

1. M. श्च ।
2. M. तांति ।
3. M. घृषो ।
4. अत्र विसर्गाभावः सुश्लिष्टः स्यात् ।

श्लोकप्रदाः केचन मानपूर्वं केचित् पुनस्तद्विपरीतकृत्याः ।
वित्तं प्रभूतं बहुमाननां च स एव वेदार्थिजनाय दातुम् ॥४२॥
उपेक्षिता ये क्षमया विपक्षाः पर्याप्तकृत्येन पुराऽस्य पित्रा ।
लीनश्चिरं चेतसि कालयोगात्तेषां ज्वरः प्राणहरो जजृम्भे ॥४३॥
प्रयात्ययं किन्नु मृगान्निहन्तुं किंवा सपत्नानिति संशयालोः ।
यानोन्मुखे कौतुकतोऽपि यस्मिन् पुरं वनं वा न[1] सुखाय शत्रोः ॥४४॥
चापं समारोपितशिञ्जिनीकं सनाथयत्यस्य करे कदापि ।
स्वावासभूमीपरिवृत्तिमीयुः परस्परं वन्यमृगाः परे च ॥४५॥
जिष्णु[ः]स्फुरद्वैरिवरूथिनीनां दुरात्मनां दण्डधरः खलानाम् ।
मित्रे प्रचेता धनदोऽर्थिवर्गे चतुर्दिगीशः स बभूव वीरः ॥४६॥
नवप्रभोस्तस्य नवं निदेशं नोष्णीषयामास मदान्नृपो यः ।
उष्णीषमायोधनसीम्नि तस्य मस्तिष्कलुब्धो विनिनाय गृध्रः ॥४७॥
और्वायितं शरणमम्बुनिधिं गतेषु दावायितं विततकाननमाश्रितेषु ।
वज्रायितं शिखरिसानुसनाथितेषु तस्योर्जितेन महसाऽरिमहीश्वरेषु[2] ॥४८॥
दिक्पालोद्रिक्तदन्तावलबहलवलत्कर्णतालान् विलुम्प-
न्नाव्रण्वन् व्योमनद्या निरतिशयरय[3]स्फारधाराविरावम् ।
रुन्धानोऽरुन्धतीशप्रभृतिसुरमुनिस्तोमसञ्चारधाम
प्रोद्दामो यस्य यात्रासमयसमुचितो जृंभते तूर्यनादः ॥४९॥
अव्यग्रोदग्रवल्गत्तुरगखरखुरक्षोदितक्षोणिपृष्ट-
स्पष्टप्रोद्धूतधूलीनिवहकवलितव्योमवीथिप्रदीपः ।
भेरीभाङ्कारभीमैः पटुपटहरवाडम्बरैरम्बरान्तं
यो भिन्दन्नाजिभूमौ रिपुनृपतिचमूचक्रमाक्रामति स्म ॥५०॥
आलोकादेव लोकान् कवलयितुमिव प्रोद्यता तीव्रवेगा
दुष्टक्ष्मापालवक्षःक्षतजरसवसाकर्दमोद्दामरूपा ।
कल्पान्तक्रूरकालीविलुलितरसनासन्निभा शत्रुसैन्यै-
रुन्नीता यस्य नेतुः समरभुवि करक्रोडगा खड्गवल्ली ॥५१॥

---

1. M. वांत ।　　2. M. महीरय ।　　3. M. शयश्वरेषु । एवं च ४८ श्लोकीयान्तिमाक्षरत्रयेण सहैतच्छ्लोकीयैतदक्षरद्वयस्य परिवृत्तिर्लेखकप्रमादाज्जातेत्यवसीयते ।

कांश्चिद्दयालोलबालव्यजनमपनयन् प्रागनैषील्लघुत्वं
कांश्चित्त्रस्तान् कुरङ्गानिव गुरुकृपया पालयामास बालान् ।
दृप्तानन्यान्मृगेद्रानिव शरनखरैर्भिन्दतः कुम्भिकुम्भा-
नद्धा बद्धावधानः प्रशममगमयत् क्रूरशस्त्रेण शास्ता ।।५२।।
धावन्ता ये मदान्धा वनकरिण इवो[त्]क्षिप्तहस्ताः प्रहर्तुं
तेषामुच्छिद्य सद्यः समरभुवि शिरः कीर्तिमुक्तां जहार ।
व्यावल्गद्वल्गुखड्गैरदयमदलयत्तीक्ष्णखड्गान् सदात्[1]
सैन्यारण्ये रिपूणां मुहुरिति मृगयानैपुणं निर्ममे यः ।।५३।।
शुह्माः संग्रामजिह्माः सपदि दिशि दिशि प्राप्तभङ्गाश्च **वङ्गा**
वैदर्भा न्यस्तदर्भा निजदशनमधि स्रस्तदेहा **विदेहाः** ।
त्रैगर्ताः प्राप्तगर्ता ययुरथ विकला **मालवाः** कालबाधां
गान्धारास्तीक्ष्णधाराहतिचकितधियः सिन्धुपारं प्रयाताः ।।५४।।
पण्डा **मण्डा**ख्यदुर्गस्थितधरणिभुजो दत्तसर्वस्वदण्डा
वन्ध्याः सन्ध्यानखण्डादपि(?) लघिमधृतः केपि विन्ध्याद्रिसंस्थाः ।
अन्ये मन्ये विलीनाः क्वचन विदधतो हंत वन्येन वृत्तिं
यस्योदग्रे रणाग्रे स्फुरति जितहरिन्मण्डले मण्डलाग्रे ।।५५।।
पिण्डीभूततुषारपाण्डरतरे यस्यानु**विन्ध्यं** यशः-
स्तोमे किन्नरकामिनीभिरभितः प्रोद्गीयमाने मुदा ।
प्रालेयाचलशङ्कया पितृगृहावासाय बद्धस्पृहा
शैलेन्द्रं तमपोहितुं न सहते मन्ये नगेन्द्रात्मजा ।।५६।।
तीर्त्वा सप्तापि तावद्वितत जलनिधीन् सप्तलोकानुपेत्य
क्रान्त्वा पातालभूमीरतनुरयवशादक्रमात् सप्तसंख्याः ।
गन्तुं ब्रह्माण्डभाण्डाद्बहिरथ विवरं क्वापि नासादयन्ती
सङ्कीर्णोऽप्यस्य कीर्तिस्त्रिभुवनभवने स्थैर्यमालम्बते स्म ।।५७।।
न श्यामा न च सञ्चरेन्मृदुपदं क्षामोदरी नाप्यसौ
निन्दन्ती च कलाभृतं वितनुते नग्नस्य कण्ठग्रहम् ।
प्रागल्भ्यात् कुलभूभृतामपि शिरांस्याश्रित्य नृत्यत्यहो[2]
तस्याभूत्तदपीयमद्भुतरुचेः[3] कीर्तिः परा प्रेयसी ।।५८।।

---

1. स चान्यान् इति स्यात् । 2. M. रु । 3. M. धेः ।

वाले व्यालस्तवाग्रे दलय बलयुते कण्टकान् दृष्टकेशा-
न्मन्दे मन्दप्रयाणं त्यज हतहृदये लग्नमर्चिर्निचोले ।
द्रागुद्विग्ना दवाग्नेः प्रथममथ पुरः सञ्चरिष्णोः प्रतापे
कान्तारे मुक्तकान्ता मुहुरिति जगदुर्यस्य विद्वेषिकान्ताः ॥५९॥
भ्राम्यन्ती वनसीम्नि वैरितरुणी जीर्णात् कदाचिद्गुणात्
स्रस्तानि स्तनमौक्तिकानि विततान्यादातुकामा द्रुतम् ।
चिन्वाना बदराणि यस्य नृपतेः कीर्त्या दधत्यच्छतां
वन्याभिर्विनिवार्यते युवतिभिः साक्षेपवाग्डम्बरैः ॥६०॥
आत्मानं त्रिषु पिष्टपेषु परितस्त्रेधा विभज्य स्वयं
तन्वन् दिक्षु दशस्वपि स्थितिमतीरन्याश्च मूर्ती[1]र्दश ।
क्लृप्तद्वादशमूर्तिमुष्णमहसं निर्जेतुमुत्कण्ठितः
शङ्के संववृते त्रयोदशतनुर्यस्य प्रतापोच्चयः ॥६१॥
गोपायत्वति[2]मत्सरो निजगणैर्वित्तानि वित्ताधिपो
यत्नेनावृणुतामगाधसलिले रत्नानि रत्नाकरः ।
दानायोद्यमभाजि भोजनृपतौ को वा भवे दुर्विधो
धारावाहितया[3] धरैव हि धनान्यावर्जयत्यर्थिने ॥६२॥
इत्थं सोऽवहितो रणे वितरणे सम्यक् प्रजापालने
लक्ष्मीमुज्ज्वलयन् कुलस्थितिकरीं कीर्तिं च जङ्घालयन् ।
दि[4]क्लोशेन पुरस्कृतः परिवृतो **रत्नादिभि**र्नन्दनै-
रध्यास्ते चरणाद्रिमादृतबुधो वृन्दावतोनायकः ॥६३॥

[ग्रन्थकृत्परिचयः]

गौडीयः किल **चन्द्रशेखर**कविर्यः प्रेमपात्रं सता-
मम्बष्ठान्वयमण्डनात् कृतधियो जातो **जितामित्रतः** ।
निर्बन्धान्नृपसूर्जनस्य नितरां धर्मैकतानात्मनो
ग्रन्थोऽयं निरमायि तेन वसता **विश्वेशितुः पत्तने** ॥६४॥

इति सूर्जनचरिते महाकाव्ये
विंशतितमः सर्गः ॥२०॥
समाप्तश्चेदं सूर्जनचरितं काव्यम् ॥

1. M. र्त । 2. M. त्यति ।
3. M. कथा । 4. M. द्वि ।

शूर्जन-चरितस्य अकारादिवर्णानुक्रमेण श्लोक-सूची

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
अकरोन्मम	१२,	३८
अकवरधरणीशः	१७,	५६
अक्षीणाया दक्षिणाया	३,	५४
अखण्डब्रह्माण्डं	२,	५९
अखिलामपि	१२,	८
अगणितोन्मद	८,	५
अग्रे तुरङ्गम	१६,	३६
अच्छेतुकामा	३,	४१
अजनि तस्य सुतः	८,	२६
अजातरूपा	३,	५५
अजायत जयी	६,	१५
अजायतास्मादथ	५,	२
अजिह्मगाः सन्त्वथ	१७,	३४
अजिह्मगानामपि	१७,	३३
अतः करस्थामपि	५,	४०
अतःपरं किं नु	१७,	४३
अतिथेः क्षिति	९,	६३
अतिदूर	१४,	४८
अतिबलोद्धत	८,	१३
अतिविस्मयिनीं	२,	२३
अतीत्य कक्षाः	१०,	१११
अतीव दुःप्राप	१०,	४१
अत्युत्कटैः कण्टक	१७,	५३
अत्रागतानां सह	३,	३४
अत्रान्तरेऽरुन्तुद	१०,	३७
अत्रावदातं शत	७,	४२
अथ कश्चन भाग	९,	३४
अथ गतवति नाकं	६;	८६
अथ घनजल	१८,	६०
अथ चेदभिमानतः	१२,	२१
अथ तं करुणा	९,	६१
अथ दुर्वचसं	१२,	४३
अथ नरपति	१८,	८१
अथ नूतनो	१४,	७८
अथ भगवदनु	९,	७०
अथ भ्रमन् भूवलयं	१०,	१३५
अथ यस्य जलाशयस्य	९,	४८
अथ रथप्रतिमै	८,	१४
अथ रीतिममानुषी	९,	३१
अथ वारुणी	१४,	३६
अथवा वितथं	२,	३९
अथ विधाय विधे	८,	२५
अथ विश्वपतिः	२,	१
अथ वीक्ष्य पुरं	१२,	१
अथ शङ्खम	१४,	१२
अथ सम्भ्रमतः	९,	६९
अथ सुनयसहायः	२,	६३
अथ सौम्यमूर्ति	१४,	३
अथाङ्गनाकण्ठ	१०,	७७
अथातिरेकस्रव	१०,	३८
अथापतत्तत्प्रति	१०,	१२०
अथापतत्पलि	११,	२६

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
अथापरेद्युः	१७,	१	अनादरारोपित	१०,	१३३
अथापरे वैरि	१७,	५२	अनानमन्नेव	१७,	४१
अथाभिवाद्य	६,	७२	अनारतं यत्न	१८,	४५
अथाभिषेक्तुं	२०,	८	अनीचस्तनसत्	१३,	३२
अथैकदा कन्दलिता	१०,	२६	अनुकूलतरेण	२,	४३
अथैकदा चित्त	१०,	१५४	अनुगृह्य वचो	१२,	२
अथोपकर्तार	१०,	१३१	अनुपतद्भ्रमरा	८,	४८
अथोपनीते	१०,	१०२	अनुप्रयाणाय	३,	४
अदशदाम्रलता	८,	३८	अनुवेलमियं	१२,	४५
अदसीयकुन्तल	१४,	१५	अन्तः सरागापि	७,	७
अदिशदाशु च	८,	२	अन्तः स्फुरन्त्याः	३,	६६
अद्याप्यमुष्मिन्न	७,	४६	अन्तर्वत्नीं दद	१३	४४
अधरपत्रविमर्द	८,	३६	अन्तर्विशन् षट्पद	७,	४५
अधरे कुतु	१४,	२३	अन्ते वसन्तः कल	७,	३६
अधिकत्वरोऽपि	१४,	४	अन्नप्रवाहमनु	१६	३३
अधिगम्य निगूढ	२,	४६	अन्यदा तुलयं	१३,	५६
अधिनासिकं	१४,	२२	अन्या जगाद	१०,	८६
अधिमूलमिन्द्र	१४,	५५	अन्येद्युरुन्निद्र	१०,	६८
अधिरोपिता	१४,	७५	अन्योऽब्रवीद् वीर	१०,	११५
अधिरोप्य सप्र	१४,	८०	अपनीतपरिश्रमं	६,	६७
अधिवनान्तमशोक	८,	४०	अपरं तु निरन्तरं	२,	४६
अधुनापि म[मा]	१२,	१५	अपरः परवीर	१२,	२८
अधृष्यरूपस्य	१०,	७४	अपरस्तव पूर्व	२,	५५
अधो दधानं	३,	३०	अपसारिते	१४,	७०
अध्यास्य टिल्लि	१६,	६	अपारयन् प्राणि	७,	४७
अध्वराखिलसम्भार	६,	७४	अपि नरेन्द्रपर	८,	३०
अनङ्गसर्वस्व	५,	१३	अपि प्रकृत्या	२०,	३१
अनन्यसाध्यः किल	१०,	१५१	अपोढकपटा	१३,	३६
अनयोः प्रथमे	२,	४८	अप्यनावरण	४,	१०

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
अभिपतितुमुद	४,	४८	अवधार्य शुद्ध	१४,	६
अभिरामतरं	२,	२६	अवनिः स्वयमीयुषी	११,	७२
अभिरेजु	१४,	५६	अवनीमवनीश	२,	५१
अभ्यर्णसंस्था	२०,	११	अवनीरमणो	६,	१
अभ्यासमभ्यास	१०,	१६	अवरोधगणा	१२,	५१
अभ्यासयोगेन	३,	६३	अवलम्ब्य कदम्ब	१८,	५३
अमितैः परिता	२,	२८	अवलम्ब्य दण्ड	१४,	५२
अमुना यमुना	१८,	३५	अवलोकितु	१४,	७४
अमूनि चालोक्य	३,	३२	अवलोक्य तमद्भुता	६,	६०
अमृतद्रवेण	१४,	६१	अवशस्वतनुः	६,	४२
अम्भोधराणां	७,	१६	अवशिष्टसांध्य	१४,	४५
अम्भोमयी तनु	१६,	२६	अवाप्तदाहस्तनुते	१०,	३६
अयं जनोद्वेग	२०,	३६	अविमर्षवशेन	१२,	७
अयंतः सर्व	१३,	३८	अविसह्यमनङ्ग	६,	५
अयमितकच	४,	५१	अव्यग्रोदग्र	२०,	५०
अथोजयत्तन्मिथुनं	१०,	१०३	अव्याहतस्तुत	१६,	१६
अरुणा[द]रुणप्रख्यो	६,	२०	अशेषतः सञ्चरिते	३,	४२
अरुणैस्तरुणैन	६,	१३	अशेषपादानि	११,	५७
अर्चयित्वाऽवनीपालः	६,	६४	अश्रान्तनिष्यन्दि	१५,	४५
अर्थेन शून्यं	२०,	३	अश्वतीर्थं स	१८,	४२
अर्ध गतोऽपि	१६,	४८	अष्टमूर्ति त्रिमूर्ति	६,	७२
अर्हणाभिरुचि	१८,	२	असंशयं सोऽय	१०,	६८
अवगाह्य च काननं	६,	१८	असंस्तुते पुंसि	१०,	४०
अवचित्य पुरो	६,	१४	असतोऽपि सम	१२,	२४
अवततार हरि	८,	२०	असमाप्य कुल	२,	३८
अवतीर्णममु	६,	६४	असावधृष्योऽपि	२०,	३८
अवतीर्णममुश्च	१२,	५५	असूयतासौ	१०,	७
अवदच्च स्वयं	१३,	४१	असौ दशरथा	१३,	२८
अवदातशीतल	१४,	१३	असौ विजय	१३,	८

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
असौ विदूरस्थित	१०,	१३४	आदेशतोऽस्याः	१०,	७३
असौ स्वभक्तिप्रति	३,	४५	आधोरणप्रहित	१६,	२१
अस्मिन्निशायामपि	७,	४६	आधोरणान्मद	१६,	४५
अस्यां निधाय	१६,	३०	आधोरणैरधि	१६,	३८
अस्यां शिरो	१६,	१६	आननेनाथ	१३,	३०
अस्यान्तरे सन्तत	३,	२७	आनन्दसान्द्र	१६,	६
अहं महाभाग	१०,	८०	आपणैर्विलस	६,	५८
अहो महामोहज	१०,	३६	आपीडयन् म्लेच्छ	१७,	३०
आकर्णकृष्टचापेन	६,	४७	आम्रेडनं चेत्	१५,	२३
आकर्ण्य तारं	१५,	५८	आयान्तमेतं	१०,	६६
आकर्ण्य सन्देश	१०,	६७	आयामवच्श्मश्रु	१७,	३२
आकारणं कारण	२०,	५	आयोधनाग्रे	१०,	१३६
आकारतो न	१,	३५	आयोधनेष्व	१६,	१०
आकाशमाकृष्य	१०,	१५	आयोधनेष्वेव	११,	८
आकीर्य रम्यैः	१८,	५६	आरात् पारायणे	६,	५
आकृष्य दूरं	१७,	१६	आरुह्य वाजि	१६,	२
आक्रीडनं वयसि	१६,	२६	आरूढसौधो	१०,	८३
आख्याय कर्णं	१६,	१४	आरूढहर्म्याणि	१५,	४७
आगतः स्वय	१८,	३	आरोप्यमाणानि	११,	४५
आम्रेयन्तैः	१७,	१०	आरोप्य मेदिनी	६,	३८
आज्ञयाऽवनिपते	४,	३६	आरोहतः कुतु	१६,	१२
आज्ञापिताः	१६,	८	आलोकादेव	२०,	५१
आज्ञाबलात्तदपि	१,	७	आलोक्य तां तरुण	३,	६६
आतङ्कतः प्रच्युत	५,	५१	आलोक्यास्य च्छल	१२,	५६
आतिथ्यसम्भार	३,	१३	आवृत्य वक्त्रं	३,	४०
आत्मानं लिप्सु	२०,	६१	आवेष्ट्य मौलि	१६,	५३
आदत्त रम्या अपि	५,	११	आशामथासाद्य	५,	५६
आदर्शविम्ब	१६,	२२	आश्चर्यमस्यावनि	११,	१०
आदाय ताम्बूल	५,	८	आश्रयात् सतत	१८,	१२

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
आसन्नगाधेऽस्त्र	१७,	२४	इत्थं पुरो	१६,	३१
आसाद्य रौद्रीं	१५,	३६	इत्थं प्रवृत्ते	१५,	१५
आस्तामनास्था	१०,	१४८	इत्थं विधाय	५,	६१
आस्वाद्य जम्बू	१८,	१४	इत्थं स निर्णीय	१०,	१५३
आह्लादयामासतु	७,	५	इत्थं सपर्यासु	५,	१०
आह्लादितद्विज	१,	३४	इत्थं समाश्वास्य	१०,	४५
इतरत्र यदर्जितं	६,	५२	इत्थं सोऽव	२०,	६३
इतरेतरं	१४,	४३	इत्युक्तवान्मुक्त	१०,	६६
इतरोऽपि तद	२,	५६	इत्युदीरितवती	४,	२८
इति गिरमनुरूपां	२,	६२	इदं वितन्वन्	७,	५७
इति चिन्तयति	६,	३०	इदमद्भुतकौशलं	६,	२६
इति ते कृत	२,	३०	इदमाह च	१२,	४४
इति दुर्मनसं	२,	१२	इयं भवानीभवनं	३,	४४
इति निर्विशन्	१४,	६३	इयञ्च गीर्वाण	१८,	३०
इति निशम्य गिरोऽथ	८,	१	इयता कियती	१२,	३५
इति प्रतीतः प्रति	१०,	१२८	इयमायतकौतुका	६,	३७
इति भ्रुवाणां वर	१०,	४२	इयमायतिमञ्जुला	२,	२४
इति मन्मथ एव	६,	४४	इह कश्चन यो	१२,	६
इति रचित	१५,	८०	ईदृश्यपारे व्यस	१०,	१४२
इति वादिनमादि	२,	४२	ईर्ष्यातिरेकोत्थ	१५,	२६
इति वादिनि	१२,	३६	उचितं तदेव	१४,	३८
इति सज्जिता	१४,	२८	उचिते समये	१३,	६७
इति स्तुतिभिरीशानं	६,	८०	उच्चैर्महाराज	१०,	१६४
इतीरितः काल	१०,	१५६	उच्चैस्तया गत	१६,	४२
इतीरिता रीति	१०,	१०६	उच्चैस्तया ध्रुव	१,	२३
इतीरितास्ते	१७,	४६	उच्चैस्तया संस्तुत	११,	११
इत्थं जपैरभिषवै	३,	६७	उच्चैस्तरोऽभून्नृपति	११,	४८
इत्थं तयोरत्र	१०,	६२	उत्क्षिप्योच्चैः	१२,	६३
इत्थं पराजित्य	५,	५८	उत्तंसितोज्ज्वल	१६,	४०

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
उत्पन्नस्तनुजस्तस्य	६,	८३	उपलभ्य च दर्शनं	६,	६६
उत्तानपाद	१८,	३३	उपविष्टममु	१२,	३
उत्तानस्थं स्वस्त	१२,	६६	उपशल्यसङ्गत	१४,	५
उत्तारयत्यखिल	१६,	११	उपात्तमङ्गल्य	२०,	२०
उत्तुङ्गतातर्जित	११,	२५	उपात्तरत्नैः कटकैं	११,	२६
उदयं चरमाद्रि	१२,	५	उपायनैः सम्य	५,	४५
उदयं प्रयाति	१४,	४०	उपासितारौ सततं	५,	१८
उदितः कला	१४,	६४	उपेक्षिता ये	२०,	४३
उदितः समग्र	१४,	६०	उपैतुकामा	७,	२३
उदिते कला	१४,	६५	उभौ प्रतापेन	११,	१३
उदीयमानात् किल	७,	३	उभौ वसूना	११,	५१
उदीरयित्वेद	१०,	६३	उररीकृताखिल	१४,	३३
उद्गायतामल	७,	३८	उल्लसद्विशदभक्ति	४,	२४
उद्दामधाम्नि	१,	१२	उल्लूखाने प्राप्त	११,	७०
उद्यन्ननूरु	१५,	५	उल्लूखानोलूक	१२,	७०
उद्यानमेतन्मद	३,	२४	ऊर्ध्वप्रसारित	१६,	४६
उद्रेकमाप	१८,	६२	ऋज्वी यदीन्दो	१०,	३४
उपगूहनानि	१४,	८७	ऋत्विग्भिरभ्यस्त	५,	१६
उपचितो जगति	८,	२७	ऋद्धां समा	१५,	३६
उपचीयमान	१४,	८५	एकं भवन्तं	१०,	८२
उपदिष्टमुपाय	२,	२२	एकमेव नृपते	१८,	६
उपदीकृतमानतैः	१२,	१७	एकस्य पाथोज	१५,	५२
उपनाभि चक्ष	१४,	८६	एकेनैव करा	१३,	५३
उपप्लवोऽभूत्	११,	५३	एकैककर्म	१०,	१८
उपरतमवगत्य	४,	४७	एकैकमस्मात्	७,	४१
उपरिगप्रतिबिम्ब	८,	६	एकैकशः क्लेशित	१०,	१२४
उपरुध्य पुरं	१२,	३६	एतदेव जनुषः	४,	२२
उपलताडन	८,	११	एतस्य दानसलिल	१	१८
उपलदारण	८,	३	एतेनागामि जन्मापि	६,	७७

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
एनामनङ्गदमनस्य	१६,	२०	कलियुगे च निगू	८,	१६
एवं जिगाय	१६,	११	कल्पद्रुमः स	१६,	४५
एवं निवेद्यानत	१०,	४७	कल्पान्तकन्द	१६,	२४
एवं प्रवृत्ते पथि	१०,	१२५	कस्तूरिकाकर्दमित	३,	३८
एवं ब्रुवाणां	१०,	६०	कस्यापि कुत्रापि	११,	५६
एवं ब्रुवाणा	१५,	३३	कस्याश्चिदम्भः	१५,	६७
एवंविधैरथान्यैश्च	६,	४१	कांश्चिद्दयालोल	२०,	५२
एवंविधैस्तै	५,	२४	का त्वं कुतस्त्यासि	१०,	७८
एवंविधैस्त्वं	१५,	३२	कादम्बिनी काल	१८,	७०
एवं स दाने	११,	६३	कान्ताभिषेकाय	१५,	६३
एवं स श्रृण्वन्	३,	५१	कान्तेन सिक्तं	१५,	६२
एवं हरिप्रस्थ	१०,	११६	कामं कलाभिः	१५,	६
एवमुज्ज्वलितकोर्ति	४,	४२	कामं क्रमेण नितरां	१,	३८
औचित्यमात्मव	१,	५	कामं बभूवुरपरे	१,	३१
और्वायितं	२०,	४८	कामं महार्घैरपि	११,	४४
कंसस्य कारा	१८,	३८	कामं समर्थापि	१५,	६१
कति न क्षिति	२,	५०	कार्यं प्रकाशयति	१,	१
कतिभिर्दिवसै	६,	४६	कार्यं समीचीन	१७,	४४
कदम्बवीथीमनु	३,	२६	कालिङ्गयसैन्यं	५,	४८
कनकपुष्पमिव	८,	१६	कालिन्दीपुलिन	१८,	२७
कमप्युपायं	१०,	५०	कालेऽथ कल्पाग्नि	१०,	१२६
करमर्पयितुं	६,	४	कालेऽथ तस्य	१६,	४३
करावलम्बं वित	११,	२०	कालेऽथ शुद्धि	१६,	१
करिणः परिणद्ध	२,	३	कालेन कियता	१३,	३६
करेण रागाद्धन	७,	८	किं चित्रं यदि	१६,	५०
कर्णमूर्जित	१३,	२४	किं पौरुषं	१६,	४१
कलधौतकुम्भ	१४,	११	किमगाधपा	१४,	४६
कलाविलासेप्य	१०,	२२	किमतिमुक्त	८,	४६
कलितैकचक्र	१४,	२०	किमशीतरोचिषि	१४,	४७

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
किमियं वनदेव	६,	२५	कोपं कलानाथ	१०,	६५
किरीटेन शिरः	६,	२८	कोषागारं कृशा	१३,	५८
कीर्णं क्वचिन्मर्दित	१५,	७७	कौक्षेयकाक्षेप	१७,	५०
कीर्त्याऽस्य चन्द्र	१,	७२	कौतूहलक्षिप्त	१०,	७५
कुचकुम्भसीम्नि	१४,	२४	क्रमेण मीनास्य	१०,	७६
कुञ्जोदरे वा	१५,	५३	क्रमेणाऽऽक्रान्तभु	१३,	२६
कुण्ठं विवेकाङ्कुश	१०,	२८	क्रीडन्तमेवं तुरग	१०,	६३
कुण्डान्यखण्डानि	११,	५८	क्रीडीकृतायामपि	३,	३७
कुमुद्वतीकामुक	१०,	६०	क्रोधान्मुक्ता धन्विभि	१२,	६४
कुर्वते समयतः	१८,	१०	क्वचिद् विपञ्चो	३,	४६
कुर्वन् यथाकाल	३,	५६	क्व तनुर्नव	२,	३७
कुलाद्रिकल्पैः	१७,	४	क्षणं दृगम्बु	५,	६
कुशलः स्वकीय	१४,	४२	क्षणतः पृथुपन्नगो	६,	४६
कुशेशयाक्षी	१०,	३०	क्षितिनायक	६,	३५
कुसुमपल्लव	८,	४४	क्षिप्तं पयः	१५,	७१
कुसुमाकरशीलिते	६,	२८	क्षिप्ता नभो	१५,	११
कूजन्मुहुः शोणमुखः	७,	१२	क्षीराम्बुधिः सुरगणै	१,	१४
कृतप्रायोपवेशं	६,	२६	क्षीरेण सप्तच्छद	७,	६
कृत्वा करप्रदांस्तव	६,	८१	क्षोणिपैरधि	४,	२७
कृत्वाप्यनेक	१६,	२१	खरकालखड्ग	१४,	३७
कृत्वा महार्हसम्भारै	६,	३०	खसानसाधूनसुभि	५,	५७
कृत्वा वशे	१६,	७	खाताश्च तेन	१६,	३८
कृपयाप्यवधीर	१२,	६	गगनद्रुमस्य	१४,	३२
कृपापालितदिक्	६,	६७	गङ्गाम्बुसङ्गादति	५,	६
केचित् सलील	१६,	३७	गजाधिपाः केऽपि	११,	५४
कैलासकौशल	१६,	३७	गत्वा कियद्दूर	१५,	६५
कोटाख्यं कूट	१३,	७६	गन्धानुमेयानप	३,	८
कोटिशो रसनाः	६,	७३	गाहन्त एते गहनं	७,	४४
कोदण्डं गाण्डिव	४,	४६	गिरमित्थमुदीर्य	१२,	२२

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
गिरमित्थमुदीर्य	६,	४७	चण्डराजस्तनूजो	१३,	६
गिरिदरीशयिताः	८,	७	चतुरम्बुधिमेख	१२,	१२
गीर्वाणनायक	१६,	५	चत्वारि यावत्	१०,	११४
गुणैर्महार्घैर्महसा	१०,	८	चमूधराणां	५,	४४
गुरुध्यानेनैव	१८,	८०	चमूरमुष्याति	१७,	१२
गुरुर्गौरीलोकं	४,	४६	चम्पकप्रतिमाङ्गीनां	६,	६
गुरुवरण्डकरज्जु	८,	४	चर्मण्वतीवारिणि	११,	४१
गुरुसमरसमुत्थ	१७,	५५	चापं समारोपित	२०,	४५
गृहे गृहे माथुर	१८,	४१	चारुणा चरितेनाथ	६,	३७
गृह्णातु पाणिं	१५,	२०	चिकुरार्पितदिव्य	६,	२०
गोपायत्वति	२०,	६२	चिकुरेण चामर	१४,	१६
गोरोचनाकुङ्कु	२०,	२५	चित्रैश्चरित्रैः	११,	६
गोविन्दराजं	११,	३	चिन्तनेन सुलभः	४,	१८
गोविन्दराजादजनि	११,	४	चिरं त्रिलोकी	१०,	६
गौडीयः किल	२०,	६४	चिरं परिश्रान्ति	१७,	४७
गौरि शौरिगिरि	४,	२	चिरकालमुत्सु	१४,	६६
ग्रन्थिलत्वमपदे	१८,	१७	चिरनिर्गतास्वपि	१४,	६१
ग्रीष्मानुरोधादनु	१५,	५६	चिरप्रवासान्मिलितं	७,	११
घण्टानिनादैरुप	१७,	८	चिरान्निवृत्तस्य	१८,	६६
घण्टाभिराहित	१६,	१८	चिराय विप्रो	१८,	३४
घनकुञ्जतिरोहितं	६,	६	चेष्टाभिरिष्टाभि	१५,	२४
घनतमसि विलीने	१८,	७८	चौहानवंशभव	१,	६
घनश्रृङ्खलया	१२,	१६	छायां धरित्र्याः	२०,	२६
घनसैनिकजाल	१२,	४२	जगतीषु यो	१४,	३५
घनान्धकारेष्वपि	१८,	७३	जगत्त्रयीपावन	७,	३४
घनोदितानां	७,	२४	जगदुज्ज्वलेन	१४,	१
घोणारवैर्घु	१७,	६	जगद्विजयिवीर्येण	६,	४६
चक्रे न पात्र	१३,	५	जगमालभूपति	१४,	७७
चञ्चलाञ्चल	४,	२३	जग्मुर्युवानो	१५,	४४

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
जगराख्यपुरस्य	१२,	३२
जज्ञे नृदेवादथ	१०,	१
जननावधिसेवितं	९,	९
जनिता न धुरंधराः	२,	३९
जन्मामुष्यां	१८,	३२
जय कर्पूरगौराङ्ग	६,	६५
जयन्तो शील	१३,	२९
जयन्त्यां जय	१३,	४२
जयश्रियः कार्मण	१०,	१६२
जानामि जन्मा	१५,	१७
जानीहि पाणिस्थित	१०,	४९
जानौ कफोणिं	१०,	२५
जिगमिषुः स्वपुरं	१४,	९४
जितपल्लवविभ्रमाः	९,	२
जित्वा जगद्गू	२०,	९
जित्वैवं जवना	४,	५३
जिष्णु[:]स्फुरद्वैरि	२०,	४६
जिह्मस्वभावं खलु	१०,	१३०
जिह्मस्वभावाद्यदि	१०,	१४१
जिह्वाविलोलन	१,	८
जेतुं पतङ्ग	१६,	१५
जैत्रात्मजोऽपि	११,	७४
जैत्रो रिपूणां	११,	६
ज्ञातप्रभावः	१०,	१५०
ज्ञातस्तदाऽभ्रं	३,	१०
ज्ञात्वा रणस्तम्भ	११,	६४
ज्ञानशक्तिरसि	४,	१२
ज्योतिर्मयी	१९,	१५
ज्योतिरुज्ज्वल	१८,	२२
ज्वलनं जलवैरिणां	६,	७०
ज्वलन्तमन्तर्व्यसनस्य	१०,	१६०
ज्वलयताऽथ	८,	४१
झङ्कारिणः क्वापि	१५,	४९
तं कुन्तलाः कुन्त	५,	५०
तं कुमारमपि	४,	४४
तं तत्र विश्रान्त	७,	३१
तं तेजोभिः प्रज्व	१२,	६८
तं नियन्त्रितमारोप्य	६,	२५
तं भीमसेनं	२०,	३६
तं यन्त्रितं मन्त्रित	१०,	१३२
तं वन्दिनो	२०,	३३
तं वारणस्थित	१६,	२७
तटसीमनि तस्य	९,	१९
ततः पथा तेन	५,	५५
ततः परं वीक्ष्य	१७,	२७
ततः पुरं षधुर	११,	३८
ततः शरौघाः	१७,	११
ततः समासाद्य	७,	१
ततः समाहूय	५,	३३
ततस्तदीयानन	१०,	२७
ततस्तस्मिन् यशः	६,	३३
ततो भविष्यद्विरहो	१०,	११०
ततो भृतोत्साहभरे	३,	२३
तत्कर्मणि प्रणि	१६,	२३
तत्पत्न्यः कनका	१९,	४८
तत्पार्श्वयोरा	२०,	३०
तत्पुरं स्ववशी	६,	१४
तत्सैन्यनिर्भर	१६,	३०

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
तत्र तत्र तता	१३,	६६
तत्रातिभूमिं	५,	३४
तत्रान्तरङ्गै	२०,	१७
तत्राभिवाद्य प्रथमं	३,	५३
तत्रैव बाह्योप	३,	१४
तथापि वैरं	१०,	१४३
तथा प्रगल्भापि	१०,	७६
तथाविधांस्तानपि	१७,	३७
तथेतरे तत्र	२०,	१६
तथेति तथ्यां	५,	४१
तथेति तस्य	१०,	१०५
तदपि स्वमहं	२,	४४
तदहं नरदेव	२,	४०
तदहःप्रभृति	६,	४१
तदिङ्गितेनाधि	१०,	१२
तदुपरि प्रथितो	८,	१७
तदेतदावेदित	१०,	४६
तद्गच्छ संवर्धय	१०,	५२
तद्धैर्यवृत्त्या	१०,	४४
तद्ध्यानधारा	३,	६४
तद्बाणवह्ने रनलं	१७,	३५
तनया महतां	२,	३५
तनयोऽस्य गुरो	२,	१३
तन्नन्दनो नरपति	१,	२७
तपस्विना कुम्भ	७,	२६
तप्ताङ्गारकरालायां	६,	४०
तमन्वगान्मानव	३,	२
तमभ्यसिञ्चत्	५,	३७
तमसा न तिरस्कृतः	२,	१७
तमुत्तराशां तरसा	३,	३
तयोस्तथाऽन्योन्य	५,	१४
तरङ्गिणीशांस्त	१७,	३८
तरङ्गिता मन्द	३,	३१
तरस्वी तुरगारूढ	६,	२२
तरुणायन्मिथुनेषु	८,	३२
तव जाग्रति	२,	२७
तव सन्ति च	१२,	१८
तस्मात् पृथुगुणात्	६,	८२
तस्मात् समर	१३,	१४
तस्मादजायत सुतो	१,	२०
तस्माद् विशाल	६,	४५
तस्मान्नर्मदनामा	१३,	१६
तस्मान्महार्घनिः	१३,	१०
तस्मिन् गतिं पुराय	११,	१
तस्मिन्नलङ्कृतवति	१,	२२
तस्मिन्मखे ब्रह्म	७,	५५
तस्मिन्मखे मेध्य	११,	६१
तस्मिन्महे सन्म	२०,	३४
तस्य जन्मनि	१३,	४८
तस्य प्रयातुः	१७,	२
तस्य विग्रहदेवो	६,	१
तस्याः पितुः साहस	१०,	५४
तस्याः प्ररूढेन	५,	१५
तस्याऽऽत्मजो गुरु	१,	२६
तस्यात्यये सत्वर	१०,	१२३
तस्यान्तरे शान्त	११,	३५
तस्याभिषेक	२०,	२२
तस्याभिषेक	५,	३५

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
तस्या भुजिष्याद्भुत	१०,	८५	त्वां विना जननि	४,	६
तस्योपमानं	१०,	८६	त्वादृशाः कति	१८,	५
तस्योपरिष्टात्	३,	७	त्वामपारमहिमोप	४,	१५
तां मद्वचोभिर्वद	१०,	६५	दधत्यो नखरत्नानि	६,	६
तान् दुर्वारान्	१२,	६६	दधार दूर्वाङ्कुर	२०,	२६
तार्क्ष्यस्य पक्षाति	११,	३२	दधिचन्दनार्द्र	१४,	६७
तिरोहिते कौतु	१८,	५६	दन्तच्छदं दन्त	१५,	७०
तीक्ष्णकौक्षेयक	१३,	२०	दयितस्य तूर्ण	१४,	५७
तीर्त्वा सप्तापि	२०,	५७	दयिताधरचारु	२,	५
तीर्त्वेत्थं तटिनीं	१६,	५५	दष्टाधरा मुग्ध	१५,	६८
तीर्थान्तराणां	७,	४०	दात्यूहपारा	१८,	५०
तीव्रेण तेन	१६,	२७	दाम्ना मणीनां	१८,	३६
तुरङ्गचारोचित	७,	२६	दिक्पालोद्रिक्त	२०,	४६
तुरङ्गमैश्चिल	१७,	५	दिदेश भीमस्य	५,	३२
ते त्रासजान्धं	१७,	३६	दिनकृतोज्झित	८,	४२
तेन तेन विहितेन	८,	२०	दिनमुखोपचितं	८,	५३
तेनाजनिष्ट यशसा	१,	२१	दिने दिने दून	१०,	२३
तेनापि सूनुरनु	१,	२४	दिने दिने दैन्य	२०,	७
तैलङ्गीरङ्ग चोरः	१३,	७६	दिवमुत्पतितुं	२,	४
ते वीतविघ्नं	११,	६२	दिवसैरपरैः	१२,	४७
ते हि प्रवीरा	१०,	११७	दिवाऽपि चन्द्रिका	४,	५६
तोयोपरि भ्रम	१६,	४६	दिविषदायतनान्य	८,	२२
त्रिधा विभक्ता	७,	३२	दिवोदासोऽप्या	१६,	४६
त्रिलोकीशरण	६,	६८	दिवोऽवतीर्णं	७,	३६
त्रिसन्ध्यं त्रिविधाः	६,	३६	दिशि दिशि विनि	११,	६७
त्वत्कलाभिरणिमा	४,	७	दिशो मिमानं	१७,	३
त्वद्गुणश्रवण	४,	१६	दुःकीर्तिपङ्कगत	१,	१५
त्वमप्येवं देवं	२,	६०	दुर्गमेकमुप	१८,	१६
त्वमेको विश्वनिर्माण	६,	७१	दुर्निवारतरदुष्ट	४,	१६

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
दुर्वासनापिशाचीयं	६,	७६	धृतचारुमङ्गल	१४,	६८
दूनानन्दनिदा	१३,	७०	धृतनिजासन	८,	५०
दूरादहंपूर्विकया	१५,	६०	धृतिमेतु धृतिः	६,	३३
दृगञ्जनं वैरि	२०,	१०	धैर्यातिरेकादव	१७,	११६
दृप्यत्त्रिविक्रम	१६,	२६	ध्येयैः समाहित	१८,	५७
दृशोरिदंपूर्वतया	३,	२२	ध्रुवं चतुर्बाहु	७,	६०
दृष्ट्वा जयन्तीमथ	३,	११	न कामरूपाक्रमणे	५,	६०
देवद्विजन्मातिथि	१५,	२१	न केवलं कुला	१३,	७१
देवो नाम सुतो	१३,	१३	नक्तं दिनं सम	१,	१३
दैवादुपेत्य	१६,	३५	न चकार चुम्ब	१४,	६०
दोर्लीलाविदलित	४,	५०	नच नवस्तवके	८,	२३
दोषाः परं	१५,	४	न च वक्रतया	२,	१६
द्युमणिकनक	१८,	७७	न चोत्सहे सोढु	१०,	१०८
द्रष्टुं चिरादस्ति	१०,	५१	न जराकृतवैकृत	६,	५३
**द्रागुत्तुङ्गानुत्त	१२,	५६	नदीं जलद्रोणि	११,	२७
द्रागुद्वहन्तं	१५,	२६	न परं निज	१३,	४६
द्रुततरमतिरौद्रः	११,	७१	नभःस्थितं ताव	१७,	१४
द्रुतमुच्चलितुं	६,	८	नभसि सान्द्र	१८,	७६
द्वारस्थितैरस्फुरित	१०,	११२	न मां समायात	१०,	१०६
द्विगुणं खलु बिम्ब	२,	१५	नमितो नहि नाव	६,	१०
द्विषद्भटस्यारभटी	११,	५	न मुहूर्तविवेचना	१२,	४८
धनलालसया	१२,	४६	नयति स्म	१४,	५०
धर्म एवाभव	१३,	६४	नरपालमयं	१३,	१५
धर्मपत्नी बभूवास्य	१३,	२१	नर्मदस्य मही	१३,	२२
धारातिपात	१५,	६६	नर्मदान्वयजं	१८,	२१
धाराऽथ वारां	२०,	२१	नर्मदाश्रयवि	१८,	७
धारासारैरुद्ध	१२,	५७	नवखण्डितपल्लवा	६,	१६
धावनाय निज	४,	२६	नवनीलचोल	१४,	५१
धावन्तो ये	२०,	५३	नवपलपाटल	१४,	२७

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
नवप्रबुद्धाम्बुरुह	७,	२५	नितान्तभक्तया	११,	२
नवप्रभोस्तस्य	२०,	४७	नितान्तमादर्श	५,	७
नववधूनिभृता	८,	५५	नित्यमाश्रित्य	१३,	४
नवसौहृदं	१४,	८८	निपुणो निजदेव	६,	१५
नवसौहृदस्य	१४,	६२	निबध्यावन्ध्यनिर्वन्धः	६,	४८
नवेन्दुवक्राऽविरतं	७,	४३	निबन्धसङ्गत्वर	१७,	२६
नवोढवध्वा नम	१५,	१४	निभृतं निरुध्य	१४,	८३
न श्यामा न च	२०,	५८	निमग्नमेनं व्यस	१०,	१३६
न स्म प्रमाद्यति	१,	३७	निमग्नवक्त्रं	१०,	६१
नागात्तस्मात्	१२,	७६	निमज्जयन्ती हृदयं	१०,	६७
नात्वासयन् पार्श्वे	७,	१७	नियतमम्बुजिनी	८,	५२
नाथः कलानां	१५,	१	नियोजितस्तेन	११,	१६
नानादिगन्तादथ	२०,	१४	नियोजिताः काञ्चन	५,	५
नानादिगन्ताहृत	११,	१८	निरगुर्गभीर	१४,	४४
नाभीहृदोल्लासि	१५,	७४	निरामया नीर	११,	२४
नामानि यस्य	१८,	३६	निरारम्भा रम्भा	१६,	४६
नाराधितां पुराराते	६,	७५	निरुद्धय धैर्याति	१०,	१३७
नालक्ष्यन्त क्षिप्र	१२,	७३	निरुन्धति व्योमनि	१७,	१६
नाला व्यालाधि	१३,	७८	निरुपाधिकृपापूर	६,	७८
नाश्चर्यमेतदमु	१,	४१	निर्गुणस्य न	४,	६
निःश्रेयसश्रिय	१६,	८	निर्गुणोऽपि स	४,	१३
निःसत्त्वो वीत	६,	२३	निर्घातोग्रस्वान	११,	७३
निजकालनिदेश	१२,	४०	निर्जीवं विरहि	१८,	७५
निजजीवनमप्यु	१२,	३१	निर्वन्धपृष्टापि	१०,	३३
निजविभ्रमाभरण	१४,	१६	निर्मथ्य नीर	१६,	१३
निजानुरूपां गुण	५,	१२	निर्माय कश्चित	१०,	१५२
निजेन्द्रियेभ्योऽपि	१०,	२१	निर्माय कश्चिदु	१६,	५४
नितरां निरुपप्लवाः	२,	२६	निर्माय तां मन्मथ	१०,	१६
नितान्तनिस्थाद्या	१७,	२३	निर्यातयन् वैर	१०,	१६६

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
निर्याति नो	१५,	२७	पराडा मराडाख्य	२०,	५५
निर्याय ते	१६,	६	पतनोत्पतना	६,	२१
निर्वर्त्य कृत्य	१६,	७	पत्यौ प्रतीपे	१५,	२५
निर्वाप्य प्रतिभट	६,	८५	पत्नालिलीना	१५,	७५
निर्वाहके सर्वे	२०,	४	पदं पैतामहं	६,	२
निलये निलीय	१४,	५४	पद्मभूवदनपद्म	४,	८
निविडाधिनिर्द	१४,	५३	पद्माकराणां	१५,	६
निवेशितैकाङ्गुलि	५,	३६	पद्मासनस्था अपि	३,	३६
निशम्य मा[म]प्रज	५,	३८	पपातापाततः	१३,	४०
निश्चित्य चित्तेन	५,	३१	परं सम्भावयामास	६,	२६
निष्पीय निःशेष	१५,	४०	परतन्त्रतया पितुः	६,	४०
निस्तीर्य पूर्वाद्रि	१५,	१३	परशुपातपरासु	८,	१०
निहतः समरे	१२,	३४	पराजितेऽस्मि	१७,	४५
निहितमूर्ध्वमुप	८,	८	परापरपरे	१३,	३७
नीतं नभः शत्रु	१७,	२२	परिचुम्बनेच्छु	१४,	८६
नीता नितम्बस्तन	११,	४६	परिचुम्ब्य पार्श्वे	१४,	५८
नीतोऽपि पार	१६,	४४	परितः खचिते	६,	५६
नीत्या नितान्तमित्येवं	६,	३२	परिधाप्य धौत	१४,	१४
नीत्वा दिनानि	१६,	१	परिमलैः परितः	८,	४३
नीत्वा स कत्यपि	१८,	२६	परिरम्भिणि	१४,	८१
नीपद्रुमे यत्र	३,	१८	परिहासपुरःसरं	६,	१२
नूनं ममान्ते रिपवो	५,	२८	पर्यन्तमासाद्य	३,	६
नृत्यन्नतभ्रू	१८,	४६	पर्याणपीडन	१६,	१६
नेत्रश्रीतर्जिता	१३,	३१	पवनेन पुरो	१८,	६५
नो विद्महे	१६,	३६	पाणौ पुरैव	१६,	२५
न्यस्तं स्तनान्ते	१०,	३१	पाण्डित्यं गाण्डिव	१३,	७५
पञ्चबाण-वणिक्	६,	७	पात्रं निपीताम्बु	२०,	२
पञ्चवक्त्र-चतुरा	४,	११	पादैः परं पटु	१६,	५०
पञ्चाशद्भिः सैन्ध	११,	६५	पान्थो युवा	१५,	४८

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
पारं प्रयातु	१६,	४३	प्रकृतिस्थयोरपि	१४,	१८
पारावारान्तराला	१३,	८०	प्रगल्भं सञ्चरन्तीनां	६,	११
पारीन्द्रमेव मृग	१,	४०	प्रगुणीकृतकान्ति	६,	५७
पिण्डीभूततुषार	२०,	५६	प्रजह्रुरेनं युग	१०,	१२१
पित्रार्पितायामवि	१०,	१०	प्रणयैः सुहृदः	२,	२५
पीताः पुरश्चण्ड	१५,	४६	प्रणिपत्य विप्र	१४,	७६
पोताऽरुणेनाह्नि	१५,	३	प्रणेमुरेनं नमि	२०,	३२
पीत्वाऽतितप्ता	१५,	४१	प्रणोदितानां	१६,	२१
पीयूषसारस	१,	४	प्रतन्यमानप्रति	१०,	१५७
पुंस्कोकिलालाप	१५,	३७	प्रतिक्षणं क्षाम	१०,	२४
पुण्यक्षेत्रे तत्र	१०,	१६८	प्रतिद्विपास्कन्द	१०,	१६१
पुरं तदासाद्य	१०,	१२६	प्रतिपत्तिर्नृणां	१३,	५१
पुरं समन्तादकुतो	१०,	५८	प्रतिपालनमात्त	२,	४७
पुरः परेण	१७,	१७	प्रतिप्रतीकं	१५,	७८
पुर एव नीप	१८,	७२	प्रतिमन्दिर	१८,	४०
पुरस्कृतः पार्श्व	३,	१	प्रतिवाचमोर	१४,	८२
पुरा देवान् पुरो	१३,	४७	प्रतिश्रुतं पिष्टप	१०,	६१
पुरुहूतदिशं	१२,	२६	प्रतिष्ठासुः प्रात	१४,	६५
पुरुहूतपुरोहितो	२,	२०	प्रतीक्षमाणः सुत	५,	१७
पुरोधसा धौम्य	७,	२७	प्रत्येकनामपरिकी	१६,	२८
पुरोपकण्ठं	३,	१२	प्रत्येषि नो चेन्मम	१०,	६६
पुरो बहिः क्वापि	१०,	११	प्रत्येष्यति त्वद्वचना	१०,	६४
पुरोहितेन स्व	११,	२२	प्रथममेव[ब]भूव	८,	१८
पुष्पासवं पत्र	७,	२१	प्रथमानुराग	१४,	५६
पूर्णमेत्य मतिमान्	४,	३०	प्रथितः पृथुविक्रमः	१२,	४
पूर्वमेव पृथिवी	४,	४१	प्रद्योतयन्ती	३,	४३
पूर्वो हंमीरदेवस्य	१३,	१	प्रबुद्धोऽथ विशु	१३,	४३
पृथुलं पृथिवी	१३.	६१	प्रभुः प्रसादाति	२०,	४०
पृथ्वीराजस्य	२३,	२	प्रमदान्मदादपि	१४,	८

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
प्रयात्ययं किन्तु	२०.	४४	बाष्पोदबिन्दु	१५,	१०
प्रलम्बबाहुः परि	१०,	२	बिम्बादथाम्भोज	७,	५८
प्रवेष्टुमन्तर्मठ	३,	४६	बिम्बाधराक्रान्ति	१५,	६६
प्रसारयञ्छीतकरः	७,	१३	बिभ्रत् सदा सुर	१,	२८
प्रसेदुषा शीत	७,	१५	बुद्ध्यां विनि	१५,	२८
प्रस्वेदकम्पाकुल	१०,	१००	बोधिद्रुमं बुद्धि	५,	२२
प्रहिता प्रयत्न	१४,	७६	ब्रह्माण्डलग्न	१६,	१७
प्रागेव पुण्य	१६,	२८	भणितैरनृती	६,	३
प्राचेतसीं प्राप्य	५,	५६	भद्रासनं भद्र	२०,	२७
प्रायो मदनिदानं	१३,	६३	भयविस्मयशोक	१०,	१६७
प्रालेयपिण्ड	१७,	६	भर्तुः प्रभावाति	१५,	४२
प्रावृड्वल्लीजल	१८,	७६	भवदिष्टमिदं	१२,	२०
प्रास्थानिकध्वनि	१६,	१३	भवन्ति तुल्याकृत	१०,	८८
प्रियां निशम्येति	१०,	७२	भवन्ति भार्याः	१५,	३०
प्रेक्ष्य पाण्डुशत	४,	३३	भवन्ति शक्र	१३,	६६
प्रेम्णा प्रियेणाम्बु	१५,	७६	भागधेयं विभु	१३,	५७
प्रोत्साहयन् साह	५,	४२	भारमल्लो भव	१३,	१८
प्रौढाहितावनि	१,	२६	भासामथो भर्तरि	११,	४२
फलन्ति चिन्तामणि	११,	१२	भुक्ताऽवनिं चिर	६,	७३
वङ्गो नामाभव	१३,	१२	भुजान्दोलझणत्	६,	१०
वर्हेण येषां	१८,	६८	भुजायुगस्वस्ति	१५,	७६
बलवत्यपि बाल	१२,	१३	भूभृद्विशालकटकं	१,	३३
वहवो यवनेषु	१२,	२५	भूयिष्ठभूषामपि	१५,	१६
वहुभिर्वत संशितैः	१२,	११	भूरिजन्मजनितं	४,	२१
वहुशः कृतवि	१२,	१०	भूरिप्रसाद	१६,	४४
वहुशोऽद्भुत	१२,	२३	भूरीणि भूयिष्ठ	५,	२०
वालचन्द्रलसद्भाल	६,	६६	भैक्ष्यव्रतैर्भ्रम	१६,	१६
वाललीलाविलो	१३,	५४	भ्रांत्वाऽतिदूरं	१५,	५१
वाले व्याल	२०,	५६	भ्राम्यन्ती वन	२०,	६०

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
भ्राम्यन् पिपासुः	१५,	५०
मग्ने निकारायत	१०,	१४६
मञ्जुलामतनु	४,	३८
मतिमानतिमानुषं	२,	६८
मदनज्वरसुल्व	९,	२२
मदनेऽप्युपदेष्टु	२,	१०
मधुना मधुरीकृते	९,	२७
मधुमत्तविदग्ध	२,	९
मधुमासविशेषिता	९,	३८
मध्यन्दिनेऽपि	६,	५३
मध्येकाशि मधु	१९,	४७
मनुवंशभुवां	२,	५४
मनोजमौर्वी	१८,	४६
मनोऽनुकूले	२०,	२३
मनोऽनुवृत्तिं	१०,	१०४
मन्दाकिनी यत्र	७,	३७
मन्दाक्षदाक्षिण्य	१५,	१९
मन्दोल्लसत्पवन	१६,	३१
मम पूर्वभवः	१२,	२७
मम सैनिक	१२,	३०
ममाप्यन्धधिय	६,	७९
मया पराधीन	१०,	८१
मया विनाऽसौ	१०,	१०७
मर्मस्पृशाऽप्यस्य	१५,	३१
मर्मातिगेनाहित	१७,	१८
मलयमारुत	८,	३३
महसां निधयो	२	५३
महाकालकिरीटस्था	६,	५१
महान्तमप्याश्रित	७,	४८
महाभिषेकेण	५,	३८
मांसाशया शोणि	१७,	२६
मादृशाऽलसतया	४,	१७
मायन्मतङ्गज	१६,	२९
मानिनीसमुदायस्य	६,	५७
मानोन्नतेन	१६,	४
मान्यान्नरेन्द्रा	२०,	३५
मान्यास्तथान्या	१५,	३४
मालाः सिताम्भोज	३,	६
मिलितः पृथिवीपतिं	९,	६८
मुकुलपुलकितां	१८,	६३
मुक्ताः कुतूहल	१६,	३२
मुक्ताकलापे	११,	५५
मुखमुज्ज्वलमेक	९,	५८
मुदं विधाता किल	३,	५६
मुरजिन्मुखर्वी	१८,	५२
मुरवैरिकौशल	१४,	१०
मूर्तिः पुरी च	१९,	२२
मूर्ध्नः कम्पैरङ्कुश	१२,	६०
मृगावलीझंकृति	३,	२५
मृगीदृशा संसदि	१०,	२९
मृणालजालं परि	१०,	३२
मृष्टं मुखं मृगा	६,	१३
मौर्वीरवेण व्रण	१७,	२८
मौर्वीसनाथं	५,	४९
म्लानतामयति	१८,	१४
म्लानानि हन्त	१९,	३५
म्लेच्छाधीशोऽप्यस्य	१२,	७४
यः कामपाल इव	१,	११

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
यः पत्नवेगाद्	५,	३	यस्मिन् बबन्ध	१६,	२
यततां सुमना	२,	४१	यस्य प्रस्थानवेला	१३,	७४
यत्पुरं परितो	६,	४	यस्य स्मृतावपि	१८,	५४
यत प्रस्थितौ वारण	१०,	८८	यस्याः कृपालवसुधा	१,	२
यत्तर्जनीसङ्ग	२०,	२४	यस्यां निनादै	३,	१६
यत्त्वनन्तर	१८,	२०	यस्यां पुरोपार्जित	३,	१६
यत्र गूर्जरगौराङ्गी	६,	१२	यस्यां विपणि	३,	२०
यत्र भ्रमव्युप	१६,	२३	यस्यां लवङ्गीमपि	६,	६१
यत्रातपत्नपद	१८,	५८	यस्यानुवेलम	१६,	४२
यत्रार्जवेन न	१६,	२४	यस्यामुत्पन्नया	६,	४६
यत्राऽऽशाजैत्र	१३,	७३	यानक्रमार्दति	१६,	३४
यत्राऽऽसन्नमहादेव	६,	५४	यामातरं यान्त	१५,	३५
यथाप्रतिज्ञं प्रति	१०,	१२२	यावत्तुरङ्गं	१७,	४८
यथा विपाणेरिह	१०,	१४६	यावदुद्यमभृतो	१८,	१
यथोपचारं स	३,	५२	यावदुद्यमभृतो	४,	३४
यदलभन्त पुरा	८,	३१	युगान्तजीमूत	५,	४३
यदसुस्रुवन्	१४,	७२	ये येऽत्र सन्ति	१६,	३२
यदि कश्चन जायते	२,	५२	ये स्वतोऽधिक	१८,	१३
यदि चन्द्रिकापि	१४,	६३	योग्यं जगत्या	१०,	१३८
यद्बहिस्थमखिल	४,	५	यो वर्धयत्यम्बु	१५,	२
यमश्ववारा नव	१०,	१३	योऽसौ महाराज	१०,	१५५
यमेन नित्यं	३,	६०	रक्तासवास्वाद	१७,	२५
ययुश्च तस्या	११,	२३	रक्तोत्पलै	१८,	२८
यवनाः सवनायुजा	१२,	५४	रघुनाथविक्रम	१४,	६
यशःपताकाङ्कित	५,	५४	रजःप्रताने	१७,	७
यशांसि युष्मा	१७,	४२	रजनीशदिनेशयो	६,	५१
यश्चिकीर्षति	१८,	४	रजस्तमोरुद्ध	१७,	१५
यस्मिञ्जयाहितमतौ	१,	३६	रञ्जिता प्रबल	१८,	१६
यस्मिन्न वित्तं	१६,	२५	रतप्रवृत्तोन्मद	१८,	४८

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
रत्नानि यत्नेन	११,	५०	वज्राद् व्यजायत	१,	३०
रयणास्तनयस्तस्य	१३,	६	वत्से तथापि	१५,	१८
रशनागुणेन	१४,	२६	वदनैर्मदनैकता	६,	५०
रसज्ञतायामपि	७,	१८	वदन्तमेवं मृदु	१०,	१४५
रसातिरेकेण	५,	५३	वधूस्वभावान्न	१०,	१०५
रहसि स्थितमाहित	२,	२१	वनसमीरणं	८,	४६
राकानिशाकर	१६,	१७	वनितास्यनिशाकरै	६,	५४
रागिणापि प्रतापेन	६,	१७	वन्यं फलं मूल	३,	५७
रागेण यावन्म्रदि	१५,	१२	वपुषा ललितेन	२,	१४
राज्ञामपारगुण	१,	६	वयस्यतावि	२०,	६
रामोऽस्य नाथ	६,	३४	वरय वरमभी	३,	६८
रासोत्सवे	१८,	५५	वरसङ्गिमङ्गल	१४,	६६
रिङ्गत्तुरङ्गं विल	१०,	११८	वरसिंहः सुत	१३,	१७
रिङ्गद्गङ्गोत्तमाङ्गो	६,	५२	वर्षाण्येवं द्वादशा	७,	६२
रिपवो वनगोचरा	२,	३१	वल्गान्तविस्फु	१६,	४१
रिपुमण्डल	१२,	२६	वशगो बभूव	१४,	३४
रुचिरोत्सवो	१४,	७	वशिनां प्रथमोऽपि	६,	२३
रुद्रान् दधद्भि	१६,	१८	वसन्तमुख्यैः	१८,	४३
रूपमौपनिषदाः	४,	४	वसुन्धरामुद्धृत	७,	३३
रूपेण गम्भीर	१०,	६४	वाञ्छाधिकद्रविण	१,	३६
रेणुव्रातैर्ग्रस्त	१२,	५८	वाणाशनं तद्वि	१७,	४६
रेणुभिः पिहित	४,	३२	वाणासनं सज्य	७,	५६
लग्नं कुचे	१५,	६४	वाणीपाणिलसद्	६,	५५
लब्धलक्षा अपि	६,	८४	वातायनेभ्यः	१५,	८
लाजानिवाऽऽजानु	१०,	६६	वाद्यैरथान्यैरन	३,	५०
लावण्यतारुण्य	१०,	४३	वारां भ्रमे	१६,	६
लावण्यपुण्यामृत	१०,	५	वारिकानन	१८,	१८
लीलयापि विनि	१३,	५५	वासरेशसुतया	१८,	८
लोकालोकेनेव	७,	६१	वासरैः कति	१८,	२५

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
वाहिनीभिरिति	४,	३७	विनीतो नीति	१३,	११
विकटटङ्कविदारण	८,	६	विभज्य राज्यं	१०,	६
विकत्थमानं	६,	१८	विभावसुसमे	१३,	२७
विकलं वियोज्य	१४,	३६	विमोच्य वैरिणं	६,	२७
विकान्तिनीति	१६,	५	विरलं तमः	१४,	४६
विक्रान्तिराका	२०,	४१	विरोधिभू	१७,	४०
विचित्रकल्प	१८,	५१	विलङ्घिता यै	१७,	३६
विजया निजया	६,	६५	विलासिनोसं	१८,	४७
विजृम्भमाणोत्कलिका	७,	१०	विलुप्तमर्याद	१८,	७१
विडौजसं वीर्य	११,	३६	विलेपनैर्ग्रन्थिल	३,	३६
विततबहुविध	८,	५६	विलोक्यतां कौतुक	१०,	६२
वितरन् स विमुच्य	१२,	५२	विविधाङ्गराग	१४,	३०
विदग्धवनिता	१३,	५६	विशदकीर्तिमतीव	८,	२८
विदलितद्रुम	८,	१२	विशिखैर्विषमा	६,	३६
विदूरभिन्नाधर	७,	६	विशीर्णचापाश्चपलं	७,	२
विद्याः कुलो	१३,	५२	विशुद्धमन्त्रेरित	११,	६०
विधाय भक्त्या	११,	३७	विशुद्धवर्णोज्ज्वल	११,	५६
विधिवशः प्रसवो	८,	४५	विश्राणयत्यनु	१६,	३४
विधुरं ध्रुवमप्र	२,	३२	विश्राम्यन्ती तव	१२,	७५
विधेः कृपारोधि	१०,	१३३	विश्वम्भरोऽस्मिन्निव	११,	४६
विध्वानतो वधि	१,	१७	विषयेष्वधिका	२,	३४
विनतभ्रुवः	१४,	२१	विस्रस्तमाल्यान्	१५,	७३
विनापि बाणे	१८,	६६	विस्रस्तैः केश	१३,	७७
विनिघ्नतस्तस्य	१७,	५१	विहितौ तुषार	१४,	६२
विनिद्रबन्धूकदला	७,	२०	वीक्ष्य द्विजा	१६,	३६
विनियम्य च मानसं	६,	२४	वीक्ष्य खीयं सैनिकं	१२,	६७
विनिर्मितं हीर	३,	२८	वृन्दानि वृन्दारक	७,	३५
विनिह्नुतं दीप्ति	३,	३३	वृन्दारकाधिप	१,	१६
विनीतदम्भं	२०,	३७	वृन्दावतीयं कुल	५,	२६

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
वेदानुशिष्टे पथि	५,	२७
वैद्यैः सुविद्यै	५,	२३
वैभवं तव भवानि	४,	३
वैरायितं वैरिणि	१०,	१४०
व्यग्रात्मनां निज	१६,	१४
व्ययेन भूपाल	१०,	५६
व्ययोजयन् कां	१७,	३१
व्यसनेन वासर	१४,	४१
व्यासात्मजश्चक्र	२०,	१८
व्रजतः पथि	६,	३१
व्रजेद्यदायं जय	१०,	५७
शंसन्नित्थं संनि	१२,	७१
शकान्निराकृत्य	११,	१६
शकुन्तलाभां गुण	१०,	४
शकुन्तलेव भरतं	१३,	४५
शतेन सार्धेन	१०,	५५
शनकैर्विधृत्य	१४,	८४
शरवत् समरान्तरे	१२,	३७
शस्त्राशस्त्रिव्यापृतानां	१२,	६२
शाकंभरीयलवणा	४,	४५
शान्तिं गते	२०,	१
शिक्षाविशेष	१६,	३३
शिखिनः प्रद	१४,	७३
शिथिलेतरवन्ध	२,	८
शीर्णदंष्ट्रौ यथा	६,	२४
शुद्धसंस्कार	१३,	५०
शुद्धिं वितन्वन्	७,	५६
शुभमुहूर्तमिवास्य	८,	१५
शुभ्रत्रिपुण्ड्रच्छलतो	३,	३५
शुम्भदैत्यदलने	४,	१४
शुम्भादिदम्भदल	१,	३
शुम्भासुरप्रशमनी	२,	६१
शुश्रूषमाणा	१५,	२२
शुष्यन्मुखः	७,	२२
शुभ्राः संग्राम	२०,	५४
शूरः स्वकुल	१३,	४६
शैशवे कर्षता	१३,	६०
शोणैः करैः	१५,	७
शौर्यसाहस	१८,	६
शौर्यसाहस	१३,	६५
श्यामद्युतः पिद	१६,	३६
श्रद्धानुबद्धान्यपि	५,	२६
श्रद्धासमृद्धागम	३,	५८
श्रमविक्रमनीति	२,	५७
श्रियं दधानां	११,	३०
श्रियं सितच्छत्र	३,	२६
श्रियमधत्त मधू	८,	३५
श्रुतवान् पुरापि	१४,	२
श्रुतिघोषपवि	२,	१८
श्रुत्वा कुमारस्य	२०,	१२
श्रुत्वा तमागत	१६,	१२
संख्येषु यः	१६,	३
संग्रामसीम्नि	१,	१६
संग्रामसीम्नि	५,	४६
संग्रामान्ते पाति	१२,	६५
संचरन् समरा	१३,	२५
संचिकाय सम	१३,	६८
संनिवृत्तमधिगत्य	४,	३१

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
संमार्जनाकौशल	३,	४७	स पुत्रं भीम	१३,	७
संयम्य नूनं	७,	१४	स पुष्करं पुष्कर	७,	२८
संयोज्यमाने	१७,	२०	सप्तापि गाधान्	७,	३०
संसारकासार	१०,	४८	स प्रणम्य गुरु	४,	३५
संसारजाङ्गल	१८,	३७	सप्राणपंचेन्द्रिय	३,	६१
संसारवेणिमिव	१६,	५२	स भारतादिश्रवणे	५,	२१
संसारसार	१३,	३५	स भावनीये	१०,	१४४
सकलासु कलासु	१२,	१६	स भूभृतं भूमि	११,	३४
स कान्यकुब्जाधि	१०,	१२७	समयस्य नृशंसतां	१२,	५०
स क्षणादकरोद्	६,	२१	समये च तत्र	१४,	३१
स क्षणात् प्रकृतिं	४,	१	समये समुदीरितो	२,	७
सख्यः समक्षीक्रियते	१०,	८४	समराङ्गणसीम्नि	१२,	३३
स ग्रामसीमासम	३,	१५	समरे शमयन्ति	१२,	४६
स जित्वा जित्वरः	६,	४२	समरोत्सुक	१२,	५३
स तथागतया	६,	३२	समश्रु वानांस्तप	३,	५
स तथेति तदिङ्गितं	६,	६२	समापिते सम्प्रति	१०,	७१
स तदाऽर्जुनस्य	१४,	२६	समाप्तकृत्यः प्रश	११,	२१
स तस्यां वंश	१३,	३४	समीरणासङ्ग	१०,	१५८
सत्यं सितासित	१६,	३	स मुदा समुदाय	६,	१७
सत्यामपि प्रार्थित	७,	५३	समुद्रनेमिं स	११,	१५
सत्ये युधिष्ठिरे	१,	१०	समुल्लङ्घ्य क्षीरा	१,	४४
सत्रासांस्तान्	१२,	६१	समृद्धराज्यो बहु	५,	१६
स ददर्श दुरासद	६,	५५	सम्पश्युतोऽपि	१,	४२
सदसि स्पृहणीय	२,	२	सम्पाद्य पम्पा	५,	५२
सदाऽरुणदरा	१३,	३	संवर्तवतुंलित	१६,	१०
सदा हरशिरश्चन्द्र	६,	५६	सम्भावयामास	१७,	५४
सन्ततं मम	४,	२५	सम्यग्विवेकादिव	११,	७
स पट्टनाख्यं	११,	३६	सरसी भविष्यति	१८,	६१
सपदि तत्र वने	८,	२४	सरसीरुहसौर	२,	६

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
सरागचरणन्यास	१३,	३३
सरितां पतिरप्य	२,	३३
स रोधसा सञ्चरते	१०,	५६
सर्वथाऽधिक	१८,	१५
सर्वाशाः परि	१३,	७२
सर्वेन्द्रियाणि प्रति	१०,	३५
सर्वेन्द्रियाणां विनि	३,	६२
सर्वेष्वेव प्रेषिता	१२,	७२
सर्वै रुपायश्च	१६,	४७
स वन्दिनं नन्दित	१०,	५३
स वाहिनीभिः	६,	१६
सविलासपदां	२,	११
स विसृज्य	१८,	२४
स स्थूललक्षः सुमना	११,	४७
सहंसलक्ष्मा	७,	१६
सहजमेव समेत्य	८,	३७
सहजेतरकर्मणि	१२,	१४
सह सर्वबलेन	१२,	४१
साङ्केतिकैरथ	१६,	५१
सात्राजितीसौहृद	११,	३१
सामन्तमुख्यः समु	१०,	११३
सामन्तसिंह इति	१,	२५
सारमाकृष्य कैलासात्	६,	६२
सावर्ण्यादविनिर्णेय	६,	८
सा वर्तमाना	१०,	२०
सिंहासनं हेम	२०,	२८
सितातपत्रं पुत्राय	६,	३६
सिन्दूरबिन्दु	१६,	२०
सिन्धोरगाधे	५,	४७
सिप्रासरिति स	६,	६३
सीमन्तिनीनां कल	१५,	५६
सीमन्तिनीनामनु	१५,	७२
सुखोपविष्टेषु	१०,	१५६
सुचरितैः सततं	८,	२६
सुचरितत्रपविलिता	६,	३६
सुचिरं कुसुमानि	६,	११
सुचिरमथ विपक्ष	१२,	७७
सुतं दुर्लभराजाख्यं	६,	४३
सुतं वल्लभनामानं	६,	१६
सुतमर्जुननामानं	१३,	२३
सुतो द्रुसलदेवोऽथ	६,	४४
सुतोऽभूत्तस्य चामुण्ड	६,	३५
सुधामयः कोऽपि	१०,	१७
सुपर्वसिन्धु	२०,	१६
सुमनाः सुकुमार	१८,	६४
सुरद्विषः क्रव्यभुजो	५,	१
सुरभिमासि	८,	४७
सुराङ्गनावर्जित	११,	४०
सुवदना रदन	८,	५४
सुवर्णभूमीरचिता	३,	१७
सुवर्णशैलान्	१०,	१४
सुविवेकविशे	२,	१६
सुहृदः समु	१८,	६७
सूक्ष्मान्तरीये	१५,	५४
सूनुरस्य हरिराज	४,	४३
सेनापतिः पृथुयशाः	११,	६६
सेयं पुरी	१८,	३१
सेवनाद् गिरिभुवो	४,	४०

श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः	श्लोकाः	सर्गाङ्काः	श्लोकाङ्काः
सैन्ययोर्मिलितयो	११,	६८	स्वप्नेषु न प्रेष्ठ	३,	६५
सैन्याः सुहृद्बन्धु	१०,	१४७	स्वबन्धुभिर्वन्ध्य	५,	४
सैन्यानि विद्राव्य	११,	१७	स्वबलेन विनिर्जित्य	६,	३
सोऽचिन्तयत् सञ्चित	५,	२५	स्वभर्तृशल्योरुदया	७,	४
सोऽधिरुह्य तरुणं	४,	२६	स्वभाव एवाय	१०,	७०
सोपपत्तिक	१८,	२३	स्वभावरम्येण	१०,	३
सौधोत्सङ्गपरि	६,	५०	स्वमनीषित	६,	४२
सौभाग्यलक्ष्मी	१५,	३८	स्वयं विधाता च	७,	५०
स्तनयोर्मनोरम	१४,	२५	स्वयं स ईशः	७,	५१
स्तब्धत्वहेतुमप	१,	४३	स्वयमेव समीप	६,	२६
स्तोकप्रदाः	२०,	४२	स्वर्णायिमाकल्पित	३,	२१
स्तोत्रैः पवित्रै	३,	४८	स्वसंमुखं सद्म	१७,	१३
स्नेहेन पुत्रप्रतिमं	५,	३०	स्वां प्रविश्य नगरीं	४,	३६
स्पर्शं खरोष्णां	१५,	४३	स्वेदोदबिन्दु	१५,	५५
स्फटिकदेवकुले	८,	२१	हंमीरदेवस्य	११,	१४
स्फटिका···परीतं	६,	५६	हंमीरदेवेन	११,	५२
स्फारे फणधर	१६,	४	हंमीरस्तनयस्तस्य	१३,	१६
स्फुटलवङ्गलता	८,	३४	हंसान् हसन्त्यो	१५,	५७
स्फुरद्विपक्षी	२०,	१३	हृतहिमकिरणः	८,	५१
स्फुरन्महानील	११,	२८	हमीरदेवनृपते	११,	६६
स्फुरिताधरपल्लवा	६,	७	हरभूधरतोऽपि	२,	४५
स्मरस्य सेवा	१८,	४४	हर्म्यैर्हिमाचलो	३,	६०
स्मरस्य स्वारस्यात्	६,	७१	हविर्भुजस्तत्र	७,	५४
स्मृतिभुवः श्वसितै	८,	३६	हीनशक्तिर्वि	१८,	११
स्मृत्तिमात्रेण जन्तूनां	६,	६६	हुतहव्यवाह	१४,	७१
स्यन्देन शंसन्	१०,	१०१	हुताशने यद्	७,	५२
स्वच्छत्वसाद्गुण्य	११,	४३	हूनाः स्थूणा इव	४,	५२
स्वच्छन्दं रमता	१३,	६२	हृत्वा यशोभिः	११,	३३
स्वच्छात्मानः	१८,	२६	हृदये हृदयङ्गमं	६,	४३
स्वत एव हेम	१४,	१७	हेमं यदेव	१६,	४०

शूर्जनचरितस्य शुद्धिपत्रम्

पत्रम्	पंक्तिः	अशुद्धम्	शुद्धम्
११	२३	मृगावली	भृंगावली
१३	१	कामा गुरु	कामागुरु
,,	१२	कलापं	कलाप-
,,	१५	स ब्रह्म	सब्रह्म
,,	२०	सुगन्धो०	सुगन्धा०
,,	२७	आच्छेतु	अन्वेतु
१४	१३	चापं	चार्यं
१६	११	चेतनामयी	चेतनामयीं
१६	३	पाररं	पारगं
,,	१०	समरमुत्क	समरसमुत्क
२०	७	निरस्ताः	र्निरस्ताः
२२	२२	राजानमिदं	राजा तमिदं
२३	३	विसोदुं	विसोढुं
२६	१२	समाक्रां०	समाक्रा०
२६	६	०छ्रायैः	०च्छ्रायैः
,,	२०	विग्रहः	विग्रह
३२	१०	गृह्णान्	गृह्णन्
३३	२१	सङ्गम्	षङ्गम्
३६	२	माप	मपि
३६	६	अजपाल	अजयपाल
४१	४	कर	(कर ? कल)
,,	६	०राङ्कु	०राङ्कर
,,	१६	कमितो	कसितो
४४	१३	मागधेय	भागधेय
४५	३	निर्मित	र्निर्मित
,,	२८	पदम्बर	पट्टाम्बर
५१	२२	पुसां	पुंसां
५३	२६	विचारयन्ती	विचारयन्ति
,,	२८	०जात्ताः	०जान्ताः

पत्राङ्कः	पंक्तिः	अशुद्धम्	शुद्धम्
५६	५	जनधि	जनाधि
५६	२७	वृद्धि	वृद्धि
६०	६	प्राथतं	प्रार्थितं
६६	१४	सिञ्चन्ति	षिञ्चन्ति
७१	१५	खङ्गो	खङ्गो
,,	२१	वद्ध	वद्ध
७४	१०	सभारो०	स्वभारो०
,,	१८	उचितं	उचिता
७५	१२	स	सा
७७	२४	सर्वाज्ज्वलां	सर्वोज्ज्वलां
७८	६	जातः	यातः
,,	१६	ज्रेरेण	ज्वरेण
,,	२६	प्रतीकैः	प्रलोकैः
८१	३०	पुस्त्वं	पुंस्त्वं
८३	१०	न्यवर्तयन्	न्यवर्तयत्
९६	३	दर्पाद्धत	दर्पोद्धत
९९	११	प्रालेयापरण्ड	प्रालेयपिरण्ड
,,	१६	धद	घन
१०१	११	भ्राञ्जि	भाञ्जि
१०४	७	यश्चिकीर्षति	यच्चिकीर्षति
१०५	१०	यततेऽद्भूत	यततेऽद्भुत
१०९	२८	श्लोकऽयं	श्लोकोऽयं
११२	२६	विभु	विधु
११८	१	पदाऽम्बर	पट्टाम्बर
११९	१६	पृष्ट	पृष्ठ
१२१	१	वाले	बाले
,,	,,	दृष्ट	दृष्ट
,,	२०	वृन्दावतो	वृन्दावतो
,,	२१	गौह्लीय	गौडीयः